पुनर्द्रक्ष्याव इत्युक्त्वा प्रतस्थे सह कन्यया ॥ १५
उपलब्धमिदं द्वारमश्वानामिति चाण्डजः ।
उक्त्वा गालवमापृच्छ्य जगाम भवनं स्वकम् ॥ १६
गते पतगराजे तु गालवः सह कन्यया ।

C. 5. 3933
B. 5. 115. 17
K. 5. 115. 17

---

6 K_5 om. 6^{ab}. — ^{a}) $K_{1.2}$ Ds $D_{3.4.7.9.10}$ G_5 च (for तु). — ^{b}) S मे (for मां). — ^{d}) S द्रव्यं (for वित्तं). K_4 $B_{2.4.5}$ Dn D_{10} च (for हि).

7 K_5 om. 7^a–12^b. — ^{a}) $D_{1-4.9}$ तु (for च). $D_{3.4.9.10}$ M_3 शक्नोमि (for शक्तोऽस्मि). $D_{3.4.9}$ अहं (for ते). — ^{b}) $D_{3.4.8.9}$ तव (for खग). — ^{c}) G_5 च कामं च (for चाशामस्य). S विप्रस्य (for विप्रर्षेर्). — ^{d}) B Dn_1 वितथी- (for °थां).

8 K_5 om. 8 (cf. v.l. 7). — ^{a}) T $G_{1.4.5}$ पुत्रीं; T_2 (before corr.) $G_{2.3}$ M अत्र (for तत्तु). — ^{b}) T_2 G_1 इयं (for इदं). — ^{c}) K_4 Ds G_5 गताशो (for ह°).

9 K_5 om. 9 (cf. v.l. 7). — ^{c}) D_1 G_5 यत्; Cs यथा (as in text). K_4 B Dn Ds $D_{1.6.8.10}$ Ca. d. s °नाशनात्; $D_{2.4.9}$ °नाशकृत्. — ^{d}) $D_{3.4.9}$ transp. देहि and नास्ति. $K_{1.2.3}$ D_{10} यत्; Ca. d वा (as in text).

10 K_5 om. 10 (cf. v.l. 7). — ^{a}) G_4 वृथाशो (for ह°). — ^{b}) $K_{1.2}$ D_1 हतः संभावितं नरं; S हतसंभावनो नरः. Ca cites संभावितः, Cd संभावितं. — ^{c}) D_7 हिनस्ति सुकृतं पुत्रान्. — ^{d}) D_{10} वंशाः (for पौत्रान्). K_{1-3} D_1 T G_2 [ऽ]र्थितां; K_4 B Dn Ds $D_{2-4.6.8.9}$ हितं (for ऽर्थिनाम्). — After 10, G_3 (irrelevantly) reads the portion of the text from 5^c to the end of adhy. 121 together with Stanzas 1–38 of adhy. 122, followed by a *repetition* of Stanzas 22–23 of adhy. 111 and 1–5 of adhy. 112!

11 K_5 om. 11 (cf. v.l. 7). — ^{a}) D_1 ततः (for तस्मात्). K_4 B_3 Ds $D_{2-4.6.9}$ वर्णानां; D_6 (*sup. lin.*). $_8$ वर्गानां; Cs वंशानां (as in text). — After 11^{ab}, K_4 Ds $D_{3.4.6.9}$ S ins.:

455* माधवी नाम तार्क्ष्येयं सर्वधर्मप्रवादिनी ।
[T $G_{1.2.5}$ °प्रदायिनी (for °प्रवादिनी).]

— ^{c}) K_1 Ds सुरसुताप्रख्या; T_1 G_1 सुरतरु°. — ^{d}) K_4 m °धर्मोपचारिणी; B $D_{2-4.9}$ °पादिनी; G_4 °धर्मार्थदायिनी; M_2 °धर्मप्रवादिनी. Ca. d. s cite अपचायिनी.

12 K_5 om. 12^{ab} (cf. v.l. 7). — ^{a}) $K_{1.2}$ $D_{3.4.7.9}$ तथा; D_2 सा च (for सदा). — ^{d}) S कन्या (for सुता).

13 ^{d}) T_2 G_2 अश्वानां (for हयानां).

14 ^{a}) T_2 G_2 M भगवान् (for स भवान्). — ^{b}) $K_{3.4}$ B (except B_6) Dn_2 Ds $D_{3.4.6.8-10}$ G_4 एतां; Dn_1 T_1 एनां (for इमां). — ^{cd}) S अहं दौहित्रपूतः स्यामेष मे स्याद्वरः प्रभो. — After 14, $D_{3.4.8.9}$ S ins.:

456* तस्य तद्वचनं श्रुत्वा ब्राह्मणः संशितव्रतः ।

[D_8 स तस्य (for तस्य तद्). $D_{3.4.8.9}$ गालवः (for ब्राह्मणः). MSS. (as usual) संशित°, शंसित°, संश्रित° etc.]

15 ^{a}) S तु ($M_{1.2}$ सु-) (for च). — ^{b}) D_2 संशितव्रतः; G_5 सह पत्रिणा (for सह पक्षिणा). — D_9 om. 15^c–16^b. — ^{c}) T_2 G_2 द्रक्ष्याम (for °व).

16 D_9 om. 16^{ab} (cf. v.l. 15); K_3 om. 16; Dn_2 D_6 om. (hapl.) 16^a–17^b. — ^{c}) $D_{2-4.9}$ G_5 आमंत्र्य (for आपृच्छ्य). — ^{d}) $B_{1.2.4}$ स्वगृहान्; $D_{3.4.9}$ सदनं (for भवनं). $D_{3.4.9}$ S प्रति (for स्वकम्).

17 Dn_2 D_6 om. 17^{ab} (cf. v.l. 16). — ^{a}) $G_{2.4.5}$ $M_{4.5}$ पतंग°. — ^{c}) K_5 विचिंतयन्; Cs चिंतयानः (as in

C. 5. 3933
B. 5. 113. 17
K. 5. 115. 17

चिन्तयानः क्षमं दाने राज्ञां वै शुल्कतोऽगमत् ॥ १७
सोऽगच्छन्मनसेक्ष्वाकुं हर्यश्वं राजसत्तमम् ।
अयोध्यायां महावीर्यं चतुरङ्गबलान्वितम् ॥ १८
कोशधान्यबलोपेतं प्रियपौरं द्विजप्रियम् ।
प्रजाभिकामं शाम्यन्तं कुर्वाणं तप उत्तमम् ॥ १९
तमुपागम्य विप्रः स हर्यश्वं गालवोऽब्रवीत् ।
कन्येयं मम राजेन्द्र प्रसवैः कुलवर्धिनी ॥ २०
इयं शुल्केन भार्यार्थे हर्यश्व प्रतिगृह्यताम् ।
शुल्कं ते कीर्तयिष्यामि तच्छ्रुत्वा संप्रधार्यताम् ॥ २१

इति श्रीमहाभारते उद्योगपर्वणि त्रयोदशाधिकशततमोऽध्यायः ॥ ११३ ॥

११४

नारद उवाच ।
हर्यश्वस्त्वब्रवीद्राजा विचिन्त्य बहुधा ततः ।
दीर्घमुष्णं च निःश्वस्य प्रजाहेतोर्नृपोत्तमः ॥ १
उन्नतेषून्नता षट्सु सूक्ष्मा सूक्ष्मेषु सप्तसु ।
गम्भीरा त्रिषु गम्भीरेष्वियं रक्ता च पञ्चसु ॥ २
बहुदेवासुरालोका बहुगन्धर्वदर्शना ।
बहुलक्षणसंपन्ना बहुप्रसवधारिणी ॥ ३
समर्थेयं जनयितुं चक्रवर्तिनमात्मजम् ।
ब्रूहि शुल्कं द्विजश्रेष्ठ समीक्ष्य विभवं मम ॥ ४

गालव उवाच ।
एकतःश्यामकर्णानां शतान्यष्टौ ददस्व मे ।
हयानां चन्द्रशुभ्राणां देशजानां वपुष्मताम् ॥ ५
ततस्तव भवित्रीयं पुत्राणां जननी शुभा ।
अरणीव हुताशानां योनिरायतलोचना ॥ ६

---

text). — d) S राजानं (for राज्ञां वै). K5 D7 गतः (for ऽगमत्).

18 a) T2 G1.4.5 ऐक्ष्वाकुं (G1 °कं).

19 a) A few N MSS. कोष°. — b) D1.3.4.9 S प्रियद्विजं (for द्विजप्रियम्). — c) D2–4.9 संपन्नं; G5 काम्यंतं; Ca. d. s शाम्यन्तं (as in text).

20 a) K5 D7 विप्रर्षिः; D3.4.9 विप्रोसौ (for विप्रः स). — b) D2 सहर्षं (for हर्यश्वं). — d) K (except K3) D8 D2–4.9 T1 G3.5 M1.2 कु(D8 फ)लवर्धनी.

21 ab) S transp. भार्यार्थे and हर्यश्व. K3 Dn D2 भार्यार्थं (for °र्थे).

Colophon missing in D5. — *Sub-parvan:* K1–3 B1.3 Dn D8 D10 T1 G1 M1 भगवद्यान, followed by गालवचरित. K4 B2.4.5 D1–4.6–9 G5 M2–5 (all om. sub-parvan name) mention only गालवचरित. — *Adhy. name:* G5 M माधवीग्रहणं. — *Adhy. no.* (figures, words or both): D6 6 (=106); D7 T2 G4 M1–3.5 116; T1 G1.2.5 117; G3 M4 115. — *S'loka no.:* K5 14; Dn1 D8 22; Dn2 20.

114

1 a) S वाक्यं (for राजा). — c) T1 G1.4 °कालं (for °मुष्णं). B2 S विनिश्वस्य (for च निः°). — d) K1.3.5 D8 D7 T1 नृपोत्तम; B1.2.4 नरोत्तमः.

2 b) K5 D1 S पंचसु; B3 च त्रिषु; Ca. d. s सप्तसु (as in text). — d) K3.5 Dn1 D7 G5 M2 सु- (for च). D1 सप्त°; Ca. d. s पंच° (as in text). T2 G2 आरक्ता चैव पंचसु. — After 2, T G1.2.4 ins.:

457* श्रोण्यौ ललाटकक्षौ च घ्राणं चेति षडुन्नतम् ।
सूक्ष्माण्यङ्गुलिपर्वाणि केशलोमनखत्वचः ।
स्वरः सत्त्वं च नाभिश्च त्रिगम्भीरं प्रचक्षते ।
पाणिपादतले रक्ते नेत्रान्तास्यनखानि च ।,

which is no doubt a gloss! — K3 (which om. 3ab and 4) reads 5 after 2. On the other hand D8 ins. after 2 a passage given in App. I (No. 6).

3 K3 om. 3ab. — a) K1.2 °कारा; K5 D1.10 T1 G5 M Cs °नूका; T2 G1.2 °नीका; Ca °लोका (as in text). — d) D3.4.9 °कल्याणचारिणी; S °कल्याणधारिणी.

5 5ab = 5. 104. 26ab. — K3 reads 5 after 2. — b) K3 D3.4.9 T1 G1.4 च देहि; K4 B Dn D8 D1.6.8.10 G3.5 प्रयच्छ; T2 G2 M1.2.4 तु देहि; M3.5 ददाहि (for ददस्व). — K5 om. 5cd.

7 a) K1–3 B3 Dn1 D8 D3.4.6.8–10 स तत्; D2 ततः (for एतत्). G2 M1.2 ततो (for वचो). — c) D2 चेवं (for दीनो). — d) K3 D3.4.9 G5 मुनिसत्तमं; D2 नृप-

नारद उवाच ।

एतच्छ्रुत्वा वचो राजा हर्यश्वः काममोहितः ।
उवाच गालवं दीनो राजर्षिर्ऋषिसत्तमम् ॥ ७
द्वे मे शते संनिहिते हयानां यद्विधास्तव ।
एष्टव्याः शतशस्त्वन्ये चरन्ति मम वाजिनः ॥ ८
सोऽहमेकमपत्यं वै जनयिष्यामि गालव ।
अस्यामेतं भवान्कामं संपादयतु मे वरम् ॥ ९
एतच्छ्रुत्वा तु सा कन्या गालवं वाक्यमब्रवीत् ।
मम दत्तो वरः कश्चित्केनचिद्ब्रह्मवादिना ॥ १०
प्रसूत्यन्ते प्रसूत्यन्ते कन्यैव त्वं भविष्यसि ।
स त्वं ददस्व मां राज्ञे प्रतिगृह्य हयोत्तमान् ॥ ११
नृपेभ्यो हि चतुर्भ्यस्ते पूर्णान्यष्टौ शतानि वै ।
भविष्यन्ति तथा पुत्रा मम चत्वार एव च ॥ १२
क्रियतां मम संहारो गुर्वर्थं द्विजसत्तम ।
एषा तावन्मम प्रज्ञा यथा वा मन्यसे द्विज ॥ १३
एवमुक्तस्तु स मुनिः कन्यया गालवस्तदा ।
हर्यश्वं पृथिवीपालमिदं वचनमब्रवीत् ॥ १४
इयं कन्या नरश्रेष्ठ हर्यश्व प्रतिगृह्यताम् ।
चतुर्भागेन शुल्कस्य जनयस्वैकमात्मजम् ॥ १५
प्रतिगृह्य स तां कन्यां गालवं प्रतिनन्द्य च ।
समये देशकाले च लब्धवान्सुतमीप्सितम् ॥ १६
ततो वसुमना नाम वसुभ्यो वसुमत्तरः ।
वसुप्रख्यो नरपतिः स बभूव वसुप्रदः ॥ १७
अथ काले पुनर्धीमान्गालवः प्रत्युपस्थितः ।
उपसंगम्य चोवाच हर्यश्वं प्रीतमानसम् ॥ १८
जातो नृप सुतस्तेऽयं बालभास्करसंनिभः ।
कालो गन्तुं नरश्रेष्ठ भिक्षार्थमपरं नृपम् ॥ १९
हर्यश्वः सत्यवचने स्थितः स्थित्वा च पौरुषे ।
दुर्लभत्वाद्धयानां च प्रददौ माधवीं पुनः ॥ २०
माधवी च पुनर्दीप्तां परित्यज्य नृपश्रियम् ।
कुमारी कामतो भूत्वा गालवं पृष्ठतोऽन्वगात् ॥ २१
त्वय्येव तावत्तिष्ठन्तु हया इत्युक्तवान्द्विजः ।
प्रययौ कन्यया सार्धं दिवोदासं प्रजेश्वरम् ॥ २२

C. 5. 3959
B. 5. 116. 22
K. 5. 116. 28

इति श्रीमहाभारते उद्योगपर्वणि चतुर्दशाधिकशततमोऽध्यायः ॥ ११४ ॥

सत्तम (for ऋषि°). T_1 G_4 राजा राजर्षिसत्तम.

8 ^{b}) K_5 च द्विजोत्तम (for यद्विधा°). Ca. d cite यद्विधाः. — ^{c}) $D_{2-4.9}$ विविधाः; Ca एष्टव्याः (as in text). K_4 B_8 D_8 बहवः; Ca. d शतशः (as in text). D_8 $M_{1.2}$ च (for तु). — ^{d}) $D_{2-4.9}$ भवंति (for चरन्ति).

9 ^{a}) T_2 G_2 मे (for वै). — ^{c}) K_2 एनं; $G_{3.5}$ M_2 एवं (for एतं). — ^{d}) K (except K_4) $D_{2-4.9}$ T_2 G_2 परं (for वरम्). $M_{1.2}$ संपादयितुमर्हति.

11 ^{b}) = 1. 57. 63^{d}. T_2 G_4 कन्येव; G_5 कन्यका. S इति प्रभो (for भवि°). — After 11^{ab}, S reads 12^{cd}. — ^{c}) K_3 प्रदाय (for ददस्व). $M_{1.2}$ मा. Ds_2 M_2 राज्ञः. T_2 G_2 स त्वं दत्वा महाराज्ञे.

12 ^{a}) K_5 D_8 D_7 अपि; D_8 तु (for हि). $D_{3.4.9}$ तु (for ते). — ^{b}) $K_{3.4}$ $B_{3.5}$ Dn $D_{6.8.9}$ मे; K_5 D_7 च; $D_{3.4}$ ते (for वै). — S reads 12^{cd} after 11^{ab}.

13 ^{a}) G_5 गृह्यतां (for क्रियतां). K_3 अत्र सं°; K_4 B Dn Ds $D_{5-8.10}$ Ca उपसं°; D_1 तव सं°; D_2 उपसंभारः; $D_{3.4.9}$ मं(D_3 अ)त्रसंभारः; T_1 M मधुसंहारः; T_2 $G_{1.2}$ धर्मसं°; G_{3-5} अथ सं° (for मम संहारः) Cd cites संहारः (as in text). — ^{d}) K_3 $D_{3.4.9}$ मन्यते द्विज (K_3 भवान्). T_2 G_2 मन्यसे द्विज गालव.

14 Before 14, K_4 $D_{3.4.9}$ S ins. नारद उ° (resp. नारदः). — ^{a}) $G_{3.5}$ सुमतिः (for स मुनिः).

15 ^{a}) K_3 $D_{3.4.9}$ वर° (for नर°). — ^{d}) D_2 पुत्रकं (for आत्मजम्).

16 ^{b}) $B_{1.2.4}$ प्रतिपूज्य च; B_8 °लभ्य च; M_4 °नंदयन्. — ^{d}) G_1 सुखम् (for सुतम्).

17 ^{a}) S जातो (for ततो). — ^{b}) D_8 D_{10} वसुसंभवः; S °सत्तमः; Ca. d °मत्तरः (as in text). — ^{c}) $K_{1.2}$ D_8 $D_{3.4.9.10}$ Ca. d °प्रभो (for °प्रख्यो). — ^{d}) $K_{1.2}$ B (except B_4) $D_{2.8}$ सं- (for स). S सर्वभूतवर(T_1 G_4 °वसु)प्रदः.

18 ^{a}) $G_{4.5}$ चरन् (for पुनर्). — ^{d}) K_1 (before corr.) B_2 Dn_2 Ds_2 D_8 प्रीतिमानसं; T_2 G_2 प्रीतिमानिदं.

19 ^{b}) K_1 बले; $K_{3.4}$ B Dn Ds $D_{2.6.7.10}$ बालो (for बाल-). — ^{c}) $B_{1.2.4}$ $D_{3.4.9}$ नृप° (for नर°). — ^{d}) S शुल्कार्थम् (for भिक्षार्थम्).

20 Before 20, S ins. नारदः. — ^{a}) T_2 G_2 तस्य वचनं

११५

C. 5. 3960
B. 5. 117. 1
K. 5. 117. 1

गालव उवाच ।

महावीर्यो महीपालः काशीनामीश्वरः प्रभुः ।
दिवोदास इति ख्यातो भैमसेनिर्नराधिपः ॥ १
तत्र गच्छावहे भद्रे शनैरागच्छ मा शुचः ।
धार्मिकः संयमे युक्तः सत्यश्चैव जनेश्वरः ॥ २

नारद उवाच ।

तमुपागम्य स मुनिर्न्यायतस्तेन सत्कृतः ।
गालवः प्रसवस्यार्थे तं नृपं प्रत्यचोदयत् ॥ ३

दिवोदास उवाच ।

श्रुतमेतन्मया पूर्वं किमुक्त्वा विस्तरं द्विज ।
काङ्क्षितो हि मयैषोऽर्थः श्रुत्वैतद्द्विजसत्तम ॥ ४
एतच्च मे बहुमतं यदुत्सृज्य नराधिपान् ।
मामेवमुपयातोऽसि भावि चैतदसंशयम् ॥ ५
स एव विभवोऽस्माकमश्वानामपि गालव ।
अहमप्येकमेवास्यां जनयिष्यामि पार्थिवम् ॥ ६

नारद उवाच ।

तथेत्युक्त्वा द्विजश्रेष्ठः प्रादात्कन्यां महीपतेः ।
विधिपूर्वं च तां राजा कन्यां प्रतिगृहीतवान् ॥ ७
रेमे स तस्यां राजर्षिः प्रभावत्यां यथा रविः ।
स्वाहायां च यथा वह्निर्यथा शच्यां स वासवः ॥ ८
यथा चन्द्रश्च रोहिण्यां यथा धूमोर्णया यमः ।
वरुणश्च यथा गौर्यां यथा चर्द्ध्यां धनेश्वरः ॥ ९
यथा नारायणो लक्ष्म्यां जाह्नव्यां च यथोदधिः ।
यथा रुद्रश्च रुद्राण्यां यथा वेद्यां पितामहः ॥ १०

(for सत्यवचने). — ^{b}) T_2 G_2 स्थित्वा सत्ये (for स्थितः स्थित्वा). T_1 G_1 $M_{1.2}$ तु (for च).

21 ^{a}) S तु (for च). D_6 दीप्ता; D_{10} दत्ता (for दीप्तां). — ^{c}) S (except G_4) कुमारिका ततो (for कुमारी कामतो).

22 ^{a}) T_1 G_4 मम (for तावत्). — ^{d}) K_1 जने°; K_5 $D_{7.10}$ नरे° (for प्रजे°).

Colophon missing in D_5; K_5 om. it. — *Sub-parvan:* $K_{2.3}$ $B_{1.3}$ Dn_1 D_5 $D_{7.10}$ M_{3-5} भगवद्यान; to it all except M_{3-5} add गालवचरित. $K_{1.4}$ $B_{2.4.5}$ Dn_2 $D_{1-4.6.9}$ T_1 $G_{1.5}$ $M_{1.2}$ (all om. sub-parvan name) mention only गालवचरित. — *Adhy. name:* G_5 माधवीप्रथमप्रदानं. — *Adhy. no.* (figures, words or both): D_6 7 (=107); D_7 T_2 G_4 $M_{1-3.5}$ 117; T_1 $G_{1.2.5}$ 118; G_3 M_4 116. — *S'loka no.:* Dn 22.

115

1 K_5 $G_{3.4}$ om. the ref. T_1 $G_{1.5}$ M नारदः (for गालव उ°). — ^{a}) S (by transp.) महीपालो महावीर्यः (G_3 °प्राज्ञः).

2 ^{c}) $K_{1.5}$ $D_{2-4.7.9}$ शमयुक्तश्च; K_2 सत्ययुक्तश्च; D_{10} संयमयुतः; T_2 $G_{2.5}$ M संशमे युक्तः. K_3 स ते रूपसमो भर्ता. — ^{d}) K_3 सत्यवाक्सु· K_4 B Dn D_5 $D_{6.8}$ सत्ये चैव; D_{10} सत्यवक्ता (for सत्यश्चैव). $K_{1.2.5}$ $D_{1.3.4.7.9}$ धनेश्वरः; D_8 नरे°.

3 K (except K_4) D_7 S (except T_2 G_2) om. the ref. — ^{b}) T_1 $G_{1.4}$ गालवः (for न्यायतः). — ^{c}) T_2 G_2 प्रसवस्यार्थं. — ^{d}) $K_{1.2}$ $B_{1.3.5}$ $D_{1-4.9}$ G_3 M_4 पर्यचोदयत्; K_3 पर्यनोद°; K_5 D_7 प्रत्यनोद°.

4 ^{a}) $G_{3.5}$ M सर्वं (for पूर्वं). — ^{c}) $K_{1.2.5}$ B_3 D_{7-9} T_2 $G_{1.4.5}$ मम (for मया). S एव (for एषः). — ^{d}) $K_{3.4}$ B D (except $D_{3.4.9}$) एव (for एतद्).

5 K_5 om. 5^{ab}. — ^{c}) D_{10} अन्यान्माम् (for मामेवम्) K_5 D_7 प्रतियातो (for उपयातो).

6 K_5 om. 6^{ab}. — ^{b}) K_4 $D_{2-4.7.9}$ अस्ति (for अपि). $B_{1.2.4}$ अश्वानां द्विजसत्तम. — ^{c}) $K_{1.2.5}$ $D_{1.2.7.8}$ एतस्यां (for एवास्यां).

7 $K_{3.4}$ B D (except $D_{7.8}$) om. the ref. — ^{cd}) K_3 $B_{2.4.5}$ $D_{1.9}$ G_3 M_3 विधिपूर्वां. K_5 D_8 D_{10} G_5 transp. राजा and कन्यां.

8 ^{a}) $K_{1.2}$ $D_{1.7.8.10}$ T_1 $G_{1.4}$ तस्यां स (by transp.); K_5 G_5 च तस्यां; D_8 तस्यां च. $D_{3.4.9}$ रेमे तस्यां कुरुश्रेष्ठ. — K_5 om. 8^d–17^d. — ^{d}) D_1 शतक्रतुः (for स वासवः).

9 K_5 om. 9 (cf. v.l. 8). — ^{a}) D_{10} हि चंद्रो (for चन्द्रश्च). — ^{b}) $B_{1.3.5}$ D_7 धूमोर्णायां; M धूम्रोर्णयां. K_4 Dn_1 $D_{2-4.8.9}$ ऊर्मिला(K_4 श्यामला)यां यथा यमः; $G_{3.5}$ धूमोर्णायां यथा य°. — ^{d}) $D_{3.4.9}$ om. च. Dn_2 $D_{7.10}$ वृध्यां; T G corrupt (for चर्द्ध्यां).

10 K_5 om. 10 (cf. v.l. 8). — ^{a}) D_1 transp. यथा and नारायणो. — G_5 om. 10^b–12^a. — After 10^{ab}, G_4 ins. 460*. — ^{d}) T_1 $G_{1.4}$ सरस्वत्यां; T_2 G_2

अदृश्यन्त्यां च वासिष्ठो वसिष्ठश्चाक्षमालया ।
च्यवनश्च सुकन्यायां पुलस्त्यः संध्यया यथा ॥ ११
अगस्त्यश्चापि वैदर्भ्यां सावित्र्यां सत्यवान्यथा ।
यथा भृगुः पुलोमायामदित्यां कश्यपो यथा ॥ १२
रेणुकायां यथार्चीको हैमवत्यां च कौशिकः ।
बृहस्पतिश्च तारायां शुक्रश्च शतपर्वया ॥ १३
यथा भूम्यां भूमिपतिरुर्वश्यां च पुरूरवाः ।
ऋचीकः सत्यवत्यां च सरस्वत्यां यथा मनुः ॥ १४

तथा तु रममाणस्य दिवोदासस्य भूपतेः ।
माधवी जनयामास पुत्रमेकं प्रतर्दनम् ॥ १५
अथाजगाम भगवान्दिवोदासं स गालवः ।
समये समनुप्राप्ते वचनं चेदमब्रवीत् ॥ १६
निर्यातयतु मे कन्यां भवांस्तिष्ठन्तु वाजिनः ।
यावदन्यत्र गच्छामि शुल्कार्थं पृथिवीपते ॥ १७
दिवोदासोऽथ धर्मात्मा समये गालवस्य ताम् ।
कन्यां निर्यातयामास स्थितः सत्ये महीपतिः ॥ १८ C. 5. 5980 B. 5. 117. 21 K. 5. 117. 21

इति श्रीमहाभारते उद्योगपर्वणि पञ्चदशाधिकशततमोऽध्यायः ॥ ११५ ॥

यथा वाण्यां (for यथा वेद्यां).

11 K_5 G_5 om. 11 (cf. v.l. 8, 10). — ^{a}) K_2 Dn_1 $D_{7.9}$ अदृश्यत्यां; D_8 D_{10} अदृश्यायां; D_1 अरुंधत्यां; D_2 अमृष्यंत्यां. D_1 वसिष्ठश्च (for च वासिष्ठो). G_3 वसिष्ठश्चाप्यरुंधत्यां. — ^{b}) D_1 वासिष्ठः (for वसिष्ठः). G_3 वासिष्ठश्चाप्यकंपया. — ^{d}) K_3 सह संध्यया; D_7 संध्यया सह (for संध्यया यथा).

12 K_5 om. 12 (cf. v.l. 8); G_5 om. 12^a (cf. v.l. 10). — ^{a}) D_{10} यथागस्त्यश्च वैदर्भ्यां. — ^{b}) Ds_1 $D_{3.4.9}$ $G_{3.4}$ सावित्र्या (for °त्र्यां). — G_5 (which om. 12^c–13^d) ins. 460* after 12^{ab}. — ^{d}) S काश्यपः. G_3 ऋष्यशृंगश्च शांतया. — After 12, G_3 ins.:

458* हिमवांश्चैव मेनायां गन्धवत्यां पराशरः ।

13 K_5 G_5 om. 13 (cf. v.l. 8, 12); D_8 om. 13^a–14^b. G_2 om. 13^{ab}. — ^{b}) $K_{2.3}$ G_3 M (except M_2) हैमवत्यां. — After 13^{ab}, G_3 ins.:

459* मौद्गल्यश्चन्द्रसेनायामदित्यां काश्यपो यथा ।

— ^{d}) D_8 D_{10} शतपर्वणा; $D_{1.6}$ शतवर्चया. G_3 शुक्रश्चापि यथार्चया.

14 K_5 om. 14 (cf. v.l. 8); D_8 om. 14^{ab} (cf v.l. 13); G_2 om. 14–17. — ^{a}) D_2 (before corr.)$_{.3.4.9}$ यथा भूत्यां; $G_{3.5}$ भूम्यां यथा (by transp.). $D_{3.4.9}$ भूत° (for भूमि°). — ^{c}) G_3 दधीचः; G_5 दधीचिः (for ऋचीकः). $G_{3.5}$ सत्यधृत्यां. — ^{d}) K_3 च नारदः (for यथा मनुः). — N (K_3 om. lines 1 and 2; D_{10} om. line 4) G_3 (om. line 6) ins. after 14; G_4, after 10^{ab}; G_5 (om. line 6), after 12^{ab}:

460* शकुन्तलायां दुःषन्तो धृत्यां धर्मश्च शाश्वतः ।
दमयन्त्यां नलश्चैव सत्यवत्यां च नारदः ।
जरत्कारुर्जरत्कार्वां पुलस्त्यश्च प्रतीच्यया ।
मेनकायां यथोर्णायुस्तुम्बुरुश्चैव रम्भया ।
वासुकिः शतशीर्षायां कुमार्यां च धनंजयः ।
वैदेह्यां च यथा रामो रुक्मिण्यां च जनार्दनः ।

[(L. 1) MSS. दुष्कंतः; दुःखंतः, दुष्पंतः etc. $G_{4.5}$ पुलहश्च भरद्वाजां (for the prior half). G_3 शिवायामनिलो यथा (for the posterior half). — (L. 2) G_{3-5} भार्गवः (for नारदः). — (L. 3) K_1 G_{3-5} रत्यां (G_4 रत्या) च (K_1 वा) मदनो यथा; $K_{2.3}$ $D_{2-4.7-9}$ यथा चाश्वपतिर्जया ($K_{2.3}$ °र्विशा) (for the posterior half). — After line 3, G_3 ins.:

461* पुलस्त्यश्च भरद्वाजयां वृत्त्यां धर्मश्च शाश्वतः ।

— (L. 4) MSS. तुंबरुः, तुरुष्कः, तुंबुरः also (for तुम्बुरुः). — (L. 5) $K_{1.2}$ $D_{2-4.7-9}$ शांतशीर्षायां; D_6 शांतशीलायां; G_3 सप्तशिष्यां च; G_4 सप्तशीर्ष्यायां; G_5 सप्तशीर्ष्यां च (for शत°). Ds_2 द्रौपद्यां चैव पांचाल्यां (for the prior half). B_3 सुभद्रायां (for कुमार्यां च). — D_6 om. from the posterior half of line 5 up to 15^a.]

15 D_6 om. 15^a (cf. v.l. 14). — ^{a}) $D_{3.4.9}$ तया (for तथा). T_2 G_2 च (for तु).

16 ^{a}) K_5 M_{3-5} अथ जगाम. — ^{b}) D_7 T_2 G_2 च (for स). — ^{d}) $G_{3.5}$ M समयं (for वचनं).

17 Before 17, $G_{3.5}$ ins. गालवः. — ^{b}) $D_{3.4.9}$ $G_{3.5}$ त्वयि (for भवान्). — ^{d}) $D_{3.4.9}$ °पतिं (for °पते).

18 ^{a}) K_3 B T_2 G_2 °दासस्तु; K_4 T_1 $G_{1.4}$ °दासोपि; $D_{3.4.9}$ °दासश्च.

Colophon missing in D_5; D_1 om. it. — *Sub-parvan:* K_{1-3} $B_{1.3}$ Dn_2 D_7 G_1 भगवद्यान, followed by गालवचरित. $B_{2.4.5}$ Dn_1 D_8 $D_{2-4.6.8-10}$ T_1 G_5 M (all om. sub-parvan name) mention only गालव-

११६

C. 5. 3981
B. 5. 118. 1
K. 5. 118. 1

नारद उवाच ।

तथैव सा श्रियं त्यक्त्वा कन्या भूत्वा यशस्विनी ।
माधवी गालवं विप्रमन्वयात्सत्यसंगरा ॥ १
गालवो विमृशन्नेव स्वकार्यगतमानसः ।
जगाम भोजनगरं द्रष्टुमौशीनरं नृपम् ॥ २
तमुवाचाथ गत्वा स नृपतिं सत्यविक्रमम् ।
इयं कन्या सुतौ द्वौ ते जनयिष्यति पार्थिवौ ॥ ३
अस्यां भवानवाप्तार्थो भविता प्रेत्य चेह च ।
सोमार्कप्रतिसंकाशौ जनयित्वा सुतौ नृप ॥ ४
शुल्कं तु सर्वधर्मज्ञ हयानां चन्द्रवर्चसाम् ।
एकतःश्यामकर्णानां देयं मह्यं चतुःशतम् ॥ ५
गुर्वर्थोऽयं समारम्भो न हयैः कृत्यमस्ति मे ।
यदि शक्यं महाराज क्रियतां मा विचार्यताम् ॥ ६
अनपत्योऽसि राजर्षे पुत्रौ जनय पार्थिव ।
पितॄन्पुत्रप्लवेन त्वमात्मानं चैव तारय ॥ ७
न पुत्रफलभोक्ता हि राजर्षे पात्यते दिवः ।
न याति नरकं घोरं यत्र गच्छन्त्यनात्मजाः ॥ ८
एतच्चान्यच्च विविधं श्रुत्वा गालवभाषितम् ।
उशीनरः प्रतिवचो ददौ तस्य नराधिपः ॥ ९
श्रुतवानस्मि ते वाक्यं यथा वदसि गालव ।
विधिस्तु बलवान्ब्रह्मन्प्रवणं हि मनो मम ॥ १०
शते द्वे तु ममाश्वानामीदृशानां द्विजोत्तम ।
इतरेषां सहस्राणि सुबहूनि चरन्ति मे ॥ ११
अहमप्येकमेवास्यां जनयिष्यामि गालव ।
पुत्रं द्विज गतं मार्गं गमिष्यामि परैरहम् ॥ १२
मूल्येनापि समं कुर्यां तवाहं द्विजसत्तम ।

चरित. — *Adhy. name:* G_5 M माधवीद्वितीयप्रदानं. — *Adhy. no.* (figures, words or both): D_6 8 (=108); D_7 T_2-G_4 $M_{1-3, 5}$ 118; T_1 $G_{1, 2, 5}$ 119; G_3 M_4 117. — *S'loka no.:* K_5 33; Dn_1 19; Dn_2 20; D_8 21.

116

1 ^{a}) B Dn Ds $D_{3, 4, 6, 8-10}$ तां; D_2 [अ]सौ (for सा). — ^{d}) K_3 B अभ्ययात्; $D_{3, 4, 9}$ M_5 अन्वगात् (for अन्वयात्). K (except K_4) G_3 सत्यसंगता; D_2 (before corr.) सत्यसंगतं; D_{10} सत्यसंग्रहा; Ca as in text.

2 ^{a}) K_1 D_8 एवं (for एव). — ^{c}) $K_{1, 2, 5}$ $D_{7, 10}$ °नगरे. — ^{d}) B_2 D_{10} उशीनरं (for औशी°). D_2 द्रष्टुं नृपमुशीनरं.

3 ^{a}) T_1 $G_{1, 4}$ स (for अथ). T_2 G_2 M [अ]भिगत्वा; G_3 [अ]भिगम्या (for [अ]थ गत्वा). G_5 संगम्य (for गत्वा स). $D_{3, 4, 9}$ M_2 च; T_1 $G_{1, 4}$ तु; G_3 अथ (for स). — ^{b}) D_1 $G_{3, 5}$ M_1 भूपतिं; D_7 नृपं तं; T $G_{1, 2, 4}$ M_1 (*sup. lin.*)$_{2, 3, 5}$ भूपते. S (except $G_{3, 4}$ M_1) सत्यविक्रम. — Before 3^{cd}, $G_{3, 5}$ ins. गालवः. — ^{d}) T_2 G_2 पार्थिव.

5 K_5 om. 5 (along with 4^{bcd}). — ^{a}) K_{1-3} $D_{2, 7}$ शुल्केन; $D_{3, 4, 9}$ शुल्कानां (for शुल्कं तु). — ^{d}) D_1 transp. देयं and मह्यं. K_2 S देहि (for देयं).

6 ^{b}) $K_{1, 2, 5}$ D_7 हि तैः (for हयैः). — ^{c}) $D_{3, 4, 9}$ यदि दास्यसि मे राजन्. — ^{d}) Dn Ds $D_{1, 6, 7}$ अविचारितं; T $G_{1, 3-5}$ M मा विचारणा; G_2 अविचारणा (for मा विचार्यताम्).

7 ^{b}) B_3 D_2 G_4 पार्थिवौ. — ^{c}) $D_{3, 4, 9}$ तेन (for पितॄन्). T_2 G_2 तेन पुत्रप्लवत्वेन. — ^{d}) T_2 G_2 ह्यात्मानं (for आत्मानं).

8 ^{a}) $D_{3, 4, 9}$ प्रजा° (for पुत्र°). — ^{d}) K_3 $B_{2, 4, 5}$ D (except $D_{2-4, 9}$) $M_{1, 3}$ यथा (for यत्र). D_1 अपुत्रकाः (for अनात्मजाः). $K_{1, 2}$ D_8 यत्र गच्छत्यनात्मजः.

9 ^{d}) K_5 द्विजस्य च (for नराधिपः).

10 ^{a}) $K_{1, 2}$ कार्यं; K_5 D_7 कामं (for वाक्यं). — K_5 om. 10^c–15^d; G_2 om. 10^{cd}. — ^{c}) K_2 विप्र (for ब्रह्मन्). — ^{d}) K_4 D_2 प्रमाणं; D_6 प्रबलं; M_2 प्रपन्नं (for प्रवणं). $D_{6, 8}$ बलं (for मनो). $B_{1, 2, 4}$ मनो हि प्रवणं मम.

11 K_5 om. 11 (cf. v.l. 10); G_2 om. 11^{cd}. — ^{d}) cf. 5. 114. 8. K_2 S transp. सुबहूनि and चरन्ति. B_2 बहूनि च (for सुबहूनि). K_1 (before corr.) वसंति; B_3 $D_{3, 4, 9}$ च संति (for चरन्ति). T_1 G_4 अपि (for मे).

12 K_5 om. 12 (cf. v.l. 10). — ^{c}) D_{2-4} पुत्रवद्विज; T_2 $G_{1, 2}$ द्विज पुत्रं (by transp.). — ^{d}) D_1 चरिष्यामि प°.

13 K_5 om. 13 (cf. v.l. 10). — ^{a}) $D_{3, 4, 9}$ मौल्ये° (for मूल्ये°). — ^{c}) $K_{1, 2}$ D_7 °पदार्थे. — ^{d}) $K_{1, 2}$ D_8 समर्थौ (for ममार्थौ). D_1 ममार्थौ नार्थतो गतः; S ममार्थौ

पौरजानपदार्थं तु ममार्थो नात्मभोगतः ॥ १३
कामतो हि धनं राजा पारक्यं यः प्रयच्छति ।
न स धर्मेण धर्मात्मन्युज्यते यशसा न च ॥ १४
सोऽहं प्रतिग्रहीष्यामि ददात्वेतां भवान्मम ।
कुमारीं देवगर्भाभामेकपुत्रभवाय मे ॥ १५
तथा तु बहु कल्याणमुक्तवन्तं नराधिपम् ।
उशीनरं द्विजश्रेष्ठो गालवः प्रत्यपूजयत् ॥ १६
उशीनरं प्रतिग्राह्य गालवः प्रययौ वनम् ।
रेमे स तां समासाद्य कृतपुण्य इव श्रियम् ॥ १७
कन्दरेषु च शैलानां नदीनां निर्झरेषु च ।
उद्यानेषु विचित्रेषु वनेषूपवनेषु च ॥ १८
हर्म्येषु रमणीयेषु प्रासादशिखरेषु च ।
वातायनविमानेषु तथा गर्भगृहेषु च ॥ १९
ततोऽस्य समये जज्ञे पुत्रो बालरविप्रभः ।
शिबिर्नाम्नाभिविख्यातो यः स पार्थिवसत्तमः ॥ २०
उपस्थाय स तं विप्रो गालवः प्रतिगृह्य च ।
कन्यां प्रयातस्तां राजन्दृष्टवान्विनतात्मजम् ॥ २१

इति श्रीमहाभारते उद्योगपर्वणि षोडशाधिकशततमोऽध्यायः ॥ ११६ ॥

११७

नारद उवाच ।
गालवं वैनतेयोऽथ प्रहसन्निदमब्रवीत् ।
दिष्ट्या कृतार्थं पश्यामि भवन्तमिह वै द्विज ॥ १
गालवस्तु वचः श्रुत्वा वैनतेयेन भाषितम् ।

C. 5. 4003
B. 5. 119. 2
K. 5. 119. 2

(G3.4 °त्मा) नात्मभोगिनः.

14 K5 om. 14 (cf. v.l. 10). — ^{a}) D7 कामात्मा (for कामतो). — ^{b}) D1 कामतो; D7 कामात्स्वं (for पारक्यं). — ^{c}) D3.4.9 (by transp.) स न; T2 G2 स च. K1.2 D1.2.7 धर्मज्ञ (for धर्मात्मन्). — ^{d}) T G2.4 श्रेय°; G3.5 मन° (for यश°). D10 S [अ]पि (for न). D10 G3.5 M3–5 वा (for च).

15 K5 om. 15 (cf. v.l. 10). — ^{b}) K2.4 B2 M एनां (for एतां). — T2 om. 15^{c}–17^{d}; G2 om. 15^{c}–17^{b}.

16 T2 G2 om. 16 (cf. v.l. 15). — ^{a}) D10 इति (for तु). K3 Dn D1 बहुधा कन्यां (for बहु कल्याणं). — ^{c}) D2 उशीनरः. B4 D5 G3 नरश्रेष्ठः; D2 द्विजश्रेष्ठं. — D8 om. 16^{d}–17^{a}. — ^{d}) D2 गालवं.

17 G2 om. 17; T2 om. 17^{ab}; D3 om. 17^{a} (cf. v.l. 15, 16). — ^{a}) K5 D7 उशीनरे प्रदायेमां. — ^{c}) M1.2 °गम्य (for °साद्य).

18 K5 om. 18^{c}–19^{d}; D6 om. 18^{cd}. — ^{c}) G3.5 च; M2 [अ]पि (for वि-).

20 D1 om. 20^{a}–21^{b} (along with 19^{cd}). — ^{a}) D5.8 अस्यां (for अस्य). — ^{c}) K3 D8 S (except G4) नामाभि(G5 °थ)विख्यातो; K4 नामेति वि°; B2 नाम्नाति°; B3 नाम तु वि°; B6 D3.4.9 नाम (B6 °म्ना) भुवि ख्यातो. — ^{d}) Dn Ds2 पार्थिवस (Dn2 °व उ)त्तम. K3 रूपवान्यः स पार्थिवः.

21 D1 om. 21^{ab} (cf. v.l. 20). — ^{a}) Dn1 S (except T2 G2) च (for स). K2 तां (for तं). — ^{b}) S तां (for च). — ^{c}) S प्रायाच्च तं (G3 प्रायच्छ तां; M2 प्रायात्य तां) (for प्रयातस्तां). — ^{d}) T G1.2 विनतासुतं (for °त्मजम्). D6 गरुडं पतगेश्वरं.

Colophon missing in D6; K5 D3.4.6 om. it. — *Sub-parvan*: K1.3 B3 D7 G1 भगवद्यान; to it all except K1 add गालवचरित. K2.4 B1.2,4.5 Dn Ds D1.2.8–10 T1 G5 M (all om. sub-parvan name) mention only गालवचरित. — *Adhy. name:* G5 M माधवीतृतीय(G5 adds here प्र)दानं. — *Adhy. no.* (figures, words or both): K3 107; D7 T2 G4 M1–3.5 119; T1 G1.2.5 120; G3 M4 118. — *S'loka no.:* Dn D8 21.

117

1 D6 om. 1^{ab}. — ^{cd}) K3 transp. कृतार्थं and भवन्तं.

2 ^{b}) K5 D7 वैनतेयस्य. — ^{c}) D7 तु; M4 तं (for तद्). — ^{d}) K5 D7 एव (for अस्य). K2 S (except G2 M1.2) हं; D3.4.9 तु (for हि).

C. 5. 4003
B. 5. 119. 2
K. 5. 119. 2

चतुर्भागावशिष्टं तदाचख्यौ कार्यमस्य हि ॥ २
सुपर्णस्त्वब्रवीदेनं गालवं पततां वरः ।
प्रयत्नस्ते न कर्तव्यो नैष संपत्स्यते तव ॥ ३
पुरा हि कन्यकुब्जे वै गाधेः सत्यवतीं सुताम् ।
भार्यार्थेऽवरयत्कन्यामृचीकस्तेन भाषितः ॥ ४
एकतःश्यामकर्णानां हयानां चन्द्रवर्चसाम् ।
भगवन्दीयतां मह्यं सहस्रमिति गालव ॥ ५
ऋचीकस्तु तथेत्युक्त्वा वरुणस्यालयं गतः ।
अश्वतीर्थे हयाँल्लब्ध्वा दत्तवान्पार्थिवाय वै ॥ ६
इष्ट्वा ते पुण्डरीकेण दत्ता राज्ञा द्विजातिषु ।
तेभ्यो द्वे द्वे शते क्रीत्वा प्राप्तास्ते पार्थिवैस्तदा ॥ ७
अपराण्यपि चत्वारि शतानि द्विजसत्तम ।
नीयमानानि संतारे हृतान्यासन्वितस्तया ।
एवं न शक्यमप्राप्यं प्राप्तुं गालव कर्हिचित् ॥ ८
इमामश्वशताभ्यां वै द्वाभ्यां तस्मै निवेदय ।
विश्वामित्राय धर्मात्मन्षड्भिरश्वशतैः सह ।
ततोऽसि गतसंमोहः कृतकृत्यो द्विजर्षभ ॥ ९
गालवस्तं तथेत्युक्त्वा सुपर्णसहितस्ततः ।
आदायाश्वांश्च कन्यां च विश्वामित्रमुपागमत् ॥ १०

गालव उवाच ।

अश्वानां काङ्क्षितार्थानां षडिमानि शतानि वै ।
शतद्वयेन कन्येयं भवता प्रतिगृह्यताम् ॥ ११
अस्यां राजर्षिभिः पुत्रा जाता वै धार्मिकास्त्रयः ।
चतुर्थं जनयत्वेकं भवानपि नरोत्तम ॥ १२
पूर्णान्येवं शतान्यष्टौ तुरगाणां भवन्तु ते ।
भवतो ह्यनृणो भूत्वा तपः कुर्यां यथासुखम् ॥ १३

नारद उवाच ।

विश्वामित्रस्तु तं दृष्ट्वा गालवं सह पक्षिणा ।
कन्यां च तां वरारोहामिदमित्यब्रवीद्वचः ॥ १४
किमियं पूर्वमेवेह न दत्ता मम गालव ।
पुत्रा ममैव चत्वारो भवेयुः कुलभावनाः ॥ १५
प्रतिगृह्णामि ते कन्यामेकपुत्रफलाय वै ।
अश्वाश्चाश्रममासाद्य तिष्ठन्तु मम सर्वशः ॥ १६
स तया रममाणोऽथ विश्वामित्रो महाद्युतिः ।

---

3 [b]) $K_{3.4}$ B D (except D_{7-9}) T_2 G_1 वदतां (for पततां). B_3 D_2 वरं. — [d]) $K_{1.2}$ $D_{3.4.8.9}$ एव (or एष).

4 [a]) B T_2 G_1 कान्यकुब्जे; D_6 G_{3-5} M कन्या°. — [c]) K_5 D_{n1} D_{s2} भार्यार्थं. K_5 D_{s2} वरयत्; D_{n1} रमयत्; $D_{3.4.9}$ T_2 G_2 वरयन् (for ऽवरयत्). K_4 भार्यार्थं वरयामास.

7 [a]) D_{10} S पौंडरीकेण; Ca as in text. — [c]) $K_{3.4}$ D_2 दत्वा; S कृत्वा (T2 हृत्वा) (for क्रीत्वा). — [d]) $K_{1-3.5}$ $B_{3.5}$ D_s $D_{2-4.7.9}$ प्राप्तास्तैः; K_4 D_n D_6 प्राप्ते तैः (for प्राप्तास्ते). K_3 पार्थिवोत्तमैः (for °वैस्तदा). B_6 D_n $D_{6.8}$ $G_{3.4}$ सदा; D_{10} त्रिभिः (for तदा).

8 [d]) K_4 T_2 $G_{2.5}$ ततस्ततः; $D_{2-4.9}$ G_3 इतस्तथा; $D_{7.10}$ T_1 G_1 इतस्ततः (for वितस्तया). — [f]) K_5 D_7 केन° (*for* कर्हि°).

9 [b]) M_1(*inf. lin.* as in text)$_{.3-5}$ अस्मै (for तस्मै). — T_2 G_2 om. 9^{c}–10^{b}. — [e]) $D_{2-4.9.10}$ $G_{3.5}$ $M_{1.2}$ ततो विगत°. — [f]) K_{3-5} B D_n D_s $D_{1-4.6-9}$ द्विजोत्तम; D_{10} भवानपि; $M_{1.2}$ द्विजर्षभः.

10 T_2 G_2 om. 10^{ab}. — [a]) $K_{1.2.5}$ B_5 D_1 T_1 G_{3-5} तु (for तं). — [b]) K_1 $D_{2-4.8.9}$ T_1 तदा; G_3 तथा (for ततः).

11 Most MSS. om. the ref. — [b]) K_1 $D_{1.2}$ G_5 ते; K_2 च; T G_{1-4} मे (for वै). — [c]) $D_{3.4.9}$ शतद्वयकृते कन्या.

12 [c]) $K_{1.2}$ जनयस्वैकं; D_{s1} $D_{9.10}$ यस्वेचं; T_2 G_2 °यित्वैकं. — [d]) K_1(before corr.)$_{.4}$ B D (except $D_{3.4.7.9}$) T_2 G_2 $M_{2.3}$ नरोत्तमं.

13 [a]) K_1 B_3 D_{n3} $D_{1.2.6}$ T_2 $G_{1.2.4}$ एव; $D_{3.4.9}$ इह (for एवं). — [b]) K_2 D_{n2} तुरंगाणां. K_5 D_8 D_{10} मे (for ते).

14 All MSS. om. the ref. — [b]) $D_{3.4.9}$ transp. सह and पक्षिणा. — [d]) D_1 इदं वचनमब्रवीत्. Ca, d.s cite इदमिति (*as* in text).

15 K_2 om. 15. — [a]) $G_{3.5}$ किमर्थं. — [b]) $D_{3.4.9}$ transp. न and मम. — [d]) S (except M_2) भवेरन्. K_5 कुलसाधनाः; $D_{3.4.7.9}$ G_2 °पावनाः.

16 [b]) K_4 B °पुत्रभवाय; G_5 °पुत्रोद्भवाय. — [d]) N (except $K_{1.2}$) चरंतु (for तिष्ठन्तु).

17 [b]) B_3 °मतिः; D_2 °मुनिः (for °द्युतिः). — K_2 om. (hapl.) 17^{c}–18^{b}. — [c]) $D_{3.4.9}$ G_3 आत्मार्थं (for

आत्मजं जनयामास माधवीपुत्रमष्टकम् ॥ १७
जातमात्रं सुतं तं च विश्वामित्रो महाद्युतिः ।
संयोज्यार्थैस्तथा धर्मैरश्वैस्तैः समयोजयत् ॥ १८
अथाष्टकः पुरं प्रायात्तदा सोमपुरप्रभम् ।
निर्यात्य कन्यां शिष्याय कौशिकोऽपि वनं ययौ ॥ १९
गालवोऽपि सुपर्णेन सह निर्यात्य दक्षिणाम् ।
मनसाभिप्रतीतेन कन्यामिदमुवाच ह ॥ २०
जातो दानपतिः पुत्रस्त्वया शूरस्तथापरः ।
सत्यधर्मरतश्चान्यो यज्वा चापि तथापरः ॥ २१
तदागच्छ वरारोहे तारितस्ते पिता सुतैः ।
चत्वारश्चैव राजानस्तथाहं च सुमध्यमे ॥ २२
गालवस्त्वभ्यनुज्ञाय सुपर्णं पन्नगाशनम् ।
पितुर्निर्यात्य तां कन्यां प्रययौ वनमेव ह ॥ २३

इति श्रीमहाभारते उद्योगपर्वणि सप्तदशाधिकशततमोऽध्यायः ॥ ११७ ॥

११८

नारद उवाच ।
स तु राजा पुनस्तस्याः कर्तुकामः स्वयंवरम् ।
उपगम्याश्रमपदं गङ्गायमुनसंगमे ॥ १
गृहीतमाल्यदामां तां रथमारोप्य माधवीम् ।
पूरुर्यदुश्च भगिनीमाश्रमे पर्यधावताम् ॥ २
नागयक्षमनुष्याणां पतत्रिमृगपक्षिणाम् ।
शैलद्रुमवनौकानामासीत्तत्र समागमः ॥ ३
नानापुरुषदेशानामीश्वरैश्च समाकुलम् ।

C. 5. 4029
B. 5. 120. 4
K. 5. 120. 4

आत्मजं). — d) D2-4.9 G3 माधव्यां पुत्रमष्टकं; T1 G1.4 पुत्रमष्टकनामकं; T2 G2 माधव्यामेकपुत्रकं.

18 K2 om. 18ab (cf. v.l. 17). — b) K3 B (except B6) Dn Ds D2.6.8.10 °मुनिः (for °द्युतिः). — c) T G1.2.4 कामैः (for धर्मैः). — d) K4.5 D2-4.7 transp. अश्वैः and तैः.

19 b) D9 G3 M (M1 *inf. lin.* as in text) तथा (for तदा).

20 c) B Dn D1.3.4.9.10 [अ]तिप्रतीतेन; D2 हि प्रती°; T2 G3-5 M [अ]भिप्रणी°; G2 [अ]पि प्रणी°; Ca. d as in text. — d) T G1.2.4 तां (for ह).

21 b) K1.2 M2-5 तथा; K5 D7 भूयः; D10 T G M1 तव (for त्वया). K1.2 तव (for तथा). D3.4.9 तथारूपस्त्वयापरः. — c) K1.2 धर्मसत्यरतः; K4 धर्मसत्यपरः; G5 सत्यधर्मपरः; Ca as in text. — d) D10 भद्रे (for चापि). K5 तव; Ca तथा (as in text).

22 a) K1.5 T2 G3.5 तथा° ; K2 अथा° (for तदा°). — c) G3.5 M भर्तार° (for चत्वार°). — d) B3-5 Dn D1.7 transp. अहं and च.

☞ In Dn2, the portion of the text from st. 23 up to st. 14 of adhy. 120 is lost on a missing fol. (96).

23 b) K1 M (except M1) पन्नगाशिनं. — After 23ab, D2-4.9 ins.:

462* गालवः प्रययौ शीघ्रं ययातिं नहुषात्मजम् ।

— c) K3 पितुर्निवेद्य; D2-4.9 तस्मै समर्प्य. Dn1 D8 transp. तां and कन्यां. — d) K3 D3.4.9 च; K4.5 D7.8 G3 हि (for ह). D10 प्रययौ तपसे वनं.

Colophon missing in Dn2 D5. — *Sub-parvan:* K3.5 B1.3 Dn1 भगवद्यान, followed by गालवचरित. K1.2.4 B2.4.5 Ds D2-4.6-10 T1 G1.2.5 M (all om. sub-parvan name) mention only गालवचरित. K5 D3.4.7.9 cont. समाप्त. — *Adhy. name:* K1.2 अष्टकोत्पत्तिः; G5 M ऋणनिर्यातनं. — *Adhy. no.* (figures, words or both): K3 G3 M4 119; D6 9(=109); D7 T2 G4 M1-3.5 120; T1 G1.2.5 121. — *S'loka no.:* K5 36; Dn1 D8 24.

118

☞ This adhy. is missing in Dn2 (cf. v.l. 5. 117. 23).

1 c) K1 G3 उपागम्य; Cs उपगम्य (as in text). — d) K1.2.5 D7 गांगयामुन°.

2 c) K4 D3.4.6.8.9 पूरोर्यदो° (for पूरुर्यदु°). — d) D3.4.9 पर्यधावत.

3 b) K4 B Dn1 Ds D1.6.8 गंधर्वैर्मृग°; D3.4.9 सिद्धानां स दिवौकसां.

C. 5. 4029
B. 5. 120. 4
K. 5. 120. 4

ऋषिभिर्ब्रह्मकल्पैश्च समन्तादावृतं वनम् ॥ ४
निर्दिश्यमानेषु तु सा वरेषु वरवर्णिनी ।
वरानुत्क्रम्य सर्वांस्तान्वनं वृतवती वरम् ॥ ५
अवतीर्य रथात्कन्या नमस्कृत्वा च बन्धुषु ।
उपगम्य वनं पुण्यं तपस्तेपे ययातिजा ॥ ६
उपवासैश्च विविधैर्दीक्षाभिर्नियमैस्तथा ।
आत्मनो लघुतां कृत्वा बभूव मृगचारिणी ॥ ७
वैडूर्याङ्कुरकल्पानि मृदूनि हरितानि च ।
चरन्ती शष्पमुख्यानि तिक्तानि मधुराणि च ॥ ८
स्रवन्तीनां च पुण्यानां सुरसानि शुचीनि च ।
पिबन्ती वारिमुख्यानि शीतानि विमलानि च ॥ ९
वनेषु मृगराजेषु सिंहविप्रोषितेषु च ।
दावाग्निविप्रमुक्तेषु शून्येषु गहनेषु च ॥ १०
चरन्ती हरिणैः सार्धं मृगीव वनचारिणी ।
चचार विपुलं धर्मं ब्रह्मचर्येण संवृता ॥ ११
ययातिरपि पूर्वेषां राज्ञां वृत्तमनुष्ठितः ।
बहुवर्षसहस्रायुरयुजत्कालधर्मणा ॥ १२
पूरुर्यदुश्च द्वौ वंशौ वर्धमानौ नरोत्तमौ ।
ताभ्यां प्रतिष्ठितो लोके परलोके च नाहुषः ॥ १३
महीयते नरपतिर्ययातिः स्वर्गमास्थितः ।
महर्षिकल्पो नृपतिः स्वर्गाग्र्यफलभुग्विभुः ॥ १४
बहुवर्षसहस्राख्ये काले बहुगुणे गते ।
राजर्षिषु निषण्णेषु महीयःसु महर्षिषु ॥ १५
अवमेने नरान्सर्वान्देवानृषिगणांस्तथा ।

---

4 K5 om. 4^{a}–5^{b}. — ^{ab}) N (mostly) °देश्यानां. D10 तदा सुरूपैर्दैवैश्च दानवैश्च तपस्विभिः. — After 4^{ab}, D3.4.9 *repeat* 1^{cd}. — ^{c}) S ऋषिभिश्च महाभागैः. — ^{d}) D2 संकुलं; T G आकुलं (for आवृतं).

5 K5 om. 5^{ab} (cf. v.l. 4). — ^{a}) K1.2 B3 T2 G3 च सा; *D2* (*by corr.*).3.4.9.10 G3.4 तदा; G5 तथा (for तु सा). — ^{d}) K2.3 B4 Dn2 D6.8 transp. वनं and वरं.

6 ^{b}) N (Dn2 missing) T2 G2 M1.2 नमस्कृत्य. — ^{c}) K (except K4) D7 दिव्यं (for पुण्यं).

7 ^{c}) D3.4 दत्वा (for कृत्वा). — ^{d}) Ds2 वनचारिणी; D8 लघु°; D10 धृत°.

8 K5 T2 om. (hapl.) 8^{a}–11^{b}. — ^{a}) K1–3 D2 वैडूर्याकर°; B D3.4.9.10 T1 G1 वैदूर्याङ्कुर°. — ^{c}) K1.2 D1 श्लक्ष्णमुख्यानि; K3 B (except B3) Dn1 D3.4.6.8–10 श्लक्ष्णशष्पाणि; D5 D7 श्लक्ष्णसस्यानि; D2 श्लक्ष्णपुष्पाणि; M तृणमुख्यानि. Cd cites श्लक्ष्णं. — ^{d}) T1 G1.2.4 स्निग्धा° (for तिक्ता°).

9 K5 T2 om. 9 (cf. v.l. 8). — ^{a}) K4 पूज्यानां; B6 G3.5 मुख्या° (for पुण्या°). — ^{b}) D10 सुश्लक्ष्णानि (for सुरसा°). K1.2 D7 शुभानि; S (T2 om.) लघू° (for शुची°). — G5 om. (hapl.) 9^{cd}. — ^{d}) D8 G2 विविधानि (for विम°).

10 K5 T2 om. 10 (cf. v.l. 8). — ^{a}) B3 °वासेषु; D10 °युक्तेषु; Ca.d °राजेषु (as in text). Cs cites मृगराजः. S (T2 om.) वनेष्वमृतकल्पेषु. — ^{b}) K4 B D3.4.6.9 व्याघ्र°; S (T5 om.) सिंहविक्रोशितेषु. Ca.d.s cite सिंहविप्रोषितेषु. — G5 om. (hapl.) 10^{cd}. — ^{c}) K3.4 B (except B2) °विप्रयुक्तेषु; S (T2 G5 om.) दवाग्नि°. Ca cites विप्रयुक्तेषु, Cd विप्रमुक्तेषु.

11 K5 T2 om. 11^{ab} (cf. v.l. 8). — ^{c}) T2 G2 विपुलान्धर्मान्.

12 ^{a}) K4 G3 सर्वे° (for पूर्वे°). — ^{b}) K1 B3 S (except T2 G2) वृत्तिम् (for वृत्तम्). — ^{c}) Dn1 D6.8 °सहस्रांते; G3.5 °सहस्राणि. — ^{d}) K1–4 D2–4.6.9 अयुज्य(K2 °व्य)त्; K6 D7 संयुक्तः; B Dn1 D6 युयुजे.

13 ^{a}) K4 D8 transp. द्वौ and वंशौ. K2 वंश्यौ; K3 Dn1 D5 D2–4.9.10 °शे; T2 G3 °शं (for °शौ). — ^{b}) K2.5 T G2 M1 वर्धयानौ; K4 °यंतौ; M3–5 °येतो. — ^{c}) D5 T1.2 (by corr.) G (except G2) प्रतिष्ठिते. — ^{d}) K3 D3.4.7.8.10 परलोकेषु; T1.2 (by corr.) G1.3.4 M (except M4) नर(M1 *sup. lin.* सुर)लोके च.

14 ^{a}) K3.4 B (except B6) Dn1 D2–4.6 T2 G1.2.4 महीपते; K5 D7 न हीयते; G3 विस्तार्यते; Ca.d as in text. — ^{c}) K (except K4) D3.4.7–9 राजर्षिः (for नृपतिः). — ^{d}) K5 स्वर्गस्य फल°.

15 ^{a}) S अथ (for बहु-). — ^{b}) K1.5 D7 G3.4.5 °गणे; K2 °तिथे (for °गुणे). — ^{c}) T1 देवर्षि° (for निषण्णे°). K5 स राजर्षिषु निविष्टेषु (hypermetric). — ^{d}) Ds2 D2 T G (except G1) M3 महीयत्सु. K4 B Dn1 D1.6.10 महर्षिषु.

16 ^{a}) D2–4.9 नृपान् (for नरान्). — ^{b}) K5 (*sup. lin.*) G2.4 सदा (for तथा).

17 D1.8 om. (hapl.) 17^{ab}. — ^{b}) K4 B1.3.4 D6

ययातिर्मूढविज्ञानो विस्मयाविष्टचेतनः ॥ १६
ततस्तं बुबुधे देवः शक्रो बलनिषूदनः ।
ते च राजर्षयः सर्वे धिग्धिगित्येवमब्रुवन् ॥ १७
विचारश्च समुत्पन्नो निरीक्ष्य नहुषात्मजम् ।
को न्वयं कस्य वा राज्ञः कथं वा स्वर्गमागतः ॥ १८
कर्मणा केन सिद्धोऽयं क्व वानेन तपश्चितम् ।
कथं वा ज्ञायते स्वर्गे केन वा ज्ञायतेऽप्युत ॥ १९

एवं विचारयन्तस्ते राजानः स्वर्गवासिनः ।
दृष्ट्वा पप्रच्छुरन्योन्यं ययातिं नृपतिं प्रति ॥ २०
विमानपालाः शतशः स्वर्गद्वाराभिरक्षिणः ।
पृष्टा आसनपालाश्च न जानीमेत्यथाब्रुवन् ॥ २१
सर्वे ते ह्यावृतज्ञाना नाभ्यजानन्त तं नृपम् ।
स मुहूर्तादथ नृपो हतौजा अभवत्तदा ॥ २२

इति श्रीमहाभारते उद्योगपर्वणि अष्टादशाधिकशततमोऽध्यायः ॥ ११८ ॥

११९

नारद उवाच ।
अथ प्रचलितः स्थानादासनाच्च परिच्युतः ।
कम्पितेनैव मनसा धर्षितः शोकवह्निना ॥ १
म्लानस्रग्भ्रष्टविज्ञानः प्रभ्रष्टमुकुटाङ्गदः ।
विघूर्णन्स्रस्तसर्वाङ्गः प्रभ्रष्टाभरणाम्बरः ॥ २
अदृश्यमानस्तान्पश्यन्नपश्यंश्च पुनः पुनः ।

C. 5. 4050
B. 5. 121. 3
K. 5. 121. 3

बलनिसूदनः; G5 M वलनिसू(G5 °षू)दनः. — d) K2.4 D7.10 एनम्; D3.4.9 एव च (for एवम्). K5 धिगिलेन-मथाब्रुवन्.

18 cd) D3.4.9 वै (for वा), and आस्थितः (for आगतः).

19 b) K1.2 B3 D7.10 T2 G2.3.5 चानेन; K5 वा तेन (for वानेन). — c) D10 केन (for कथं). S वि- (for वा). — d) K1.2.5 D7 लोके; D10 कथं (for केन). K3 B1.3 Ds D3.4.6.8.9 ज्ञायतेत्युत; K4 युज्यतेत्युत (for ज्ञायतेऽप्युत). D2 पुनः; D10 [ऽ]पि च; M (except M1) [ऽ]च्युत (for ऽप्युत).

20 b) K3.4 B Dn1 Ds D1.2.6-8 G3 राजानं. — d) T1 G1.4 नाहुषं (for नृपतिं).

21 c) K5 D2-4.9 T1 G1 पृष्टा आ(D2-4.9 पृष्टाश्चा)-सन्नपालाश्च. — d) D10 ते (for अथ). D3.4.9 न विद्म इति तेब्रुवन्; S न जानीम इति ब्रु°.

22 D6 om. 22. — a) K5 तत्; D10 [ऽ]पि (for ते). D3.4.9 च (for हि). M (except M2) सर्वे ह्यावृत-विज्ञानाः. — b) D1 नाभ्यजानंस्तथा नृपं; S ययातिं नृपतिं प्रति (= 20d). — c) B (except B2) G5 M1.4 सु- (for स). T1 G1.4 अपि; T2 G2 इव (for अथ). — d) T1 G1.4 M हृतौजाः (for ह°). K1-3.5 D2.7 M3.4 स्त्वभवत्; K4 B Dn1 Ds D6.8.10 M5 चाभवत्; D1.3.4.9 G3.5 M1.2 सोभवत् (for अभवत्). T2 G2.4 हततेजा-भवत्तदा.

Colophon missing in Dn2 D5. — *Sub-parvan:* K3.5 B1.3 D7.8 भगवद्यान; to it K3.5 D7 add ययातिपतन, B1.3.8 गालवचरित. B2.4.5 Dn1 Ds D2.6.10 T1 G1.5 M (all om. sub-parvan name) mention only गालवचरित; which in Ds D10 is followed by ययातिपतन, in G5 by उत्तरयायात. K1.2 (likewise om. sub-parvan name) mention only ययातिपतन; D3.4.9 mention only यायात. — *Adhy. name:* T1 G1 ययाति-तपोविचारणं; M ययातिमाधवीतपश्चरणं. — *Adhy. no.* (figures, words or both): D6 10 (=110); D7 T2 G4 M1-3.5 121; T1 G1.2.5 122; G3 M4 120. — *S'loka no.:* K5 17; Dn1 Ds 22.

119

☞ This adhy. is missing in Dn2 (cf. v.l. 5. 117. 23).

1 a) Ds D7-9 G5 M1-4 प्रचलित- (for °तः). — c) K3 B (except B4) Ds D2.6-8 इव (for एव). — d) B1.2.4 प्रपतिष्यन्महीतलं (=3d).

2 a) K4 म्लानश्च भ्रष्टविज्ञानः; K5 म्लानस्रग्भ्रष्ट°; Ds म्लानस्रग्भ्रष्ट°; T1 G1.4 म्लानः प्रणष्ट°; T2 G2 म्लानः प्रहृष्ट°; M3-5 म्लान(M3 °नः)प्रभ्रष्ट°. — b) D6.8 प्रभ्रष्टमुदढांगदः; D9 प्रनष्ट°; T1 G1.4 प्रणष्ट°; T2 G2 प्रहृष्ट°. S (mostly) °मकुटा°. — c) K2 विघूर्णन्ग्रस्त°; K5 Ds2 D2-4.8-10 T1 G2 M1.4 विघूर्णस्रस्त°; D7 T2 G1.5 M3 विघूर्णः स्रस्त°.

C. 5. 4010
B. 5. 121. 3
K. 5. 121. 3

शून्यः शून्येन मनसा प्रपतिष्यन्महीतलम् ॥ ३
किं मया मनसा ध्यातमशुभं धर्मदूषणम् ।
येनाहं चलितः स्थानादिति राजा व्यचिन्तयत् ॥ ४
ते तु तत्रैव राजानः सिद्धाश्चाप्सरसस्तथा ।
अपश्यन्त निरालम्बं ययातिं तं परिच्युतम् ॥ ५
अथैत्य पुरुषः कश्चित्क्षीणपुण्यनिपातकः ।
ययातिमब्रवीद्राजन्देवराजस्य शासनात् ॥ ६
अतीव मदमत्तस्त्वं न कंचिन्नावमन्यसे ।
मानेन भ्रष्टः स्वर्गस्ते नार्हस्त्वं पार्थिवात्मज ।
न च प्रज्ञायसे गच्छ पतस्वेति तमब्रवीत् ॥ ७
पतेयं सत्स्विति वचस्त्रिरुक्त्वा नहुषात्मजः ।
पतिष्यंश्चिन्तयामास गतिं गतिमतां वरः ॥ ८
एतस्मिन्नेव काले तु नैमिषे पार्थिवर्षभान् ।
चतुरोऽपश्यत नृपस्तेषां मध्ये पपात सः ॥ ९
प्रतर्दनो वसुमनाः शिबिरौशीनरोऽष्टकः ।
वाजपेयेन यज्ञेन तर्पयन्ति सुरेश्वरम् ॥ १०
तेषामध्वरजं धूमं स्वर्गद्वारमुपस्थितम् ।
ययातिरुपजिघ्रन्वै निपपात महीं प्रति ॥ ११
भूमौ स्वर्गे च संबद्धां नदीं धूममयीं नृपः ।
स गङ्गामिव गच्छन्तीमालम्ब्य जगतीपतिः ॥ १२
श्रीमत्स्ववभृथाग्र्येषु चतुर्षु प्रतिबन्धुषु ।
मध्ये निपतितो राजा लोकपालोपमेषु च ॥ १३
चतुर्षु हुतकल्पेषु राजसिंहमहाग्निषु ।
पपात मध्ये राजर्षिर्ययातिः पुण्यसंक्षये ॥ १४
तमाहुः पार्थिवाः सर्वे प्रतिमानमिव श्रियः ।
को भवान्कस्य वा बन्धुर्देशस्य नगरस्य वा ॥ १५
यक्षो वाप्यथ वा देवो गन्धर्वो राक्षसोऽपि वा ।
न हि मानुषरूपोऽसि को वार्थः काङ्क्षितस्त्वया ॥ १६

ययातिरुवाच ।

ययातिरस्मि राजर्षिः क्षीणपुण्यश्च्युतो दिवः ।
पतेयं सत्स्विति ध्यायन्भवत्सु पतितस्ततः ॥ १७

— K_5 om. 2^d–3^b. — ^{d}) $D_{3.4.9}$ °वरणांबरः.

3 K_5 om. 3^{ab} (cf. v.l. 2). — ^{b}) T $G_{1.2.4}$ अदृश्यः; G_3 न पश्यन्; M (except M_2) अदृश्यन् (for अपश्यन्). — ^{d}) K_5 [अ]पतिष्यत; S प्रापतत्स (for प्रपतिष्यन्). $K_{1.2.5}$ D_7 $G_{3.5}$ महीतले.

4 4^{ab} = (var.) 5. 111. 7^{ab}. — ^{b}) $D_{3.4.8.9}$ कर्मदूषणं; S स्वर्ग°. — ^{d}) T_1 $G_{1.3.4}$ ह्य°; T_2 G_2 M [अ]भ्य°; G_5 [अ]ध्य° (for व्य°).

5 ^{a}) D_7 तत्र (for ते तु). K_5 $D_{3.4.7.9}$ T_2 G_2 राजानं (for °नः). — ^{d}) Dn_1 D_5 $D_{6.8}$ transp. ययातिं and तं. K_5 ययातिं परितश्च्युतं.

6 ^{a}) K_5 $G_{3.5}$ अभ्येत्य; B_3 तत्रेत्य; D_2 अथान्यः; a few MSS. अथेत्य (for अथैत्य). — ^{b}) $K_{1.5}$ °पुण्यं विपाकतः; K_2 °पुण्यं निपातकं; D_6 °पुण्यं विपातकः; K_4 D_2 S °पुण्यं (D_2 °पुण्य-) निपातितं. — ^{d}) $D_{3.4.9}$ शासनं (for °नात्).

7 K_5 om. 7. — ^{b}) $K_{1.2}$ Dn_1 $D_{6.7.9}$ T_1 G_4 किंचित्; Ca कंचित् (as in text). D_2 अभिमन्यसे; D_7 इव म°; Ca अवम° (as in text). — ^{c}) G_4 transp. भ्रष्टः and स्वर्गः. $D_{3.4.9}$ नष्टः (for भ्रष्टः). $K_{1.2}$ स्वर्गाद्धि (for स्वर्गस्ते). — ^{f}) K_1 $G_{4.5}$ M_4 तपस्व (for पतस्व). D_7 एवम् (for तम्).

9 ^{b}) S नैमिशे (for नैमिषे). — ^{d}) B D (except $D_{3.4.9}$; Dn_2 missing) T_1 G_{3-5} ह (for सः).

10 B_2 om. 10–12. — ^{c}) M_1 वाजिमेधेन.

12 B_2 om. 12 (cf. v.l. 10). — ^{a}) D_8 संनद्धां; T G_2 °बाधां; G_1 M_1(*inf. lin.* as in text)$_4$ °बंधां (for °बद्धां). — ^{b}) D_{10} नावं (for नदीं). D_1 धूमयतीं; $G_{3.5}$ मूलमयीं. K (except K_5) B D (except $D_{1.2.7}$; Dn_2 missing) इव; T_2 नृप. — ^{c}) $K_{1.2}$ B_2 गंगामिव; $K_{3.4}$ Dn_1 D_5 $D_{1-4.6-8}$ गंगां गाम्; K_5 $B_{1.4.5}$ गंगे गाम्; D_{10} गंगायाम् (for स गङ्गाम्). $K_{1.2}$ B_2 च (for इव).

13 ^{a}) K_4 $D_{2.8}$ T G_2 M_4 (*inf. lin.*) Ca अवभृथाग्रेषु; G_4 °ख्येषु; M_{3-5} °त्तेषु. — ^{b}) $G_{1.4}$ प्रीतबंधुषु; $G_{3.5}$ M_1(*inf. lin.* as in text)$_{2-5}$ प्रिय°; G_2 प्रीति°; all comm. as in text. — ^{d}) $K_{2.5}$ B D (except $D_{3.4.6.9}$; Dn_2 missing) $M_{3.4}$ सः (for च). $M_{1.2}$ लोकपालसमेषु च.

14 ^{a}) K_4 हुतकालेषु; K_5 ब्रह्मकल्पेषु.

15 ^{b}) K_{3-5} B D (except D_7; Dn_2 missing) दीप्यमानमिव श्रिया (K_5 °यः). Ca. d cite प्रतिमानं (as in text). — ^{d}) K $D_{2-4.6.8}$ G_5 च (for वा).

16 ^{a}) $K_{1.2.4}$ $D_{3.4.9}$ यदि (for [अ]प्यथ). D_7 यक्षोसि यदि वा देवः; S यक्षो विद्याधरो देवः. — ^{d}) $K_{3.4}$

राजान ऊचुः ।
सत्यमेतद्भवतु ते काङ्क्षितं पुरुषर्षभ ।
सर्वेषां नः क्रतुफलं धर्मश्च प्रतिगृह्यताम् ॥ १८

ययातिरुवाच ।
नाहं प्रतिग्रहधनो ब्राह्मणः क्षत्रियो ह्यहम् ।
न च मे प्रवणा बुद्धिः परपुण्यविनाशने ॥ १९

नारद उवाच ।
एतस्मिन्नेव काले तु मृगचर्याक्रमागताम् ।
माधवीं प्रेक्ष्य राजानस्तेऽभिवाद्येदमब्रुवन् ॥ २०
किमागमनकृत्यं ते किं कुर्मः शासनं तव ।
आज्ञाप्या हि वयं सर्वे तव पुत्रास्तपोधने ॥ २१
तेषां तद्भाषितं श्रुत्वा माधवी परया मुदा ।
पितरं समुपागच्छद्ययातिं सा ववन्द च ॥ २२
दृष्ट्वा मूर्ध्ना नतान्पुत्रांस्तापसी वाक्यमब्रवीत् ।
दौहित्रास्तव राजेन्द्र मम पुत्रा न ते पराः ।
इमे त्वां तारयिष्यन्ति दिष्टमेतत्पुरातनम् ॥ २३
अहं ते दुहिता राजन्माधवी मृगचारिणी ।
मयाप्युपचितो धर्मस्ततोऽर्धं प्रतिगृह्यताम् ॥ २४
यस्माद्राजन्नराः सर्वे अपत्यफलभागिनः ।
तस्मादिच्छन्ति दौहित्रान्यथा त्वं वसुधाधिप ॥ २५
ततस्ते पार्थिवाः सर्वे शिरसा जननीं तदा ।
अभिवाद्य नमस्कृत्य मातामहमथाब्रुवन् ॥ २६
उच्चैरनुपमैः स्निग्धैः स्वरैरापूर्य मेदिनीम् ।
मातामहं नृपतयस्तारयन्तो दिवश्च्युतम् ॥ २७
अथ तस्मादुपगतो गालवोऽप्याह पार्थिवम् ।
तपसो मेऽष्टभागेन स्वर्गमारोहतां भवान् ॥ २८

C. 5. 4077
B. 5. 121. 28
K. 5. 121. 29

इति श्रीमहाभारते उद्योगपर्वणि एकोनविंशत्यधिकशततमोऽध्यायः ॥ ११९ ॥

B D (except D7. 8; Dn2 missing) कांक्ष्यते (for काङ्क्षितः).

17 T2 om. (hapl.) 17–18. — ^{b}) K D1–4. 7–9 T1 transp. च्युतः and दिवः. — ^{d}) D3. 4. 9 त्वतः; G6 त्वहं (for ततः).

18 T2 om. 18 (cf. v.l. 17). D2 राजर्षयः (for राजान ऊ°). — ^{b}) K5 D7 भरत° (for पुरुष°).

19 ^{b}) D10 [ऽ]स्मि (for हि). — ^{c}) K2. 5 D3. 4. 9 तु (for च). — ^{d}) K1. 2 °निवासने.

20 A few MSS. om. the ref. — ^{b}) D2 °समागतां; D3. 4. 9 °क्रियागतां; D10 स्वेच्छया व्यक्तिमागतां. — ^{c}) K2. 4 Ds D10 M2 प्राप्य (for प्रेक्ष्य). — ^{d}) G1. 4 om. ते. G3. 5 एवम् (for इदम्).

21 ^{b}) M3–5 शासनात् (for °नं). — ^{c}) K4 आज्ञापय; D2 आज्ञां देहि; G3 वृणीमहि (for आज्ञाप्या हि).

22 ^{a}) D3. 4. 9 वचनं (for भाषितं). — ^{c}) D2 °गम्य (for °गच्छत्). — ^{d}) D2 पार्थिवोत्तमं; T2 G2 अभिवाद्य च (for सा ववन्द च).

23 ^{a}) K4 B1. 3. 4 Dn1 Ds D6. 10 स्पृष्ट्वा (for दृष्ट्वा). K2. 4. 5 B1. 3. 4 Dn1 Ds D6. 10 मूर्धनि तान्; D1 सर्वोन्नतान्; D2–4 T2 G1. 2 मूर्धानतान् (for मूर्ध्ना नतान्). G3 तांस्तु (for पुत्रान्). — ^{d}) D2 तपस्विनः; S Ca न ते परे; Cd न ते पराः (as in text). — ^{f}) K2–4 B Dn1 Ds D2–4. 6 G1. 2. 5 M1 (*inf. lin.* as in text). 5 दृष्टम् (for दिष्टम्). K1–4 B2. 4. 5 Ds D2–4. 6. 8. 9 (and all comm.) पुरातनैः; Dn1 D1 पुरातनैः.

24 ^{d}) T2 G2. 3 M तदर्धं. G1 संप्र° (for प्रति°).

25 ^{a}) K4 तात (for राजन्). — ^{b}) B3 °भागिनश्च ये; D2 °फलहेतवः; G1 ह्यपत्यफल°.

27 ^{a}) D2 °पदैः (for °पमैः). — ^{b}) D3. 4. 9 स्वरैरमरसंनिभं. — ^{d}) T2 G2. 5 नभ° (for दिव°). — After 27, T G read 5. 120. 18, *repeating* it in its proper place (G3 reads it here only!).

28 ^{a}) D3. 4. 9 T2 G1. 2. 4 [अ]कस्मात्; T1 G3. 6 कस्मात् (for तस्मात्). — ^{c}) Ds [ऽ]पि (for मे). Ds2 अर्धं°; Ca. d. s अष्ट° (as in text). D7 तपसोष्टविभागेन. — ^{d}) T G2. 3 आरोहताद् (for °हतां).

Colophon missing in Dn2 D5. — *Sub-parvan:* B1. 3 Dn1 D7 M1. 2 भगवद्यान; to it B1. 3 Dn1 M1. 2 add गालवचरित, D7 ययातिपतन. K4 B2. 4. 5 Ds D2. 6. 10 T1 G1. 5 (all om. sub-parvan name) mention only गालवचरित; which in Ds D10 is followed by ययातिपतन. K1. 3 (likewise om. sub-parvan name) mention only ययातिपतन; D3. 4. 9 mention only यायात; D8 only ययातिपातन. — *Adhy. name:* G2. 5 M ययातिस्वर्गपतनं. — *Adhy. no.* (figures, words or both): D8 11 (=111); D7 T2 G4 M1–3. 5 122; T1 G1. 2. 6 123; G3 M4 121. — *S'loka no.:* Dn1 29; D8 30; D10 27.

१२०

C. 5. 4078
B. 5. 122. 1
K. 5. 122. 1

नारद उवाच ।
प्रत्यभिज्ञातमात्रोऽथ सद्भिस्तैर्नरपुंगवः ।
ययातिर्दिव्यसंस्थानो बभूव विगतज्वरः ॥ १
दिव्यमाल्याम्बरधरो दिव्याभरणभूषितः ।
दिव्यगन्धगुणोपेतो न पृथ्वीमस्पृशत्पदा ॥ २
ततो वसुमनाः पूर्वमुच्चैरुच्चारयन्वचः ।
ख्यातो दानपतिर्लोके व्याजहार नृपं तदा ॥ ३
प्राप्तवानस्मि यल्लोके सर्ववर्णेष्वगर्हया ।
तदप्यथ च दास्यामि तेन संयुज्यतां भवान् ॥ ४
यत्फलं दानशीलस्य क्षमाशीलस्य यत्फलम् ।
यच्च मे फलमाधाने तेन संयुज्यतां भवान् ॥ ५
ततः प्रतर्दनोऽप्याह वाक्यं क्षत्रियपुंगवः ।
यथा धर्मरतिर्नित्यं नित्यं युद्धपरायणः ॥ ६
प्राप्तवानस्मि यल्लोके क्षत्रधर्मोद्भवं यशः ।
वीरशब्दफलं चैव तेन संयुज्यतां भवान् ॥ ७
शिबिरौशीनरो धीमानुवाच मधुरां गिरम् ।
यथा बालेषु नारीषु वैहार्येषु तथैव च ॥ ८
संगरेषु निपातेषु तथापद्व्यसनेषु च ।
अनृतं नोक्तपूर्वं मे तेन सत्येन खं व्रज ॥ ९
यथा प्राणांश्च राज्यं च राजन्कर्म सुखानि च ।

120

☞ In Dn2, st. 1–14 are missing (cf v.l. 5. 117. 23).

1 ^{b}) S (except G3) सर्वैः (for सद्भिः). Dn1 T2 G1.2 °पुंगवैः. — D3.4.8.9 G3 M (see below) ins. after 1^{ab}; T G1.2.4.5, after 1^{cd}:

463* समारुरोह नृपतिरस्पृशन्वसुधातलम् ।

— K2 om. 1^{c}–2^{b}; G3 M om. 1^{cd}. — ^{c}) K5 °संस्थानात्; D10 (by corr.) °संस्थाने. — After 1, D2 ins.:

464* नारद उवाच ।
प्रत्युज्जगाम तं स्थानं देवलोकं नराधिपः ।
अवाप्य दिव्यसंस्थानं बभूव विगतज्वरः ।

2 K2 om. 2^{ab} (cf. v.l. 1). — D1 दिव्यमालांबरधरः; S दिव्यांबरधरो दिव्यः. — ^{b}) = (var.) 1. 26. 45^{b}; 76. 5^{d}. — ^{c}) S °स्रजोपेतः. — ^{d}) K1 D1.7 तदा (for पदा). D2–4.9 S पृथिवीमस्पृशन्निव (D2–4.9 G4 °न्नृपः).

3 K5 om. 3–14. — ^{ab}) D2m.3.4.9 चोच्चैर् (for पूर्वम्), and पूर्वम् (for उच्चैर्). T1 G1.4 उच्चावचं (for उच्चारयन्). — ^{d}) B3 D8 D10 M5 नृपः; D2 वचः (for नृपं).

4 K5 om. 4 (cf. v.l. 3). — ^{a}) = 7^{a}. D3.4.9 G2 यं (for यत्). — ^{b}) K4 अगर्हितं (for अगर्हया). D10 सर्ववर्णसमर्हणात्. — ^{c}) G3 दानानि; M2 तथापि (for तदपि). D8 अहं ते (for अथ च). D10 तदन्यदपि दास्यामि; T G1.2.5 तच्चाप्यहं प्रदास्यामि; G4 तदप्यहं प्रदास्यामि; M1 तच्चाहं ते च दास्यामि. — ^{d}) = 5^{d}, 7^{d}.

5 K5 Dn1 (hapl.) om. 5 (cf. v.l. 3); D1 om. (hapl.) 5–7. D2 reads 5 after 7. — ^{c}) K1.2 D8 तत् (for यत्). K1.3 D8 G3 आदाय (for आधाने). — ^{d}) = 4^{d}, 7^{d}. — After 5, T2 ins. 465*.

6 K5 D1 om. 6 (cf. v.l. 3, 5). — ^{c}) K1.2 यथा धर्मपतिर्; K4 अथ धर्मरतो; D3–4.9 G3 क्षत्रधर्मरतिर्; T1 G1.3–5 M क्षत्रधर्मरतो; T2 धर्मक्षत्ररतिर्. T2 G2.5 om. 6^{d}–7^{a}. — ^{d}) K2 B1.3 D7 यथा (for नित्यं). K2 B1.3 धर्म°; D3–4.9 यज्ञ° (for युद्ध°).

7 K5 D1 om. 7 (cf. v.l. 3, 5); T2 G2.5 om. 7^{a} (cf. v.l. 6). — 7^{a} = 4^{a}. — ^{b}) B2.4.5 Dn1 D5 D6.8.10 क्ष(D10 क्षा)त्रवंशोद्भवं. — ^{c}) D3.4.9 °परं (for °फलं). — ^{d}) = 4^{d}, 5^{d}. — After 7, D2 reads 5. D3.4.8.9 S ins. after 7 (T2, after 5):

465* यथा धर्मरतिर्नित्यं तेन सत्येन खं व्रज ।

[cf. 9^{cd}. — D3.4.8 तथा धर्मरतिर्; D9 तथा धर्मे रतिर्. G5 गीता (for नित्यं). D3.4.8.9 संप्रगम्; G3–5 खं व्रजेः (for खं व्रज)]. — Thereafter G3 reads 11.

8 K5 om. 8 (cf. v.l. 3). T2 reads 8–9 after 12. — ^{a}) K1.2 D7 T G1.2.5 [अ]पीमाम्; D3.4.9 वीरः (for धीमान्). — ^{c}) T1 transp. बालेषु and नारीषु. G2 नारीणां (for °षु). — ^{d}) T2 G1.2.5 वैवाहेषु; all comm. as in text. D3.4.9 रथे(D9 °ते)षु (for तथैव). D10 वैहार्यसमयेषु च.

9 K5 om. 9 (cf. v.l. 3). For transp. in T2 cf. v.l. 8. — ^{b}) B3 D8 M4 यथा (for तथा). D2–4.8.9 G3–5 M च व्यसनेषु; T G1.2 [अ]तिव्यस° (for [आ]पद्व्य°). — ^{d}) = 10^{d}, 11^{d}, 14^{d}.

10 K5 om. 10 (cf. v.l. 3). For transp. in T2 cf. v.l. 8. — ^{a}) D2 (by corr.), 3.4.9 अथ (for यथा).

त्यजेयं न पुनः सत्यं तेन सत्येन खं व्रज ॥ १०
यथा सत्येन मे धर्मो यथा सत्येन पावकः ।
प्रीतः शक्रश्च सत्येन तेन सत्येन खं व्रज ॥ ११
अष्टकस्त्वथ राजर्षिः कौशिको माधवीसुतः ।
अनेकशतयज्वानं वचनं प्राह धर्मवित् ॥ १२
शतशः पुण्डरीका मे गोसवाश्च चिताः प्रभो ।
क्रतवो वाजपेयाश्च तेषां फलमवाप्नुहि ॥ १३
न मे रत्नानि न धनं न तथान्ये परिच्छदाः ।
क्रतुष्वनुपयुक्तानि तेन सत्येन खं व्रज ॥ १४
यथा यथा हि जल्पन्ति दौहित्रास्तं नराधिपम् ।
तथा तथा वसुमतीं त्यक्त्वा राजा दिवं ययौ ॥ १५
एवं सर्वे समस्तास्ते राजानः सुकृतैस्तदा ।
ययातिं स्वर्गतो भ्रष्टं तारयामासुरञ्जसा ॥ १६
दौहित्राः स्वेन धर्मेण यज्ञदानकृतेन वै ।
चतुर्षु राजवंशेषु संभूताः कुलवर्धनाः ।
मातामहं महाप्राज्ञं दिवमारोपयन्त ते ॥ १७

राजान ऊचुः ।

राजधर्मगुणोपेताः सर्वधर्मगुणान्विताः ।
दौहित्रास्ते वयं राजन्दिवमारोह पार्थिव ॥ १८

C. 5. 4096
B. 5. 122. 13
K. 5. 122. 13

इति श्रीमहाभारते उद्योगपर्वणि विंशत्यधिकशततमोऽध्यायः ॥ १२० ॥

$D_{3,4,9}$ वा (for the second च). — ^{b}) $K_{1,2}$ $D_{1,3,4,7,9}$ राज्यकर्म; K_3 B_3 D_2 M राजकर्म; K_4 $B_{4,5}$ राजन्काम-; $B_{1,2}$ राजन्धर्म; T_1 $G_{1,2,4,5}$ राजधर्म-; G_6 यथा धर्म-. — ^{c}) S त्वहं (for पुनः). — ^{d}) = 9^{d}, 11^{d}, 14^{d}.

11 K_5 om. 11 (cf. v.l. 3); D_6 G_3 om. (hapl.) 11; T_1 om. (hapl.) 11–14. G_1 reads 11 (with v.l.) after 465*, and *repeats* it here. — ^{ab}) S (T_1 G_3 om.) धर्मोयं (for मे धर्मो), and मे यमः (for पावकः). — ^{c}) B Dn_1 D_5 $D_{1,10}$ प्रीतः शतक्रतुश्चैव; D_8 प्रीतः क्रतुशतैनैव. — ^{d}) = 9^{d}, 10^{d}, 14^{d}. $D_{2-4,9}$ ततो (D_2 °था) राजन्दिवं व्रज.

12 K_5 T_1 om. 12 (cf. v.l. 3, 11). — ^{c}) B_5 °यज्वा च; D_{10} °मख°; T_2 G_1 M °यज्वा तं. — ^{d}) $B_{2,4}$ Dn_1 D_5 $D_{6-8,10}$ नाहुषं (for वचनं). $B_{2,4}$ Dn_1 $D_{6,8}$ प्राप्य (for प्राह). — After 12, T_2 reads 8–9.

13 K_5 T_1 om. 13 (cf. v.l. 3, 11). — ^{a}) S (except M_5; T_1 om.) पौंडरीकाः. — ^{b}) K_4 B Dn_1 D_5 $D_{1,6,8,10}$ G_4 M_1 चरिताः; D_7 च कृताः; G_5 रचिताः (for च चिताः). K_{1-3} B_3 विभो; D_5 मम; D_{10} मया (for प्रभो). $D_{2-4,9}$ अश्वमेधा ह्यनेकशः. — ^{c}) K_4 वाजिमेधाश्च; D_{10} वाजपेयाद्याः.

14 K_5 T_1 om. 14 (cf. v.l. 3, 11). — ^{d}) = 9^{d}, 10^{d}, 11^{d}. — After 14, D_2 ins.:

466* यदि सत्यं ब्रवीम्येतत्तेन सत्येन वै व्रज ।

15 Dn_2 resumes! — ^{a}) $G_{3,5}$ M च (for हि). D_{10} यथा यथावदश्योतिः. — ^{cd}) K_1 ययौ (for गतः). D_2 तथा वसुमतीं त्यक्त्वा राजा स्वर्गं गतस्तु वै.

16 ^{a}) K_4 $B_{1,3}$ D_5 G_3 समस्तैः; D_1 समानाः; D_{10} समेताः; Ca, d समस्ताः (as in text). — ^{b}) D_{10} दौहित्राः (for राजानः).

17 D_{10} om. 17–18. — ^{a}) K_5 $D_{1-4,7,9}$ T_2 $G_{2,3,5}$ M दौहित्रास्तेन. S पुण्येन (for धर्मेण). — ^{b}) K (except K_4) $D_{2-4,7,9}$ दानयज्ञकृतेन वै (K_5 D_7 च). — ^{d}) D_1 कुलनंदनाः. — K_5 om. 17^{ef}. — ^{e}) B_5 °प्राज्ञाः (for °प्राज्ञं). — ^{f}) K_3 B_{1-3} T G M_4 °मारोपयंति ते; K_4 °मारोपयंस्तदा.

18 $D_{2,10}$ om. 18 (cf. v.l. 17). T G read 18 (for the first time) after 5. 119. 27, and *repeat* it here (in G_3 only there is no repetition). — ^{b}) S सत्यधर्मगुणान्विताः (T_1 $G_{1,4}$ °परायणाः). — ^{d}) $B_{1,2,4}$ आरोहतां भवान् (for आरोह पार्थिव).

34 ^{a}) K4 D3.4 अनुग्रहात् (for °ज्ञया). K3.5 D7.8 T G (except G2) M1.2 वा (for च). K5 अद्य; D3.4 अपि; D10 अस्य (for अथ). — ^{b}) D3.4 कुर्यात् (for ब्रूयात्). D7 वचो; T2 नरो (for नृपो). K1.2 B (except B3) Dn1 D6.8.10 M2 [ऽ]यं (for यद्). — ^{c}) D3.4.6 सुहृदां (for सुहृद्भिर्). B1.3.4 Dn1 D1 G3 नियुज्यं; B2 निशम्य; D8 नियोज्यं; T1 G4 नियोज्य.

35 ^{c}) D6 G4 M3–5 राजा (for राज्ञा). — ^{d}) K3.5 चेति (for चैव).

Colophon. Dn2 D5 missing. — *Sub-parvan:* K4 अभिनिर्याणयात्रा; D3.4 अभिनिर्यात्रा; D10 भगवदागमन; M1.2 भगवद्यान. — *Adhy. name:* G5 गांधारीवाक्यं; M गुरुवाक्यकथनं. — *Adhy no.* (figures, words or both): D6 38 (=138); T1 G2.4.5 150; T2 M 149 (M4 148); G1 151; G3 147. — *S'loka no.:* K5 37; Dn1 36.

147

☞ This adhy. is missing in Dn2 (cf. v.l. 5. 143. 2). The MS. is mostly ignored here.

1 K5 D2 T G M5 श्रीभगवान् (for वासुदेवः). — G3 om. (hapl.) 1^{d}–2^{a}. — ^{d}) K4 B Dn1 D8 D1.3.4.6.8.10 M4 राजमध्ये. B1–3 D2 जनाधिपं; Dn1 Ds2 D10 T G1.5 M3–5 जनाधिपः.

C. 5. 5041
B. 5. 149. 2
K. 5. 149. 2

तथा तत्कुरु भद्रं ते यद्यस्ति पितृगौरवम् ॥ २
सोमः प्रजापतिः पूर्वं कुरूणां वंशवर्धनः ।
सोमाद्बभूव षष्ठो वै ययातिर्नहुषात्मजः ॥ ३
तस्य पुत्रा बभूवुश्च पञ्च राजर्षिसत्तमाः ।
तेषां यदुर्महातेजा ज्येष्ठः समभवत्प्रभुः ॥ ४
पूरुर्यवीयांश्च ततो योऽस्माकं वंशवर्धनः ।
शर्मिष्ठायाः संप्रसूतो दुहितुर्वृषपर्वणः ॥ ५
यदुश्च भरतश्रेष्ठ देवयान्याः सुतोऽभवत् ।
दौहित्रस्तात शुक्रस्य काव्यस्यामिततेजसः ॥ ६
यादवानां कुलकरो बलवान्वीर्यसंमतः ।
अवमेने स तु क्षत्रं दर्पपूर्णः सुमन्दधीः ॥ ७
न चातिष्ठत्पितुः शास्त्रे बलदर्पविमोहितः ।
अवमेने च पितरं भ्रातॄंश्चाप्यपराजितः ॥ ८
पृथिव्यां चतुरन्तायां यदुरेवाभवद्बली ।
वशे कृत्वा स नृपतीनवसन्नागसाह्वये ॥ ९
तं पिता परमक्रुद्धो ययातिर्नहुषात्मजः ।
शशाप पुत्रं गान्धारे राज्याच्च व्यपरोपयत् ॥ १०
ये चैनमन्ववर्तन्त भ्रातरो बलदर्पितम् ।
शशाप तानपि क्रुद्धो ययातिस्तनयानथ ॥ ११
यवीयांसं ततः पूरुं पुत्रं स्ववशवर्तिनम् ।
राज्ये निवेशयामास विधेयं नृपसत्तमः ॥ १२
एवं ज्येष्ठोऽप्यथोत्सिक्तो न राज्यमभिजायते ।
यवीयांसोऽभिजायन्ते राज्यं वृद्धोपसेवया ॥ १३
तथैव सर्वधर्मज्ञः पितुर्मम पितामहः ।

---

2 G3 om. 2^a (cf. v.l. 1). — ^{b}) K4 D2 T2 G2. 5 यथा; T1 G1. 4 M यत्त्वा (for यत्त्वां). — ^{d}) D5 G3 मयि (for पितृ-).

3 B5 om. 3^c–5^d. — ^{c}) K4 दशमो; B (B5 om.) Dn1 D5 D1–4. 6. 8. 10 षष्ठोयं (for षष्ठो वै). — After 3, K5 ins. 537*.

4 B5 om. 4 (cf. v.l. 3). K5 om. 4^a–5^b. — ^{a}) B (B5 om.) Dn1 D5 D1. 6. 8. 10 हि (for च). — ^{c}) D5 D6. 10 °राज (for °तेजा). — D6 om. (? hapl.) from भवत्प्रभुः (in 4^d) up to संमतः (in 18^b). — ^{d}) T G सुतः (for प्रभुः). — D8 ins. after 4; K5 (which om. 4^a–5^b) ins. after 3:

537* तस्याभवंस्त्रयः पुत्रा द्रुह्योऽनुः पूरुरेव च ।

5 B5 D6 om. 5 (cf. v.l. 3, 4); K5 om. 5^{ab} (cf. v.l. 4). — ^{c}) K4 B (B5 om.) Dn1 D5 D2. 8. 10 T1 G5 शर्मिष्ठया. B2 समुद्भूतो; D3. 4 समुत्पन्नो; D7 संप्रभूतो. — ^{d}) B (B5 om.) Dn1 D5 D2. 8. 10 दुहित्रा (for °तुर्).

6 D6 om. 6 (cf. v.l. 4). — ^{a}) K B5 D1–4. 7. 9 तु (for च). B3 D3. 4 भरतश्रेष्ठः. — ^{c}) Dn1 G3 दौहित्रास्ते तु; T2 °श्चापि.

7 D6 om. 7 (cf. v.l. 4). — ^{b}) D52 बलदर्पविमोहितः (=8^b); D3. 4 बलवीर्यसमन्वितः; D8 वीर्यवान्बलसंमतः. — ^{c}) D7 गुरुं (for क्षत्रं). — ^{d}) D10 गर्वे° (for दर्पे°).

8 D6 om. 8 (cf. v.l. 4). — ^{a}) K3 नावतिष्ठत्. — ^{b}) B2 °समन्वितः. — After 8^{ab}, D8 ins.:

538* कुलक्षयं चकारासौ राज्यलोभादकारणात् ।

— ^{c}) K3 D3. 4 स (for च).

9 D6 om. 9 (cf. v.l. 4). — ^{c}) S (except G1) तु (for स). K3 D2 पृथिवीं (for नृपतीन्). — ^{d}) K4 B Dn1 D5 D1. 10 G6 न्यवसन्; G3 निवसन् (for अवसन्).

10 D6 om. 10 (cf. v.l. 4) — ^{a}) K1. 2. 5 T2 G5 तत् (for तं). — ^{c}) D3. 4 राजा (for पुत्रं). — ^{d}) D3. 4 G4 राष्ट्रात् (for राज्यात्). K4 D2 वै (for च). B Dn1 D5 D8. 10 [अ]पि व्यरोपयत्; D3. 4 G3 [अ]प्यवरो°; D9 T2 G2. 5 [अ]प्यपरो°; M (except M2) व्यवरो° (for व्यपरो°).

11 D6 om. 11 (cf. v.l. 4). — ^{a}) D5 D10 G4 अनुवर्तन्त; D7 G3 अनुवर्तंते; D9 अन्ववर्तंते. — ^{b}) K4 B1. 3. 4 D1. 3. 4. 8 बलदर्पिताः. — ^{c}) K4 B D1–4. 10 अभि-; D8 अति- (for अपि). — ^{d}) K3. 5 D8 तथा (for अथ).

12 D6 om. 12 (cf. v.l. 4); K4 om. (hapl.) 12^a–13^b. — ^{ab}) K5 G3 transp. पूरुं and पुत्रं. D1. 7 स्वं; D8 स; T1 तु; T2 G1–4 M तं (for स्व-). D1. 7 T G1–3 M वंशवर्धनं; G4 वसुवर्धनं (for -वशवर्तिनम्). G6 पुत्रं वंशविवर्धनं. — ^{d}) D8 D10 विधिवत् (for विधेयं). K2. 5 B3 Dn1 D3. 4. 7. 9 T2 G1. 2. 4 M3. 5 °सत्तम; G5 °सत्तमं.

13 D6 om. 13 (cf. v.l. 4); K4 om. 13^{ab} (cf. v.l. 12); D8 om. 13^a–14^b; G3 om. (hapl.) 13^a–17^b. — ^{b}) K3 B1. 3. 5 Dn1 D5 D2. 7. 10 अधि°; Ca. n. s अभि° (as in text). — ^{c}) K1. 2. 5 D7. 9 यवीयसो. K1. 2. 4 B1. 2. 4 Dn1 D1. 3. 4. 8. 9 T2 G2 M2 अपि (for अभि-). K (except K4) Dn1 D7. 9 -जायेत; Cn -जायन्ते (as in text).

14 D6 G3 om. 14; D8 om. 14^{ab} (cf. v.l. 4, 13).

प्रतीपः पृथिवीपालस्त्रिषु लोकेषु विश्रुतः ॥ १४
तस्य पार्थिवसिंहस्य राज्यं धर्मेण शासतः ।
त्रयः प्रजज्ञिरे पुत्रा देवकल्पा यशस्विनः ॥ १५
देवापिरभवज्ज्येष्ठो बाह्लीकस्तदनन्तरम् ।
तृतीयः शंतनुस्तात धृतिमान्मे पितामहः ॥ १६
देवापिस्तु महातेजास्त्वग्दोषी राजसत्तमः ।
धार्मिकः सत्यवादी च पितुः शुश्रूषणे रतः ॥ १७
पौरजानपदानां च संमतः साधुसत्कृतः ।
सर्वेषां बालवृद्धानां देवापिर्हृदयंगमः ॥ १८
प्राज्ञश्च सत्यसंधश्च सर्वभूतहिते रतः ।
वर्तमानः पितुः शास्त्रे ब्राह्मणानां तथैव च ॥ १९
बाह्लीकस्य प्रियो भ्राता शंतनोश्च महात्मनः ।
सौभ्रात्रं च परं तेषां सहितानां महात्मनाम् ॥ २०
अथ कालस्य पर्याये वृद्धो नृपतिसत्तमः ।
संभारानभिषेकार्थं कारयामास शास्त्रतः ।
मङ्गलानि च सर्वाणि कारयामास चाभिभूः ॥ २१
तं ब्राह्मणाश्च वृद्धाश्च पौरजानपदैः सह ।
सर्वे निवारयामासुर्देवापेरभिषेचनम् ॥ २२
स तच्छ्रुत्वा तु नृपतिरभिषेकनिवारणम् ।
अश्रुकण्ठोऽभवद्राजा पर्यशोचत चात्मजम् ॥ २३
एवं वदान्यो धर्मज्ञः सत्यसंधश्च सोऽभवत् ।
प्रियः प्रजानामपि संस्त्वग्दोषेण प्रदूषितः ॥ २४
हीनाङ्गं पृथिवीपालं नाभिनन्दन्ति देवताः ।
इति कृत्वा नृपश्रेष्ठं प्रत्यषेधन्द्विजर्षभाः ॥ २५
ततः प्रव्यथितात्मासौ पुत्रशोकसमन्वितः ।
ममार तं मृतं दृष्ट्वा देवापिः संश्रितो वनम् ॥ २६
बाह्लीको मातुलकुले त्यक्त्वा राज्यं व्यवस्थितः ।
पितृभ्रातॄन्परित्यज्य प्राप्तवान्पुरमृद्धिमत् ॥ २७

C. 5. 5067
B. 5. 149. 27
K. 5. 149. 27

— [d]) B_8 $D_{1.2}$ सर्व- (for त्रिषु).

15 D_6 G_3 om. 15 (cf. v.l. 4, 13). — [b]) S (G_3 om.) प्रजाः (for राज्यं). — [d]) K_1 महौजसः; $D_{3.4}$ मनस्विनः (for यश°).

16 D_6 G_3 om. 16 (cf. v.l. 4, 13). — [a]) K_3 पूर्वं; $B_{2.4}$ Dn_1 Ds $D_{1.8}$ G_4 श्रेष्ठः (for ज्येष्ठः). — [b]) K (except K_4) D_2 T_2 G_2 बाह्लिकस्. $B_{1.3}$ $D_{3.4}$ S (G_3 om.) तदनंतरः. — [c]) K_4 B Dn_1 Ds $D_{2-4.10}$ शांतनुस्. S (except G_4; G_3 om.) तत्र (for तात). — [d]) B_3 नः (for मे). D_9 धृतिमंतो महाबलाः.

17 D_6 om. 17; G_3 om. 17^{ab} (cf. v.l. 4, 13). — [b]) K_1 Dn_1 $D_{7.9}$ °सत्तम. — [d]) $D_{3.4}$ गुरु-; T_1 G_1 M_1 पितृ- (for पितुः).

19 [a]) K_4 $B_{1.2.4}$ Dn_1 Ds $D_{6.8.10}$ वदान्यः (for प्राज्ञश्च). — [b]) B_3 सर्वधर्मभृतां वरः.

20 [a]) K (except K_4) B (except B_5) D_2 T_2 G_{1-3} बाह्लिकस्य. — [b]) K_4 B Dn_1 Ds $D_{6.10}$ G_4 शांतनोश्च. — [c]) K_4 Ds परमं (for च परं). — [d]) $M_{1.2}$ त्रयाणां हि; M_4 संहितानां (for सहि°).

21 [cf]) $B_{1.2.4}$ Dn_1 Ds $D_{6.8-10}$ कारयामास; $B_{3.5}$ $D_{1.2}$ मंगलार्थानि (for मङ्गलानि च). $B_{1.2.4}$ Dn_1 Ds $D_{9.10}$ मंगलार्थानि; $D_{6.8}$ मंगलानि च (for कारयामास). K_{1-3} D_1 T_2 $G_{1.2}$ चाभिभुः; K_4 च प्रभुः; K_5 चाभिभो; B_{1-4} Dn_1 D_9 वै विभुः; B_5 Ds D_2 Cap वा विभुः; $D_{3.4.6.8}$ शाश्वतः; D_7 वाभिभो; D_{10} च प्रभो; Ca चातिभूः (for चाभिभूः).

22 [a]) Ds D_2 G_3 तत् (for तं). — [c]) G_2 निवेदयामासुः.

23 [a]) B_5 D_2 G_1 एतत्; D_1 तच्च (for स तत्). — [c]) S (except G_3) सास्र° (for अश्रु°). — [d]) G_3 °शोचयदात्मजं; $M_{3.5}$ °शोचत्तमात्मजं.

24 [b]) $D_{3.4}$ °संधोपि वै (for °संधश्च सो). $D_{1.3.4}$ विभुः; $D_{2.6}$ [ऽ]भिभूः (for ऽभवत्). — [c]) K_2 जनानां; K_3 द्विजानां (for प्रजानां). $K_{2.5}$ Dn_1 $D_{6.8}$ T_2 $G_{1.3}$ अपि स; K_3 लोकानां (for अपि सन्). — [d]) K_3 स; S च (for प्र-).

25 [b]) $D_{6.8}$ वै प्रजाः (for देवताः).

26 [a]) K_4 $B_{2.4.5}$ Dn_1 Ds D_{10} प्रव्यथितांगोसौ. — [c]) $K_{2.4}$ B Dn_1 $D_{1.3.4.6.8.10}$ (m as in text) निवारितं (for ममार तं). K_4 B Dn_1 Ds $D_{1-4.6.8.10}$ T_1 G_5 नृपं (for मृतं). — [d]) K_5 संस्तृतो; $D_{3.4}$ प्रस्थितो (for संश्रितो).

27 D_6 om. (hapl.) 27. — [a]) K (except K_4) $D_{2-4.9}$ T_1 $G_{1.2}$ बाह्लिको. K_4 B Ds $D_{2.9.10}$ G_3 M °कुलं. D_1 बाह्लिको मातुलं त्यक्त्वा. — [b]) K_4 Ds $D_{2-4.8.10}$ समास्थितः; B Dn_1 G_4 समाश्रितः (for व्यवस्थितः). D_1 राज्यं च समुपस्थितं. — [c]) S (except T_2 $G_{1.2}$) पितॄन् (for पितृ-). K (except K_4) D_{7-9} -भ्रातृ;

C. 5. 5087
B. 5. 149. 28
K. 5. 149. 28

बाह्लीकेन त्वनुज्ञातः शंतनुर्लोकविश्रुतः ।
पितर्युपरते राजन्राजा राज्यमकारयत् ॥ २८
तथैवाहं मतिमता परिचिन्त्येह पाण्डुना ।
ज्येष्ठः प्रभ्रंशितो राज्याद्धीनाङ्ग इति भारत ॥ २९
पाण्डुस्तु राज्यं संप्राप्तः कनीयानपि सन्नृपः ।
विनाशे तस्य पुत्राणामिदं राज्यमरिंदम ।
मय्यभागिनि राज्याय कथं त्वं राज्यमिच्छसि ॥ ३०
युधिष्ठिरो राजपुत्रो महात्मा
न्यायागतं राज्यमिदं च तस्य ।
स कौरवस्यास्य जनस्य भर्ता
प्रशासिता चैव महानुभावः ॥ ३१
स सत्यसंधः सततप्रमत्तः
शास्त्रे स्थितो बन्धुजनस्य साधुः ।
प्रियः प्रजानां सुहृदानुकम्पी
जितेन्द्रियः साधुजनस्य भर्ता ॥ ३२
क्षमा तितिक्षा दम आर्जवं च
सत्यव्रतत्वं श्रुतमप्रमादः ।
भूतानुकम्पा ह्यनुशासनं च
युधिष्ठिरे राजगुणाः समस्ताः ॥ ३३
अराजपुत्रस्त्वमनार्यवृत्तो
लुब्धस्तथा बन्धुषु पापबुद्धिः ।
क्रमागतं राज्यमिदं परेषां
हर्तुं कथं शक्ष्यसि दुर्विनीतः ॥ ३४
प्रयच्छ राज्यार्धमपेतमोहः
सवाहनं त्वं सपरिच्छदं च ।
ततोऽवशेषं तव जीवितस्य
सहानुजस्यैव भवेन्नरेन्द्र ॥ ३५

इति श्रीमहाभारते उद्योगपर्वणि सप्तचत्वारिंशदधिकशततमोऽध्यायः ॥ १४७ ॥

D5 D3.4 -भातॄन् (for -भ्रातॄन्). K (except K4) D7–9 -परित्यक्तं; D3.4 परित्यक्तः. — d) B Dn1 D5 D1.10 T1 G5 प(D1 पु)रमर्धि(B3 °मृद्धि)मत्.

28 a) K (except K4) D1–4 T2 G2 बाह्लिकेन. D3.4 S [अ]भि- (for तु). — b) K4 B Dn1 D5 D2–4.6.10 शांतनुर्.

30 a) T2 G5 पांडू राज्यं सुसंप्राप्तः. — b) D9 G1 M1.2 नृप. — d) K (except K3) D1.2.7.9 विधीयते (for अरिंदम). — e) D3.4 T1 G1.3.5 M राज्यस्य; T2 G2 राजन्य (for राज्याय). — After 30, N (Dn2 missing) ins.:

539* अराजपुत्रो ह्यस्वामी पारक्यं हर्तुमिच्छसि ।

[B Dn1 D6.8.10 परस्वं (for पारक्यं). D8 अर्हं° (for इच्छ°).]

31 a) S मनस्वी (for महात्मा). — c) K4 B2.4.5 Dn1 D5 D6.8–10 कुल° (for जन°). G3 दाता (for भर्ता). — d) T G (except G3) M1.2 चापि (for चैव).

32 a) K4 B3.5 Dn1 T1 स तथाप्र°; B1.2.4 सतताप्रमेयः; G1.4 स सदाप्रमत्तः; G3 स तदाप्र°. — b) K1.2.3 D1.2.7.9 गोप्ता; D3.4 भर्ता (for साधुः). — c) K1.2 M3–5 प्रियाणां (for प्रजानां). K1.2 D2.7 सुहृदां च रक्तो; D1.3.4 सततानुकंपी; D7 सुहृदां स रक्तो; T2 G2.3.5 सुकृतानुकंपी.

33 c) K1.2 [अ]पि (for हि). — d) D1.3.9 राज्यगुणाः. K1.2 च सर्वे (for समस्ताः).

34 a) D8 अनार्यपुत्रस्; T1 G1.4 स राजवृत्तस्; T2 G2.3.5 M3–5 स राजपुत्रस्; M1.2 न राजपुत्रस्. — b) K4 B D (except D7; Dn2 missing) T1 G5 सदा (for तथा). M1 पांडुषु (for बन्धुषु). — d) B (except B3) Dn1 D1.3.4.6.9 दुर्विनीत.

35 c) K1.2 D1.2.7 हि; K3.4 [ऽ]स्ति (for ऽव-). — d) K D2.7.8 अद्य; D3.4 G4 इह (for एव).

Colophon. Dn2 D5 missing. — *Sub-parvan:* K4 अभिनिर्यात्रा; T1 M1.3–5 भगवद्यान (T1 °वत्प्रतियान). — *Adhy. name:* Dn1 कृष्णवाक्यं; G1.4 सभायां सभ्यवृत्तान्तकथनं; G5 M धृतराष्ट्रवाक्यं (G5 °ष्ट्रवचनं). — *Adhy. no.* (figures, words or both): D6 39 (=139); T1 G2.4.5 151; T2 M 150 (M4 149); G1 152; G3 148. — *S'loka no.:* K5 Dn1 36.

१४८

वासुदेव उवाच ।
एवमुक्ते तु भीष्मेण द्रोणेन विदुरेण च ।
गान्धार्या धृतराष्ट्रेण न च मन्दोऽन्वबुध्यत ॥ १
अवधूयोत्थितः क्रुद्धो रोषात्संरक्तलोचनः ।
अन्वद्रवन्त तं पश्चाद्राजानस्त्यक्तजीविताः ॥ २
आज्ञापयच्च राज्ञस्तान्पार्थिवान्दुष्टचेतसः ।
प्रयाध्वं वै कुरुक्षेत्रं पुष्योऽद्येति पुनः पुनः ॥ ३
ततस्ते पृथिवीपालाः प्रययुः सहसैनिकाः ।
भीष्मं सेनापतिं कृत्वा संहृष्टाः कालचोदिताः ॥ ४
अक्षौहिण्यो दशैका च पार्थिवानां समागताः ।
तासां प्रमुखतो भीष्मस्तालकेतुर्व्यरोचत ।
यदत्र युक्तं प्राप्तं च तद्विधत्स्व विशां पते ॥ ५
उक्तं भीष्मेण यद्वाक्यं द्रोणेन विदुरेण च ।
गान्धार्या धृतराष्ट्रेण समक्षं मम भारत ।
एतत्ते कथितं राजन्यद्वृत्तं कुरुसंसदि ॥ ६
साम आदौ प्रयुक्तं मे राजन्सौभ्रात्रमिच्छता ।
अभेदात्कुरुवंशस्य प्रजानां च विवृद्धये ॥ ७
पुनर्भेदश्च मे युक्तो यदा साम न गृह्यते ।
कर्मानुकीर्तनं चैव देवमानुषसंहितम् ॥ ८
यदा नाद्रियते वाक्यं सामपूर्वं सुयोधनः ।
तदा मया समानीय भेदिताः सर्वपार्थिवाः ॥ ९
अद्भुतानि च घोराणि दारुणानि च भारत ।
अमानुषाणि कर्माणि दर्शितानि च मे विभो ॥ १०
भर्त्सयित्वा तु राज्ञस्तांस्तृणीकृत्य सुयोधनम् ।

C. 5. 5088
B. 5. 150. 12
K. 5. 150. 12

148

☞ This adhy. is missing in Dn_2 (cf. v.l. 5. 143. 2). The MS. is mostly ignored here.

1 K_4 D_2 T G श्रीभगवान्; K_5 कृष्णः (for वासुदेवः). — ^{a}) $K_{1.2.4}$ Ds_2 $D_{1-4.7}$ G_4 उक्तः (for उक्ते). $K_{1.2.4}$ $D_{1.2.7}$ स (for तु). — ^{d}) $B_{3.4}$ Dn_1 Ds $D_{3.4.6.8.9}$ न वै; D_{10} नैव (for न च). $D_{6.8.9}$ [ऽ]नु°; D_7 M_1 ऽय° (for ऽन्व°).

2 ^{ab}) B Dn_1 Ds $D_{1.3.4.6.8-10}$ मंदः क्रोध- (B_3 क्रोधात्); M_{3-5} क्रुद्धो रोष- (for क्रुद्धो रोषात्). — ^{cd}) K_3 T_1 $G_{1.4}$ M अन्वाद्रवंत; B_3 अन्ववर्तंत; Ds अनुद्रवंत; D_8 अन्वद्रवन् (for अन्वद्रवन्त). D_8 ततः (for तं). T_2 G_5 transp. तं पश्चात् and राजानः.

3 ^{a}) G_5 आज्ञापयत. D_1 च (for तान्). — ^{b}) Ds_2 T G (except G_3) पार्थिवो. K_4 B Dn_1 Ds $D_{3.4.6.8-10}$ नष्ट°; D_1 T $G_{1.2.5}$ °चेतनः. — ^{c}) T_1 $G_{1.3.4}$ प्रयात; T_2 $G_{2.5}$ प्रयांतु; Ca प्रयाध्वं (as in text). — ^{d}) K_2m.$_{3.5}$ युद्धायेति; $D_{1.8}$ पुष्पोभ्येति; S अद्यैवेति; Ca as in text.

4 ^{c}) $D_{3.4}$ चक्रुः (for कृत्वा). — ^{d}) S प्र° (for सं°). $K_{2.3.5}$ $D_{7.9}$ कालनोदिताः; K_4 °कर्मणा; D_1 °धर्मणा.

5 ^{a}) Some S MSS. अक्षोहिण्यः. — ^{b}) K_4 B D (except $D_{1.2.7}$; Dn_2 missing) कौरवाणां (for पार्थि°). — ^{d}) K_3 विरोचनः; B (except B_3) ऽप्यराजत; D_9 ऽप्यरोचयत्. — D_6 om. (hapl.) 5^{e}–6^{d}. — 6^{ef} = (var.) 18^{cd}. — ^{e}) $D_{3.4}$ भवति (for प्राप्तं च). — ^{f}) B_3 महामते (for विशां पते).

7 ^{a}) $K_{1.2.4}$ $B_{1.2.4.5}$ Dn_1 $D_{1.2.6.8}$ साम्यम्; K_3 शमम्; K_5 समम्; B_3 Ds $D_{3.4.9}$ शाम्यम्; D_{10} सांत्वम्; T_1 सामम् (for साम as in D_7 T_2 G M). T_2 $G_{1.2.4.5}$ चादौ; G_3 -भेदौ (for आदौ). — ^{b}) M इच्छतः (for °ता). — ^{c}) K_4 B Dn_1 Ds $D_{6.8.9}$ अभेदायास्य वं°; D_{10} अभेदाच्चास्य वं°. — ^{d}) K_{1-3} $D_{3.4.7}$ चाभिवृ°; $K_{4.5}$ $D_{1.2}$ अभिवृ°; B_3 चापि वृ° (for च विवृ°).

8 ^{a}) B_3 वोक्तो; $D_{3.4}$ ह्युक्तो; $Ca.s$ युक्तो (as in text). — ^{b}) B_3 शाम्ये; $D_{3.4}$ साम्ना (for साम). K_3 युज्य° (for गृह्य°). — ^{c}) $K_{1.2}$ D_6 °कीर्तितं; Cs °कीर्तनं (as in text). — ^{d}) K (except K_5) D_9 $G_{3.4}$ $Ca.s$ दैव°.

9 $G_{2.5}$ om. (hapl.) 9^{c}–11^{b}; T_2 reads the lines in marg.

10 $G_{2.5}$ om. 10 (cf. v.l. 9). — ^{a}) D_7 अत्यद्भुतानि (for अद्भुतानि च). Ca cites अद्भुतानि (as in text). D_1 च सर्वाणि; $D_{3.4}$ विचित्राणि (for च घोराणि). Cs cites घोराणि (as in text). — ^{d}) K_4 $B_{2.4.5}$ Dn_1 Ds $D_{6.8-10}$ मया (for च मे). K_4 प्रभो; Ds_1 [अ]भिभो (for विभो).

11 $G_{2.5}$ om. 11^{ab} (cf. v.l. 9). — ^{a}) K_2 B Dn_1

C. 5. 5088
B. 5. 150. 12
K. 5. 150. 12

राधेयं भीषयित्वा च सौबलं च पुनः पुनः ॥ ११
न्यूनतां धार्तराष्ट्राणां निन्दां चैव पुनः पुनः ।
भेदयित्वा नृपान्सर्वान्वाग्भिर्मन्त्रेण चासकृत् ॥ १२
पुनः सामाभिसंयुक्तं संप्रदानमथाब्रुवम् ।
अभेदात्कुरुवंशस्य कार्ययोगात्तथैव च ॥ १३
ते बाला धृतराष्ट्रस्य भीष्मस्य विदुरस्य च ।
तिष्ठेयुः पाण्डवाः सर्वे हित्वा मानमधश्चराः ॥ १४
प्रयच्छन्तु च ते राज्यमनीशास्ते भवन्तु च ।
यथाह राजा गाङ्गेयो विदुरश्च तथास्तु तत् ॥ १५
सर्वं भवतु ते राज्यं पञ्च ग्रामान्विसर्जय ।
अवश्यं भरणीया हि पितुस्ते राजसत्तम ॥ १६
एवमुक्तस्तु दुष्टात्मा नैव भावं व्यमुञ्चत ।
दण्डं चतुर्थं पश्यामि तेषु पापेषु नान्यथा ॥ १७
निर्याताश्च विनाशाय कुरुक्षेत्रं नराधिपाः ।
एतत्ते कथितं सर्वं यद्वृत्तं कुरुसंसदि ॥ १८
न ते राज्यं प्रयच्छन्ति विना युद्धेन पाण्डव ।
विनाशहेतवः सर्वे प्रत्युपस्थितमृत्यवः ॥ १९

इति श्रीमहाभारते उद्योगपर्वणि अष्टचत्वारिंशदधिकशततमोऽध्यायः ॥ १४८ ॥ समाप्तं कर्णोपनिवादपर्व ॥

१४९

वैशंपायन उवाच ।
जनार्दनवचः श्रुत्वा धर्मराजो युधिष्ठिरः ।
भ्रातॄनुवाच धर्मात्मा समक्षं केशवस्य ह ॥ १
श्रुतं भवद्भिर्यद्वृत्तं सभायां कुरुसंसदि ।

D8 D3.4.6.8–10 M4 निर्भर्त्सयित्वा; D1 दर्शयित्वा च (for भर्त्सयित्वा तु). K3–5 D2 G3 च (for तु). — c) B4 भर्त्स° (for भीष°).

12 G4 om. (hapl.) 12ab. — a) B Dn1 D8 D6.9.10 द्यूततो (for न्यूनतां). D3.4 धूत°. — b) D3.4 निंद्य (for निन्दां). B Dn1 D8 D6.8–10 कृत्वा (for चैव). K4 B3–5 Dn1 D8 D1.2.6.8–10 तथा पुनः (for पुनः पुनः). — c) G5 च तान् (for नृपान्).

13 a) K (except K6) D7 °भियुक्तं च; G6 M1.2 °विसंयुक्तं. — b) D3.4 तथाब्रुवं; M3–5 अन्वब्रुवं (for अथाब्रुवम्).

14 a) K4 B Dn1 D8 D1.2.6.8–10 ते शूरा; D7 वचने (for ते बाला). — c) M वाक्ये (M3.4 सर्वे also). — d) D8 जित्वा; G3.4 भि° (for हि°).

15 a) D3.4 संप्रयच्छंतु ते राज्यं. — D7 om. (hapl.) 15b–16a. — b) D1.2 च; D3.4 ये; G3 तु (for ते). B3 D8 D1.3.4.10 भवंति (for भवन्तु). K4 D2 वै; B3 D8 D3.4 उत; D1.10 S ते (for च). — c) D8 राजन् (for राजा). — d) B (except B3) D8 D6.8–10 हितं तव; Dn1 हितं वचः (for तथास्तु तत्).

16 D7 om. 16a (cf. v.l. 15). — b) D1 विहाय वै (for विसर्जय). — c) K1–3 D2–4 अवश्य-. — d) K4 D2 भरतर्षभ; D1 पांडवर्षभाः (for राज°).

17 a) B4.5 Dn1 D8 D3.4.6.8.10 °मुक्तोपि; D1 °मुक्तः स. — b) K1 नैष; D2–4 T2 G1.2.4 नैवं (for नैव). K4 B Dn1 D8 D1.6.8–10 G4 भागं; D7 शाठ्यं (for भावं). — c) D3.4 सोहं (for दण्डं).

18 b) K1.2.5 D3.4.7 M3–5 जनाधिपाः; D1 T2 G2.5 नरर्षभ (T2 °भाः). — 18cd = (var.) 6ef. — c) B2.4.5 Dn1 D8 D6.8–10 राजन्; D1 पूर्वं (for सर्वं).

19 b) K1.2 D6–9 पार्थिव; K3.5 M3.5 पार्थिवाः; Dn1 पार्थिवः (for पाण्डव).

Colophon. Dn2 D5 missing. — *Sub-parvan*: K4 अभिनिर्याणयात्रा; T1 G1.2.4 M भगवद्यान (T1 G1.4 °वत्प्रतियान), to which M1.2 add समाप्त. — *Adhy. name*: K1.2 वासुदेववाक्यं (followed by समाप्तं); K4 भगवन्निवेदनः; D8 कृष्णवाक्यं; T1 दुर्योधनाभिप्रायः; G1.4 सभ्य(G4 सत्य)वृत्तान्तकथने दुर्योधनाभिप्रायः; G5 भगवद्वचनं; M भगवच्चेष्टितकथनं. — *Adhy. no.* (figures, words or both): D6 40 (=140); T1 G2.4.5 152; T2 M 151 (M4 150); G1 153; G3 159. — *S'loka no.*: K5 Dn1 20.

After adhy. 148, T1 reads adhy. 151.

149

☞ This adhy. is missing in Dn2 (cf. v.l. 5. 143. 2); the MS. is mostly ignored here.

1 c) D9 T2 धर्मज्ञः (T2 also धर्मात्मा as in text). — d) B (except B3) D8 D6.8–10 समक्षे. K5 B3

केशवस्यापि यद्वाक्यं तत्सर्वमवधारितम् ॥ २
तस्मात्सेनाविभागं मे कुरुध्वं नरसत्तमाः ।
अक्षौहिण्यस्तु सप्तैताः समेता विजयाय वै ॥ ३
तासां मे पतयः सप्त विख्यातास्तान्निबोधत ।
द्रुपदश्च विराटश्च धृष्टद्युम्नशिखण्डिनौ ॥ ४
सात्यकिश्चेकितानश्च भीमसेनश्च वीर्यवान् ।
एते सेनाप्रणेतारो वीराः सर्वे तनुत्यजः ॥ ५
सर्वे वेदविदः शूराः सर्वे सुचरितव्रताः ।
ह्रीमन्तो नीतिमन्तश्च सर्वे युद्धविशारदाः ।
इष्वस्त्रकुशलाश्चैव तथा सर्वास्त्रयोधिनः ॥ ६
सप्तानामपि यो नेता सेनानां प्रविभागवित् ।
यः सहेत रणे भीष्मं शरार्चिःपावकोपमम् ॥ ७
त्वं तावत्सहदेवात्र प्रब्रूहि कुरुनन्दन ।
स्वमतं पुरुषव्याघ्र को नः सेनापतिः क्षमः ॥ ८

सहदेव उवाच ।

संयुक्त एकदुःखश्च वीर्यवांश्च महीपतिः ।
यं समाश्रित्य धर्मज्ञं स्वमंशमनुयुञ्ज्महे ॥ ९
मत्स्यो विराटो बलवान्कृतास्त्रो युद्धदुर्मदः ।
प्रसहिष्यति संग्रामे भीष्मं तांश्च महारथान् ॥ १०

वैशंपायन उवाच ।

तथोक्ते सहदेवेन वाक्ये वाक्यविशारदः ।
नकुलोऽनन्तरं तस्मादिदं वचनमाददे ॥ ११
वयसा शास्त्रतो धैर्यात्कुलेनाभिजनेन च ।
ह्रीमान्कुलान्वितः श्रीमान्सर्वशास्त्रविशारदः ॥ १२
वेद चास्त्रं भरद्वाजाद्दुर्धर्षः सत्यसंगरः ।
यो नित्यं स्पर्धते द्रोणं भीष्मं चैव महाबलम् ॥ १३ C. 5. 5110 B. 5. 151. 13 K. 5. 151. 13

D8 D7 च; D8 हि (for ह). T2 G2 कुंतीपुत्रो युधिष्ठिरः; G5 कौंतेयो जनमेजय.

2 D1 om. 2^{c}–3^{d}. — c) D2 न ते राज्यं प्रयच्छंति. — d) K1 सर्वं तद् (by transp.).

3 D1 om. 3 (cf. v.l. 2). — b) Dn1 T1 G1.4 नृप°; D3.4 कुरु° (for नर°). — c) Some MSS. अक्षोहिण्यः. K5 B (except B3) च (for तु). T1 G1.4 इमाः (for एताः). — d) T1 G2 समंताद् (for समेता).

4 a) K4 B Dn1 Ds D3.4.6.7.9.10 ये; M3–5 वै (for मे). — b) D3 G5 तन् (for तान्). — c) B3 विराटश्च द्रुपदश्च (by transp.).

5 b) G3 सहदेव° (for भीमसेन°). — c) K1.2 T1 M (except M4) सर्वे (for सेना-). — d) D3.4 धीराः (for वीराः).

6 D6 om. 6. — 6^{ab} = 5. 196. 3^{ab}. — b) S (except M1) च (for सु-). — c) B (except B3) नीतिशास्त्रज्ञाः. — d) D3.4 M3–5 सर्वे शास्त्र°; T G M1.2 सर्व(G4 नीति)शास्त्र° (for सर्वे युद्ध°). — e) K1 B D (except D2.7; Dn2 missing) सर्वे (for चैव). — f) K3 धर्मास्त्रकोविदाः; D2 सर्वेस्त्रयोधिनः; D3.4 शस्त्रास्त्र°; G5 सर्वास्त्रकोविदाः.

7 a) K4 अधिपो; T1 G1.3.4 अपि को (for अपि यो). — b) K1.2 सेनायाः; K3 सैन्यानां; K4 सेनानीः (for सेनानां). Dn1 D8 सेनां प्रति विभा°; D6 सेनानां प्रतिभा°. — d) T1 G (except G2) शरार्चिं. D6 पावकोपमः.

8 a) K3 B Dn1 D1.2.6.8–10 T G2.5 तं (for त्वं). — d) D3.4 नु (for नः).

9 a) K3 एष; Ds D1 T G M1.4 (*inf. lin.*) एव (for एक-). T G M1 पुत्रै° (for -दुःख°). Ca एकदुःखः (as in text). — b) S कोश° (for वीर्य°). — Ds om. 9^{c}–11^{b}. — d) K1 D3.4 G2 °युंक्ष्महे; Dn1 M4.5 °युञ्जहे; D1.6.8.10 G3 °युज्महे; T2 °भुञ्जहे; M2.3 °युग्महे.

10 Ds om. 10 (cf. v.l. 9). — a) S (except T1 G1 M5) मात्स्यो. — Dn1 om. 10^{b}–11^{a}. — c) D3.4 स प्रशक्ष्यति सं°.

☞ The fragm. MS. D9 ends with 10^{b}; it is almost completely ignored hereafter!

11 Ds om. 11^{ab} (cf. v.l. 9); Dn1 om. 11^{a} (cf. v.l. 10). — b) G4 वाक्यं (for वाक्ये). B1.3.4 °विशारद. — D6 om. (hapl.) 11^{c}–12^{d}. — c) Ds °नंतरस्. — d) B2.3.5 अब्रवीत् (for आददे).

12 D6 om. 12 (cf. v.l. 11). Before 12, T2 G5 ins. नकुलः. — a) M3–5 वचसा (for वयसा). D1 शास्त्रतो धर्मात्; D2 वै ततो धैर्यात्; D3.4 अस्त्रप्रतापेन. — b) D3.4 बलेन; Ca. s कुलेन (as in text). D3.4 सः; Ca च (as in text). — c) K4 किलोचितः; B Dn1 D8 D1.3.4.10 G5 बलान्वितः (for कुला°). — d) S °शस्त्रभृतां वरः.

13 a) K1.2 शस्त्रं; K3–5 B Ds D1–4.7.8 T G2–4 M1 शास्त्रं (for चास्त्रं). — cd) D1 transp. द्रोणं and भीष्मं. B3 D1.3.4 °रथं; D10 G2 °बलः (for °बलम्).

14 a) B Ds D10 °वंश° (for °संध°). — T2 om.

C. 5. 5111 B. 5. 151. 14 K. 5. 151. 14

श्लाघ्यः पार्थिवसंघस्य प्रमुखे वाहिनीपतिः ।
पुत्रपौत्रैः परिवृतः शतशाख इव द्रुमः ॥ १४
यस्तताप तपो घोरं सदारः पृथिवीपतिः ।
रोषाद्द्रोणविनाशाय वीरः समितिशोभनः ॥ १५
पितेवास्मान्समाधत्ते यः सदा पार्थिवर्षभः ।
श्वशुरो द्रुपदोऽस्माकं सेनामग्रे प्रकर्षतु ॥ १६
स द्रोणभीष्मावायान्तौ सहेदिति मतिर्मम ।
स हि दिव्यास्त्रविद्राजा सखा चाङ्गिरसो नृपः ॥ १७
माद्रीसुताभ्यामुक्ते तु स्वमते कुरुनन्दनः ।
वासविर्वासवसमः सव्यसाच्यब्रवीद्वचः ॥ १८
योऽयं तपःप्रभावेन ऋषिसंतोषणेन च ।
दिव्यः पुरुष उत्पन्नो ज्वालावर्णो महाबलः ॥ १९
धनुष्मान्कवची खड्गी रथमारुह्य दंशितः ।
दिव्यैर्हयवरैर्युक्तमग्निकुण्डात्समुत्थितः ॥ २०
गर्जन्निव महामेघो रथघोषेण वीर्यवान् ।
सिंहसंहननो वीरः सिंहविक्रान्तविक्रमः ॥ २१
सिंहोरस्को महाबाहुः सिंहवक्षा महाबलः ।
सिंहप्रगर्जनो वीरः सिंहस्कन्धो महाद्युतिः ॥ २२
सुभ्रूः सुदंष्ट्रः सुहनुः सुबाहुः सुमुखोऽकृशः ।
सुजत्रुः सुविशालाक्षः सुपादः सुप्रतिष्ठितः ॥ २३
अभेद्यः सर्वशस्त्राणां प्रभिन्न इव वारणः ।
जज्ञे द्रोणविनाशाय सत्यवादी जितेन्द्रियः ॥ २४
धृष्टद्युम्नमहं मन्ये सहेद्भीष्मस्य सायकान् ।
वज्राशनिसमस्पर्शान्दीप्तास्यानुरगानिव ॥ २५
यमदूतसमान्वेगे निपाते पावकोपमान् ।
रामेणाजौ विषहितान्वज्रनिष्पेषदारुणान् ॥ २६

14^{cd}; G2 om. (hapl.) from 14^{c}–15^{b}.

15 G2 om. 15^{ab} (cf. v.l. 14); T2 reads it in marg. — ^{b}) K3 शरदः (for सदारः). — ^{d}) K4 D3.4 M धीरः (for वीरः).

16 ^{a}) K3 शिवेन; K5 हितेन (for पितेव). B5 Dn1 Ds D6.10 समाधत्त; T1 G4.5 समादत्ते; M4 सदायत्ते (for समाधत्ते). — ^{b}) M3–5 यत्तदा (for यः सदा). B5 D3.4 पार्थिवर्षभ; M2 पार्थिवेश्वरः. — ^{c}) M3.4.5 (before corr.) चतुरो (for श्वशुरो). — ^{d}) D3.4 प्रहर्षयन् (for प्रकर्षतु). B Dn1 Ds D6.8.10 सेनामं (Ds °ग्रं) संप्रकर्षतु; D2 सेनाग्रमपकर्षतु. Ca cites संप्रकर्षतु.

17 ^{a}) B1–3 भीष्मद्रोणौ (by transp.). K4 B2.5 Dn1 D1.6–8 M2 आयातौ. T1 G1.4 द्रोणभीष्मौ समायां (G1 °या)तौ. — ^{b}) B1.3 D3.4 सहेतेति. — ^{d}) Dn1 तु; G3 यो; M3.5 वा (for च). K2.5 Ds2 नृप.

18 ^{a}) B2.5 [ऽ]पि (for तु). — ^{b}) Ds स्वमतिं. K1.3.4 B3 Dn1 D2.7 T1 G2–4 कुरुनंदन. D3.4 स्वयं मेघ इवानदत्. — ^{d}) S इदं (for वचः).

19 Before 19, D1 T2 G5 ins. अर्जुनः. — ^{d}) K1 D7 ज्वालासंस्थो. B4.5 Dn1 Ds D6.8.10 महाभुजः; D1 °प्रभः.

20 ^{b}) Some S MSS. दंसितः. — ^{c}) T2 G M5 दिव्यं (for दिव्यैर्). Ds ह्यैर् (for हय-). K4 B3 Ds D10 युक्तैः; D1.7 युक्तः (for युक्तम्). — ^{d}) K5 अग्निकुंड; D1 ह्यग्निकुंडात्; D7 चाग्निकुंडात्.

21 ^{a}) K5 °घोरं; D2 °वेगो (for °मेघो). — D1 om. (hapl.) 21^{c}–22^{b}. — ^{c}) T1 G1.4 °संहननोपेतः. — ^{d}) K1–3 D7 सिंहविक्रमविक्रमः; K4.5 (which transp. 21^{d} and 22^{d}) B Dn1 Ds D2–4.6.8.10 सिंहतुल्यपराक्रमः.

22 D1 G2 (hapl.) om. 22^{ab} (for D1 cf. v.l. 21). K5 reads 22 (transposing ^{ab} and ^{cd}) after 23^{ab}; so that the sequence is: 21, 23^{ab}, 22^{cd}, 22^{ab}, 23^{cd} etc. — ^{a}) K5 G3 सिंहस्कंधो (for सिंहो°). B Dn1 Ds D6.8.10 सिंहभुजः (for महा°). — T2 om. (hapl.) 22^{bc}. — ^{b}) B3 °वर्चा (for °वक्षा). K5 D2 °भुजः (for °बलः). — ^{c}) K1 D7 °प्रनर्दनो; K2.3 °प्रतर्दनो; T1 G °वद्गर्जितो (G3 °प्रगल्भनो). K5 सुदंष्ट्रः सुनखाकेशाः. — ^{d}) K1.2.4.5 (which latter transp. 21^{d} and 22^{d}) D2.7 °दर्पो (for °स्कन्धो).

23 ^{a}) Some MSS. सुभ्रुः. K5 (hypermetric!) सुकपोलः (for सुदंष्ट्रः). K5 D1.3.4 S सुबलः; Ca °हनुः (as in text). — ^{b}) Dn1 D6.8 सुवासाः (for °बाहुः). B3 M5 सुमुखः कृशः. — After 23^{ab}, K5 reads 22 (transposing ^{ab} and ^{cd}). — ^{c}) D1 अशत्रुः; Ca सुजत्रुः (as in text). — ^{d}) K5 सुवर्णः; D1 °नासः (for °पादः).

24 ^{a}) D7 अभिज्ञः. Ds सर्वशत्रूणां. — ^{d}) D2 °वाग्यो जितेंद्रियः; T1 G1.4 °वाग्निविजि°.

25 After 25^{ab}, D3 reads 26^{cd}. — ^{c}) K1.2.4 D2.7 °समान्घोरान्. K5 om. (hapl.) 25^{d}–28^{c}. — ^{d}) Dn1 दीप्तांस्तान्. K4 उरगोपमान्.

26 K5 om. 26 (cf. v.l. 25). — ^{d}) S °गौरवान्.

27 K5 om. 27 (cf. v.l. 25). — ^{c}) K4 D3.4.8 °द्युम्नादृते.

पुरुषं तं न पश्यामि यः सहेत महाव्रतम् ।
धृष्टद्युम्नमृते राजन्निति मे धीयते मतिः ॥ २७
क्षिप्रहस्तश्चित्रयोधी मतः सेनापतिर्मम ।
अभेद्यकवचः श्रीमान्मातङ्ग इव यूथपः ॥ २८

भीम उवाच ।

वधार्थं यः समुत्पन्नः शिखण्डी द्रुपदात्मजः ।
वदन्ति सिद्धा राजेन्द्र ऋषयश्च समागताः ॥ २९
यस्य संग्राममध्येषु दिव्यमस्त्रं विकुर्वतः ।
रूपं द्रक्ष्यन्ति पुरुषा रामस्येव महात्मनः ॥ ३०
न तं युद्धेषु पश्यामि यो विभिन्द्याच्छिखण्डिनम् ।
शस्त्रेण समरे राजन्संनद्धं स्यन्दने स्थितम् ॥ ३१
द्वैरथे विषहेन्नान्यो भीष्मं राजन्महाव्रतम् ।
शिखण्डिनमृते वीरं स मे सेनापतिर्मतः ॥ ३२

युधिष्ठिर उवाच ।

सर्वस्य जगतस्तात सारासारं बलाबलम् ।
सर्वं जानाति धर्मात्मा गतमेष्यच्च केशवः ॥ ३३
यमाह कृष्णो दाशार्हः सोऽस्तु नो वाहिनीपतिः ।
कृतास्त्रो ह्यकृतास्त्रो वा वृद्धो वा यदि वा युवा ॥ ३४
एष नो विजये मूलमेष तात विपर्यये ।
अत्र प्राणाश्च राज्यं च भावाभावौ सुखासुखे ॥ ३५
एष धाता विधाता च सिद्धिरत्र प्रतिष्ठिता ।
यमाह कृष्णो दाशार्हः स नः सेनापतिः क्षमः ।
ब्रवीतु वदतां श्रेष्ठो निशा समतिवर्तते ॥ ३६
ततः सेनापतिं कृत्वा कृष्णस्य वशवर्तिनम् ।
रात्रिशेषे व्यतिक्रान्ते प्रयास्यामो रणाजिरम् ।
अधिवासितशस्त्राश्च कृतकौतुकमङ्गलाः ॥ ३७

वैशंपायन उवाच ।

तस्य तद्वचनं श्रुत्वा धर्मराजस्य धीमतः ।
अब्रवीत्पुण्डरीकाक्षो धनंजयमवेक्ष्य ह ॥ ३८
ममाप्येते महाराज भवद्भिर्य उदाहृताः ।
नेतारस्तव सेनायाः शूरा विक्रान्तयोधिनः ।
सर्वे एते समर्था हि तव शत्रून्प्रमर्दितुम् ॥ ३९

C. 5. 5138
B. 5. 151. 41
K. 5. 151. 41

---

28 K_5 om. 28^{abc} (cf. v.l. 25). — ^{b}) T_1 G_4 ततः (for मतः). — After 28, T G (except G_3) ins.:

540* अर्जुनेनैवमुक्ते तु भीमो वाक्यं समाददे ।

30 ^{a}) $K_{3.5}$ $B_{4.5}$ Dn_1 Ds_2 $D_{2-4.8.10}$ $G_{3.5}$ °मध्ये तु (for °मध्येषु). — ^{b}) $B_{2.4.6}$ Dn_1 Ds_1 $D_{3.4.6.8.10}$ प्र- (for वि-).

31 ^{a}) K B_2 $D_{1.2.7}$ (by transp.) पश्यामि युद्धेषु ($K_{3.5}$ योधेषु); $B_{1.3.4.5}$ Dn_1 Ds $D_{3.4.6.8.10}$ युद्धे प्रपश्यामि; $M_{1.2}$ लोकेषु पश्यामि. — ^{b}) K_4 $D_{3.4}$ यो भिंद्याच्च; K_5 यो हि भिंद्याच्; B (except B_2) Dn_1 $D_{6.8.10}$ G_4 यो भिंद्यात्तु; Ds G_3 यो भिद्यात्तु; M_5 योभिविध्याच्. — ^{c}) $K_{4.5}$ अस्त्रेण (for श°). — ^{d}) K_5 Ds_1 स्यंदनस्थितं.

32 ^{a}) B (except B_3) Dn_1 Ds $D_{1.6.8.10}$ समरे नान्यो; T G (except G_3) विषहेतासौ (T_2 °रौ) (for विषहेन्नान्यो). — ^{b}) B (except B_3) Dn_1 Ds $D_{6.8.10}$ हन्यान् (for राजन्). D_1 °रथं (for °व्रतम्). — ^{c}) S राजन् (for वीरं). B_3 शिखंडी च मृधे वीरः. — ^{d}) T G_{1-3} न (for स). $K_{1.2}$ च (for मे).

33 ^{a}) B_3 सारः (for तात). — ^{b}) K_4 G_4 महा° (for बला°). — ^{c}) K_5 सर्वात्मा (for धर्मा°). — ^{d}) K_3 गतमेष्यं च; K_4 B Dn_1 Ds $D_{2-4.6.8.10}$ मतमेषां च; K_5 गतमेकस्य. D_1 गतिं चैव जनार्दनः.

34 K_3 transp. 34^{b} and 36^{d}. G_4 M_2 om. (hapl.) 34^{b}–36^{c}. — $34^{a}=36^{c}$. — ^{b}) D_7 मे (for नो). B (except B_3) Dn_1 Ds $D_{6.8.10}$ G_3 सोस्तु सेनापतिर्मम (cf. 36^{d}). — ^{c}) K_{1-3} $D_{1.3.4.7}$ G_3 M (M_2 om.) हि (as in text); K_5 वा; the rest [ऽ]पि.

35 G_4 M_2 om. 35 (cf. v.l. 34). — ^{a}) $D_{6.8.10}$ मे (for नो). — ^{c}) $K_{1.2}$ राष्ट्रं (for राज्यं).

36 G_4 M_2 om. 36^{abc} (cf. v.l. 34). — $36^{c}=34^{a}$. — ^{d}) D_1 मतः (for क्षमः). $K_{3.5}$ $B_{1.2.4.5}$ Dn_1 Ds $D_{6.8.10}$ सोस्तु नो वाहिनीपतिः ($=34^{b}$); B_3 सोस्तु सेनापतिर्मम. — ^{e}) G_3 च युधां (for वदतां). — ^{f}) K_3 $B_{4.5}$ Dn_1 $D_{2-4.6.8.10}$ T_1 निशा समभिवर्तते. K_4 विश्वासमतिवर्तते; K_5 निशा समतिवर्तिता. Ca cites समतिवर्तते (as in text).

37 ^{b}) K (except K_4) D_2 G (except G_2) M_5 वशवर्तिनः. — ^{c}) B (except B_3) Dn_1 Ds $D_{2-4.6}$ रात्रेः (for रात्रि-). K (except K_5) D_7 ह्यति° (for व्यति°).

39 Before 39, T_2 ins. श्रीभगवान्, G_5 माधवः. — ^{a}) K_5 T_2 $G_{1.4 (by corr.).5}$ मता राजन् (for महाराज). — ^{c}) Ds D_2 सेनायां (for °याः). — ^{d}) B Dn_1 Ds $D_{6.8.10}$ मता (for शूरा). — ^{e}) $B_{2.4.6}$ Dn_1 Ds $D_{2-4.6.10}$ एव (for एते). — ^{f}) $B_{2.5}$ Ds

C. 5. 5138
B. 5. 151. 41
K. 5. 151. 41

इन्द्रस्यापि भयं ह्येते जनयेयुर्महाहवे ।
किं पुनर्धार्तराष्ट्राणां लुब्धानां पापचेतसाम् ॥ ४०
मयापि हि महाबाहो त्वत्प्रियार्थमरिंदम ।
कृतो यत्नो महांस्तत्र शमः स्यादिति भारत ।
धर्मस्य गतमानृण्यं न स वाच्या विवक्षताम् ॥ ४१
कृतार्थं मन्यते बालः सोऽऽत्मानमविचक्षणः ।
धार्तराष्ट्रो बलस्थं च मन्यतेऽऽत्मानमातुरः ॥ ४२
युज्यतां वाहिनी साधु वधसाध्या हि ते मताः ।
न धार्तराष्ट्राः शक्ष्यन्ति स्थातुं दृष्ट्वा धनंजयम् ॥ ४३
भीमसेनं च संक्रुद्धं यमौ चापि यमोपमौ ।
युयुधानद्वितीयं च धृष्टद्युम्नममर्षणम् ॥ ४४
अभिमन्युं द्रौपदेयान्विराटद्रुपदावपि ।
अक्षौहिणीपतींश्चान्यान्नरेन्द्रान्दृढविक्रमान् ॥ ४५
सारवद्बलमस्माकं दुष्प्रधर्षं दुरासदम् ।
धार्तराष्ट्रबलं संख्ये वधिष्यति न संशयः ॥ ४६
एवमुक्ते तु कृष्णेन संप्रहृष्यन्नरोत्तमाः ।
तेषां प्रहृष्टमनसां नादः समभवन्महान् ॥ ४७
योग इत्यथ सैन्यानां त्वरतां संप्रधावताम् ।
हयवारणशब्दश्च नेमिघोषश्च सर्वशः ।
शङ्खदुन्दुभिनिर्घोषस्तुमुलः सर्वतोऽभवत् ॥ ४८
प्रयास्यतां पाण्डवानां ससैन्यानां समन्ततः ।
गङ्गेव पूर्णा दुर्धर्षा समदृश्यत वाहिनी ॥ ४९
अग्रानीके भीमसेनो माद्रीपुत्रौ च दंशितौ ।
सौभद्रो द्रौपदेयाश्च धृष्टद्युम्नश्च पार्षतः ।
प्रभद्रकाश्च पाञ्चाला भीमसेनमुखा ययुः ॥ ५०
ततः शब्दः समभवत्समुद्रस्येव पर्वणि ।

शत्रुं (for शत्रून्). K5 B Dn1 Ds D6.10 प्रबाधितुं; S विमर्दितुं.

40 a) K1-3 D7 घोरं (for ह्येते). D3.4 इंद्रायाभिभवं ह्येते. — d) S क्रुद्धा° (for लुब्धा°).

41 b) B Dn1 Ds D10 महाहवे (for अरिंदम). — c) K (except K4) D2.7 तात; T1 G1.4 M3 तस्य (for तत्र). — K4 om. 41c-42d. — f) B2 नैव वाच्या; T G (except G3) नाहं वाच्यो (for न स वाच्या). B2 विपश्चितां; Ca विवक्षताम् (as in text).

42 K4 om. 42 (cf. v.l. 41). — a) K3 Dn1 Ds D1-4 T2 G1.2 कृतास्त्रं (for °र्थं). K1.2 चासौ (for बालः). — b) K1.3 B Dn1 Ds D2-4.6.8.10 G3 आत्मानं (for सोऽऽत्मानं). — D3.4 om. 42cd. — c) Ds M2 बलस्थश्च. — d) B Dn1 Ds D6.8.10 पश्यति (for मन्यते).

43 a) M3-5 सा तु (for साधु). — b) D3.4 बल° (for वध°). K3.4 B (except B3) Ds D1.6.8.10 T G मे (for ते). D7 मम (for मताः). — c) S transp. न and धार्तराष्ट्राः. — d) K5 D1 रणेर्जुनं (for धनं°).

44 b) G2 महाबलौ (for यमो°). — d) M3-5 अमर्षिणं.

45 c) A few MSS. अक्षोहिणी°. — d) B Dn1 Ds D3.4.6.8.10 भीम° (for दृढ°).

46 b) K4 दुष्प्रधृष्यं. D6 त्वरान्वितं; D8 वरानुगं (for दुरा°). — d) B Dn1 Ds D3.4.6.8.10 हनि° (for वधि°). — After 46, Dn1 D3.4.8 S ins.:

541* धृष्टद्युम्नमहं मन्ये सेनापतिमरिंदम ।

47 Before 47, Dn1 D3.4.8 T2 ins. वैशं° उ° (resp. वैशं°). — b) K1.2.5 D1.2.7 संप्र(D2 °प्रा)हृष्टा; B Ds1 D3.4.6.8.10 संप्राहृष्यन्. D1.3.4 नृपोत्तमाः. K3 योधानां युद्धमिच्छतां. — c) G5 सं° (for प्र°). K3 प्रहृष्यन्मनसां तत्र.

48 a) K (except K4) D1 योग इत्येव; D3.4 योजयेति च; T G (except G3) योजयित्वाथ (for योग इत्यथ). Ca cites योगः (as in text). — b) Ds D10 चरतां (for त्व°). — c) K4 D2 °घोषश्च; K5 °घोषाश्च; B Dn1 Ds D1.6.8.10 T2 G2.3 M1 °शब्दाश्च. — d) K5 B Dn1 Ds D6.8.10 T1 G2.3 M2 °घोषा° (for °घोष°). K5 B Dn1 Ds D1.6.10 सर्वतः; T1 G1.4 संघशः. — e) B Dn1 Ds D6.8.10 G3 °घोषा(B3 °शब्दा)श्च; D3.4 M3-5 °घोषश्च; G5 °घोषस्तु. — f) K (except K4) D7.8 तुमलः. B Dn1 Ds D6.8.10 G3 [ऽ]भवन्; T2 G3 भवेत् (for ऽभवत्). — After 48, K B2 Dn1 D1-4.7.8 ins.:

542* तदुग्रं सागरनिभं क्षुब्धं बलसमागमम् ।
रथपत्तिगजोदग्रं महोर्मिभिरिवाकुलम् ।
धावतामाह्वयानानां तनुत्राणि च बध्नताम् ।

[(L. 1) K3.5 D1.3.4.7 तम् (for तद्). — (L. 3) K1-3.5 D2.7 [अ]व-; K4 D1.3.4 प्र-; B2 [अ]पि (for च).]

49 Ds om. 49cd. — 49cd = (var.) 5. 197. 10cd. — c) T1 घूर्ण-; G1 घूर्णा (for पूर्णा). — d) K D1.2.7 ध्वजिनी समदृश्यत.

50 a) Ds अश्वा° (for अग्रा°). — b) S (mostly) दंसितौ. — e) D3.4 अग्रतश्च (for प्रभद्रकाः). K1.2.5

हृष्टानां संप्रयातानां घोषो दिवमिवास्पृशत् ॥ ५१
प्रहृष्टा दंशिता योधाः परानीकविदारणाः ।
तेषां मध्ये ययौ राजा कुन्तीपुत्रो युधिष्ठिरः ॥ ५२
शकटापणवेशाश्च यानयुग्यं च सर्वशः ।
कोशयन्त्रायुधं चैव ये च वैद्याश्चिकित्सकाः ॥ ५३
फल्गु यच्च बलं किंचित्तथैव कृशदुर्बलम् ।
तत्संगृह्य ययौ राजा ये चापि परिचारकाः ॥ ५४
उपप्लव्ये तु पाञ्चाली द्रौपदी सत्यवादिनी ।
सह स्त्रीभिर्निववृते दासीदाससमावृता ॥ ५५
कृत्वा मूलप्रतीकारान्गुल्मैः स्थावरजङ्गमैः ।
स्कन्धावारेण महता प्रययुः पाण्डुनन्दनाः ॥ ५६
ददतो गां हिरण्यं च ब्राह्मणैरभिसंवृताः ।
स्तूयमाना ययू राजन्रथैर्मणिविभूषितैः ॥ ५७
केकया धृष्टकेतुश्च पुत्रः काश्यस्य चाभिभूः ।
श्रेणिमान्वसुदानश्च शिखण्डी चापराजितः ॥ ५८
हृष्टास्तुष्टाः कवचिनः सशस्त्राः समलंकृताः ।
राजानमन्वयुः सर्वे परिवार्य युधिष्ठिरम् ॥ ५९
जघनार्धे विराटश्च यज्ञसेनश्च सोमकिः ।
सुधर्मा कुन्तिभोजश्च धृष्टद्युम्नस्य चात्मजाः ॥ ६०
रथायुतानि चत्वारि हयाः पञ्चगुणास्ततः ।
पत्तिसैन्यं दशगुणं सादिनामयुतानि षट् ॥ ६१
अनाधृष्टिश्चेकितानश्चेदिराजोऽथ सात्यकिः ।
परिवार्य ययुः सर्वे वासुदेवधनंजयौ ॥ ६२
आसाद्य तु कुरुक्षेत्रं व्यूढानीकाः प्रहारिणः ।
पाण्डवाः समदृश्यन्त नर्दन्तो वृषभा इव ॥ ६३
तेऽवगाह्य कुरुक्षेत्रं शङ्खान्दध्मुररिंदमाः ।

C. 5. 5166
B. 5. 151. 69
K. 5. 151. 69

$D_{1-4.7}$ स- (for च). A few MSS. पंचालाः.

51 51^{cd} = (var.) 5. 197. 8^{cd}. — ^{d}) K_4 D_1 उप-; K_5 G_5 अथ (for इव).

52 ^{a}) $D_{3.4}$ प्राहृष्यन् (for प्रहृष्टा). Some S MSS. दंसिता. M (except M_1) यौधाः. — ^{b}) K_4 G_3 M °नीकविदारिणः; D_2 °नीकावदारिणः. — D_6 om. 52^{c}–53^{d}.

53 D_6 om. 53 (cf. v.l. 52). — ^{a}) K_{3-5} D_7 T $G_{1.2.5}$ $M_{3.4}$ (*inf. lin.* as in text).5 °वेश्याः; G_3 °भेर्यः; $Ca._8$ °वेशाः (as in text). — ^{b}) D_{10} (*sup. lin.* as in text) °मुख्यं; G_4 °युग्याश्; $Cn._8$ °युग्यं (as in text). — ^{c}) K_4 B Dn_1 $D_{1.2}$ कोशं; a few MSS. कोषं (for कोश-).

54 ^{b}) $B_{2.4.5}$ Dn_1 Ds $D_{1.6.10}$ यच्चापि (for तथैव). K $D_{3.4.7.8}$ भृश° (for कृश°). — ^{d}) K_4 $B_{1.3}$ S ये चान्ये. B_2 परिपंथकाः; D_6 M_4 °चारिकाः. $K_{1-3.5}$ D_2 कुंतीपुत्रो युधिष्ठिरः (= 69^{d}).

55 ^{a}) S उपप्लाव्ये. $K_{1.2}$ च (for तु). — ^{d}) K_5 °समन्विता; S °समाकुले.

56 ^{a}) K_5 B Dn_1 Ds $D_{1-4.6.8.10}$ $Ca._8$ °प्रतीकारं. — ^{c}) D_2 सहिताः (for महता). — ^{d}) K_5 प्रजग्मुः; M_1 निर्ययुः.

57 ^{a}) $K_{1.4}$ D_1 G_5 M गाः; K_3 हि (for गां). — ^{d}) S (except G_3) °विभूषणैः. Cap अणिभूषितैः (unmetrical!).

58 ^{a}) Some N MSS. कैकया *or* कैकेया. — ^{b}) K_5 $M_{3.5}$ काश्यश्च (for °स्य). K_{1-3} T_1 G_5 चाभिभुः. K_4 B_2 Ds $D_{8.10}$ वा विभुः; K_5 Dn_1 D_6 चाविभुः; B_3 वै विभुः; D_1 चाभिभो; D_{2-4} वा विभूः.

59 ^{a}) K_3 $D_{1.7}$ M हृष्टतुष्टाः; K_5 हृष्टाः पुष्टाः; B_3 हृष्टरूपाः; D_8 हृष्टपुष्टाः (for हृष्टास्तुष्टाः). Dn_1 हृष्टा कवचिनस्तुष्टाः. — ^{b}) K (except K_4) D_7 समस्ताः (for सशस्त्राः).

60 ^{a}) K_1 (before corr.).2 Dn_1 M_2 जघनार्थे; K_4 जघन्ये वै; K_5 D_6 जघनार्धं; D_1 युयुधानो; $Ca.n._8$ as in text. — ^{b}) B Dn_1 Ds D_{2-4} याज्ञसेनिश्च. $K_{2.4}$ B (except B_3) Dn_1 Ds $D_{2-4.6.7.10}$ सौमकिः; S (for G_5 see below) सोमकः. G_5 द्रुपदश्च महारथः. — ^{c}) K_{1-3} सुधर्मो; K_4 D_{2-4} T_1 $G_{1.4.5}$ M (except M_4) सुशर्मा; D_1 सधर्मा. — ^{d}) $K_{4.5}$ B_2 चात्मजः; $D_{3.4}$ चानुजः.

61 ^{b}) K_4 गजाः (for हयाः). Dn_1 Ds $D_{1.6.8.10}$ तथा (for ततः). — ^{d}) K_5 corrupt. B Dn_1 Ds $D_{1.6.8.10}$ G_3 गजानाम् (for सादिनाम्).

62 ^{a}) $K_{1-3.5}$ D_7 °वृष्टिः; K_4 $D_{6.8}$ T_1 °धृष्टः; $M_{3.4}$ (*inf. lin.* as in text).5 °धृतिः (for °धृष्टिः). $M_{2.4}$ वसुदानः (for चेकितानः). — ^{b}) B Dn_1 Ds $D_{6.8.10}$ धृष्टकेतुश्च (B_3 चेदिराजा च); D_1 चेदिनाथोथ; T G युयुधानोथ; $M_{2.4}$ चेकितानोथ (for चेदिराजोऽथ). — 62^{d} = 64^{d}.

63 K_3 om. (hapl.) 63^{b}–64^{a}; $D_{3.4}$ om. 63^{c}–64^{b}. — ^{d}) K (K_3 om.) $D_{1.7.8}$ G (except G_2) नर्दंतो; D_2 नंदंतो (for नर्दन्तो).

C. 5. 5167
B. 5. 151. 69
K. 5. 151. 69

तथैव दध्मतुः शङ्खौ वासुदेवधनंजयौ ॥ ६४
पाञ्चजन्यस्य निर्घोषं विस्फूर्जितमिवाशनेः ।
निशम्य सर्वसैन्यानि समहृष्यन्त सर्वशः ॥ ६५
शङ्खदुन्दुभिसंसृष्टः सिंहनादस्तरस्विनाम् ।
पृथिवीं चान्तरिक्षं च सागरांश्चान्वनादयत् ॥ ६६
ततो देशे समे स्निग्धे प्रभूतयवसेन्धने ।
निवेशयामास तदा सेनां राजा युधिष्ठिरः ॥ ६७
परिहृत्य श्मशानानि देवतायतनानि च ।
आश्रमांश्च महर्षीणां तीर्थान्यायतनानि च ॥ ६८
मधुरानूषरे देशे शिवे पुण्ये महीपतिः ।
निवेशं कारयामास कुन्तीपुत्रो युधिष्ठिरः ॥ ६९
ततश्च पुनरुत्थाय सुखी विश्रान्तवाहनः ।
प्रययौ पृथिवीपालैर्वृतः शतसहस्रशः ॥ ७०
विद्राव्य शतशो गुल्मान्धार्तराष्ट्रस्य सैनिकान् ।
पर्यक्रामत्समन्ताच्च पार्थेन सह केशवः ॥ ७१
शिबिरं मापयामास धृष्टद्युम्नश्च पार्षतः ।
सात्यकिश्च रथोदारो युयुधानः प्रतापवान् ॥ ७२
आसाद्य सरितं पुण्यां कुरुक्षेत्रे हिरण्वतीम् ।
सूपतीर्थां शुचिजलां शर्करापङ्कवर्जिताम् ॥ ७३
खानयामास परिखां केशवस्तत्र भारत ।
गुप्त्यर्थमपि चादिश्य बलं तत्र न्यवेशयत् ॥ ७४
विधिर्यः शिबिरस्यासीत्पाण्डवानां महात्मनाम् ।
तद्विधानि नरेन्द्राणां कारयामास केशवः ॥ ७५
प्रभूतजलकाष्ठानि दुराधर्षतराणि च ।
भक्ष्यभोज्योपपन्नानि शतशोऽथ सहस्रशः ॥ ७६
शिबिराणि महार्हाणि राज्ञां तत्र पृथक्पृथक् ।
विमानानीव राजेन्द्र निविष्टानि महीतले ॥ ७७
तत्रासञ्शिल्पिनः प्राज्ञाः शतशो दत्तवेतनाः ।
सर्वोपकरणैर्युक्ता वैद्याश्च सुविशारदाः ॥ ७८
ज्याधनुर्वर्मशस्त्राणां तथैव मधुसर्पिषोः ।

---

64 K_3 om. 64^{a}; $D_{3.4}$ om. 64^{ab} (cf. v.l. 63). — ^{a}) S विगाह्य (for ऽवगाह्य). — ^{b}) K_{1-3} अनेकशः; D_7 पृथक्पृथक् (for अरिंदमाः). — ^{c}) $B_{4.5}$ Dn_1 D_{10} शंखं; D_1 शंखान् (for शङ्खौ). — $64^{d} = 62^{d}$.

65 ^{c}) K_{1-3} D_7 सर्वभूतानि. — ^{d}) G (except G_4) °कंपंत; Ca °हृष्यन्त (as in text).

66 ^{a}) K_2 B $D_{6.8}$ °संहृष्टः; K_4 $D_{1.2.7}$ °संमिश्रः; K_5 G_3 °निर्घोषः; G_4 °निर्दिष्टः; T $G_{1.2.5}$ °निर्घुष्टः; M °संघुष्टः. — ^{d}) T_1 $G_{1.4}$ सागरं च. K_1 B_3 D_5 $D_{1.2.6.10}$ [अ]नु नादयन् (B_3 D_{10} °यत्); $K_{3.5}$ [अ]प्यनादयत्; B_4 Dn_1 D_8 [अ]न्वनादयन्; $D_{3.4}$ [अ]भ्यनादयत्; S ह्यनादयत् (for [अ]न्वनादयत्). — After 66, K_4 Dn_1 $D_{3.4}$ ins. an addl. colophon.

67 Before 67, K_4 Dn_1 D_5 D_8 ins. वैशं° उ°. — ^{b}) = 5. 153. 35^{b}. D_5 सुभूत°. — ^{c}) D_5 $D_{6.8.10}$ ततः (for तदा).

68 ^{a}) B_3 परित्यज्य; G_3 °वर्ज्य (for °हृत्य).

69 ^{a}) = 5. 153. 35^{a}. — ^{b}) K_1 B Dn_1 D_5 $D_{1.3.4.6.8.10}$ शुचौ; K_4 D_2 Ca शुभे (for शिवे). B Dn_1 D_5 $D_{1.3.4.6.8.10}$ महामतिः (for मही°).

70 ^{a}) $D_{3.4}$ ततः समुत्थाय सुखं. — ^{b}) $D_{3.4}$ राजा (for सुखी).

71 ^{c}) K_4 Dn_1 $D_{1.6-8.10}$ M_2 पर्या°; K_5 परि° (for पर्य°).

72 ^{a}) = 5. 153. 34^{c}. K_5 G_6 स्थापयामास; G_3 कारया°. — ^{c}) B_3 $D_{3.4}$ तथोदारो; D_1 महेष्वासो (for रथोदारो). — ^{d}) Dn_1 D_5 $D_{6.8.10}$ च वीर्य° (for प्रताप°).

73 ^{a}) D_5 D_7 $G_{4.5}$ M_5 सरितां (for °तं). T_2 $G_{2.5}$ श्रेष्ठां (for पुण्यां). — ^{b}) $K_{1.2}$ हिरण्मतीं; K_5 हिरण्मयीं; D_5 D_{10} (marg. *sec. m.*) सरस्वतीं. — ^{c}) K_4 शुचितीर्थां. B_3 सुविमलां.

74 ^{a}) D_2 परिघाः; $D_{3.4}$ G_6 °खाः; D_8 °खान्; T_2 $G_{2.4}$ °घां (for °खां). — ^{c}) K D_{1-4} चोद्दिश्य (for चादिश्य).

75 ^{d}) B_3 पांडवः; $D_{3.4}$ सर्वशः (for केशवः).

76 ^{a}) $B_{1.2.4}$ Dn_1 D_5 $D_{1.6.8.10}$ °तर° (for °जल°). — ^{c}) B Dn_1 D_5 $D_{6.8.10}$ °भोज्यान्नपानानि.

77 ^{a}) B_2 विविधानि (for शिबि°). — ^{b}) D_2 तत्र राज्ञां (by transp.). — ^{c}) K (except K_5) $D_{1-4.7}$ राजंते (for राजेन्द्र). B_2 विमानानि व्यराजंत. — ^{d}) K_3 विशिष्टानि; D_5 प्रविष्टानि; $G_{1.4}$ निषीदंति. K_{1-3} $D_{1.2.7}$ महात्मनां.

78 ^{d}) K_3 वैद्याः शास्त्रविचक्षणाः; K_5 B Dn_1 D_5 $D_{6.8.10}$ G_3 वैद्याः शास्त्रविशारदाः; D_7 स्वविद्यासु विशारदाः.

79 ^{b}) K (except K_4) $B_{1.3.5}$ $D_{1.7}$ T_1 $G_{3.4}$ मधुसर्पिषां. — ^{c}) Some N MSS. °पांशूनां; T_2 $G_{2.5}$

ससर्जरसपांसूनां राशयः पर्वतोपमाः ॥ ७९
बहूदकं सुयवसं तुषाङ्गारसमन्वितम् ।
शिबिरे शिबिरे राजा संचकार युधिष्ठिरः ॥ ८०
महायन्त्राणि नाराचास्तोमरर्ष्टिपरश्वधाः ।
धनूंषि कवचादीनि हृद्यभूवन्नृणां तदा ॥ ८१
गजाः कङ्कटसंनाहा लोहवर्मोत्तरच्छदाः ।
अदृश्यंस्तत्र गिर्याभाः सहस्रशतयोधिनः ॥ ८२
निविष्टान्पाण्डवांस्तत्र ज्ञात्वा मित्राणि भारत ।
अभिसस्रुर्यथोद्देशं सबलाः सहवाहनाः ॥ ८३
चरितब्रह्मचर्यास्ते सोमपा भूरिदक्षिणाः ।
जयाय पाण्डुपुत्राणां समाजग्मुर्महीक्षितः ॥ ८४

इति श्रीमहाभारते उद्योगपर्वणि एकोनपञ्चाशदधिकशततमोऽध्यायः ॥ १४९ ॥

१५०

जनमेजय उवाच ।
युधिष्ठिरं सहानीकमुपयान्तं युयुत्सया ।
संनिविष्टं कुरुक्षेत्रे वासुदेवेन पालितम् ॥ १
विराटद्रुपदाभ्यां च सपुत्राभ्यां समन्वितम् ।
केकयैर्वृष्णिभिश्चैव पार्थिवैः शतशो वृतम् ॥ २
महेन्द्रमिव चादित्यैरभिगुप्तं महारथैः ।
श्रुत्वा दुर्योधनो राजा किं कार्यं प्रत्यपद्यत ॥ ३
एतदिच्छाम्यहं श्रोतुं विस्तरेण तपोधन ।

C. 5. 5191
B. 5. 153. 4
K. 5. 153. 4

°पानानां (T_2 °वस्तूनां also).

80 K_4 om. 80. — ^{a}) Ds $D_{3.4.6.8}$ सयवसं. — ^{c}) K_5 राज्ञां (for राजा). — ^{d}) $D_{1-4.6}$ M (except M_1) स चकार.

81 ^{b}) K_2 G_5 तोमरासिप°; K_3 B Dn_1 Ds $D_{1-4.6.8.10}$ तोमराणि प°. Some N MSS. परस्वधाः. — ^{c}) K (except K_4) $D_{2.7}$ $G_{3.5}$ M_1 कवचानीति. — ^{d}) K_4 हयाश्वासन्नमार्गणाः; B Dn_1 Ds $D_{6.8.10}$ ऋष्टयस्तूणसंयुताः (B_3 हृष्टाश्वासन्नरास्तदा); $D_{3.4}$ T G संबभूवुर्नृणां तदा; D_7 हृद्यान्यासन्नृणां तदा; M समभूवन्नृणां तदा. *Ca* cites हृद्यभवन्.

82 ^{a}) K_1 कांचन°; K_4 $B_{2.5}$ $D_{1.3.4.7}$ G_3 Cn कंटक°; $Ca.s$ कङ्कट° (as in text). ❀Nil.: कण्टकैः कवचैः संनहनं येषामिति प्राञ्चः।❀ — ^{c}) $K_{1.2.4}$ D_2 अदृश्यंत च (K_4 हि); B Dn_1 Ds $D_{1.6.8.10}$ दृश्यंते तत्र; T G अदृश्यंतात्र; M_{3-5} अदृश्यास्तत्र (for अदृश्यंस्तत्र). — ^{d}) G_5 शतशोथ सहस्रशः (=76^{d}).

83 ^{b}) T G पश्चा(G_3 मित्रा)न्नरर्षभ (T_1 G_5 °भाः; G_4 °भः); $M_{1.2}$ मित्राणि चानघ; M_{3-5} मित्रा नरर्षभाः. — ^{c}) B (except B_2) Dn_1 $D_{1.3.4.6.8}$ G_1 यथादेशं. — ^{d}) D_1 सहबांधवाः; S सपदानुगाः.

84 ^{a}) $K_{1.3.4}$ D_1 च; Ds_2 ये (for ते). — ^{d}) $D_{3.4}$ महीपते; D_7 °भृतः; M_{3-5} °पतिः (for महीक्षितः).

Colophon. Dn_2 $D_{5.9}$ missing. — *Sub-parvan:* K_1 B Ds D_{10} अभिनिर्यात्रा (K_1 °णं); $K_{2.4.5}$ Dn_1 $D_{2.7}$ अभिनिर्याणयात्रा; K_3 D_1 G_5 निर्याणयात्रा; T_1 भगवत्प्रतियान; $M_{3.4}$ निर्यात्रा. — *Adhy. name:* T_1 धर्मराजस्य स्कंधावारनिवेशः; $G_{1.4}$ स्कंधावारनिवेशनं; G_5 कुरुक्षेत्रावतारं; $M_{1.2}$ पांडवकुरुक्षेत्रप्राप्तिः; M_{3-5} कुरुक्षेत्रासादनं. — *Adhy. no.* (figures, words or both): D_6 41 (=141); T_1 G_1 154; T_2 M 152 (M_4 151); $G_{2.4.5}$ 153; G_3 150. — *S'loka no.:* K_5 86; Dn_1 18. — After the colophon, T_1 ins. श्रीकृष्णायनमः। भगवद्यानं समाप्तः.

150

☞ *This adhy. is missing in Dn$_2$ (cf. v.l. 5. 143. 2)*; the MS. is mostly ignored here.

1 ^{b}) $K_{1.4.5}$ Ds_2 G_{2-4} M उपयातं; B Dn_1 Ds_1 $D_{1.6.7.10}$ उपायांतं. — G_2 om. 1^{c}–3^{b}.

2 G_2 *om.* 2 (*cf.* v.l. 1). — ^{b}) D_7 °सुता° (*for* °पुत्रा°). — ^{c}) Some N MSS. कैकयैर् *or* कैकेयैर्. — ^{d}) D_8 पांडवैः (for पार्थिवैः).

3 G_2 om. 3^{ab} (cf. v.l. 1) — ^{b}) K_4 $D_{3.4}$ °रथं (for °रथैः).

4 T_2 $G_{2.3}$ M_4 om. (hapl.) 4–6. — 4^{ab}=7^{ab},

C. 5. 5191
B. 5. 153. 4
K. 5. 153. 4

संभ्रमे तुमुले तस्मिन्यदासीत्कुरुजाङ्गले ॥ ४
व्यथयेयुर्हि देवानां सेनामपि समागमे ।
पाण्डवा वासुदेवश्च विराटद्रुपदौ तथा ॥ ५
धृष्टद्युम्नश्च पाञ्चाल्यः शिखण्डी च महारथः ।
युयुधानश्च विक्रान्तो देवैरपि दुरासदः ॥ ६
एतदिच्छाम्यहं श्रोतुं विस्तरेण तपोधन ।
कुरूणां पाण्डवानां च यद्यदासीद्विचेष्टितम् ॥ ७

वैशंपायन उवाच ।

प्रतियाते तु दाशार्हे राजा दुर्योधनस्तदा ।
कर्णं दुःशासनं चैव शकुनिं चाब्रवीदिदम् ॥ ८
अकृतेनैव कार्येण गतः पार्थानधोक्षजः ।
स एनान्मन्युनाविष्टो ध्रुवं वक्ष्यत्यसंशयम् ॥ ९
इष्टो हि वासुदेवस्य पाण्डवैर्मम विग्रहः ।
भीमसेनार्जुनौ चैव दाशार्हस्य मते स्थितौ ॥ १०
अजातशत्रुरप्यद्य भीमार्जुनवशानुगः ।
निकृतश्च मया पूर्वं सह सर्वैः सहोदरैः ॥ ११
विराटद्रुपदौ चैव कृतवैरौ मया सह ।
तौ च सेनाप्रणेतारौ वासुदेववशानुगौ ॥ १२
भविता विग्रहः सोऽयं तुमुलो लोमहर्षणः ।
तस्मात्सांग्रामिकं सर्वं कारयध्वमतन्द्रिताः ॥ १३
शिबिराणि कुरुक्षेत्रे क्रियन्तां वसुधाधिपाः ।
सुपर्याप्तावकाशानि दुरादेयानि शत्रुभिः ॥ १४
आसन्नजलकाष्ठानि शतशोऽथ सहस्रशः ।
अच्छेद्याहारमार्गाणि रत्नोचयचितानि च ।
विविधायुधपूर्णानि पताकाध्वजवन्ति च ॥ १५
समाश्च तेषां पन्थानः क्रियन्तां नगराद्बहिः ।
प्रयाणं घुष्यतामद्य श्वोभूत इति माचिरम् ॥ १६
ते तथेति प्रतिज्ञाय श्वोभूते चक्रिरे तथा ।
हृष्टरूपा महात्मानो विनाशाय महीक्षिताम् ॥ १७
ततस्ते पार्थिवाः सर्वे तच्छ्रुत्वा राजशासनम् ।
आसनेभ्यो महार्हेभ्य उदतिष्ठन्नमर्षिताः ॥ १८
बाहून्परिघसंकाशान्संस्पृशन्तः शनैः शनैः ।

— ^{b}) B D_{n1} D_8 $D_{6.10}$ महामते (for तपो°). — After 4^{ab}, K_8 D_8 read 7^{cd}. — ^{c}) $D_{3.4}$ $G_{1.4.5}$ संग्रामे (for °भ्रमे). A few N MSS. तुमले. — ^{d}) G_4 यथा°; M_2 यत्रा° (for यदा°). K (except K_4) D_{s1} $D_{1.7}$ °जंगले.

5 T_2 $G_{2.3}$ M_4 om. 5 (cf. v.l. 4). — ^{ab}) K_5 सैन्यान्यपि (for सेनामपि). B D_{n1} D_8 $D_{3.4.6.8.10}$ इमे ($D_{3.4}$ हि ते) देवान्सेंद्रानपि (for हि देवानां सेनामपि). — ^{d}) G_5 $M_{3.5}$ तदा (for तथा).

6 T_2 $G_{2.3}$ M_4 om. 6 (cf. v.l. 4). — ^{b}) K_4 °बलः (for °रथः). — ^{c}) $B_{2.4.5}$ D_{n1} D_8 $D_{6.8.10}$ युधामन्यु° (for युयुधान°). K_4 चेकितानो (for च विक्रान्तो). — ^{d}) $B_{3.5}$ दुरुत्सहः (for दुरासदः).

7 K_3 D_8 read 7^{cd} after 4^{ab}. — $7^{ab} = 4^{ab}$. — ^{c}) B_5 पांडवानां कुरूणां च (= 5. 146. 25^{c}). — After 7, B (except B_3) D_{n1} D_8 $D_{6.10}$ ins. an addl. colophon (ignored in the old printed ed.!).

8 ^{a}) $K_{1.2.5}$ $D_{2.7}$ प्रतिप्रयाते; $B_{3.5}$ अभियाते तु. — ^{b}) G_3 राजन् (for राजा). D_{2-4} ततः; $G_{3.4}$ तथा (for तदा).

9 ^{c}) K (except K_3) D_{n1} D_{s2} $D_{7.8}$ स एतान्; $D_{3.4}$ ससैन्यं; S अदानान् (G_3 अथास्मान्) (for स एनान्). C_a cites एनान्. — ^{d}) B D_{n1} D_{2-4} T G (except G_5) धक्ष्यति; D_8 धुक्ष्यति (for वक्ष्यति). K (except K_4) $D_{1.2.7.10}$ असंमतं; $M_{3.5}$ असंशसं (for असंशयम्).

11 ^{a}) K (except K_4) D_7 चाप्यद्य; B D_{n1} D_8 D_{10} अत्यर्थं; T_2 $G_{2.5}$ अप्यत्र (for अप्यद्य). — ^{b}) B (except B_5) D_{n1} T_1 भीमसेनवशा°. — D_2 om. (hapl.) 11^{c}–12^{d}.

13 ^{b}) A few N MSS. तुमलो. S रोमहर्षणः. — ^{d}) K_4 अरिंदमाः (for अतन्द्रिताः).

14 ^{c}) $K_{1.3}$ $D_{2.6-8}$ G_3 अ°; B D_{n1} स्व° (for सु°). — ^{d}) B_2 दुराधर्षाणि; D_2 C_a °दानानि (for °देयानि).

15 ^{a}) $B_{4.5}$ C_n °कोष्ठानि. — ^{b}) $K_{1.2.4.5}$ $D_{7.8}$ सुगुप्तानि; K_3 D_2 शिबिराणि (for शतशोऽथ). — K_4 om. 15^{cd}. — ^{c}) K (K_4 om.) B_2 D_8 $D_{1.7.10}$ C_s °हार्य° (for °हार°). — ^{d}) $B_{1.3-5}$ D_8 बंधोच्छ्रय°; B_2 D_{n1} $D_{6.7.10}$ रत्नोच्छ्रय°; $D_{3.4}$ बलौघचरितानि. S °युतानि च. — ^{e}) $G_{1.4}$ विविधानि च पूर्णानि.

16 ^{b}) D_1 अधि; $D_{3.4}$ S अपि (for बहिः).

17 ^{a}) $K_{1.2.5}$ D_7 समा° (for प्रति°). — ^{b}) K_4 B_1 $D_{3.4}$ G_3 तदा (for तथा). — ^{d}) B D_{n1} $D_{2-4.8.10}$ निवासाय. $K_{1.2.5}$ D_1 T_1 महीक्षितः.

18 ^{b}) D_6 कृत्वा (for श्रुत्वा).

काञ्चनाङ्गददीप्तांश्च चन्दनागरुभूषितान् ॥ १९
उष्णीषाणि नियच्छन्तः पुण्डरीकनिभैः करैः ।
अन्तरीयोत्तरीयाणि भूषणानि च सर्वशः ॥ २०
ते रथान्रथिनः श्रेष्ठा हयांश्च हयकोविदाः ।
सज्जयन्ति स्म नागांश्च नागशिक्षासु निष्ठिताः ॥ २१
अथ वर्माणि चित्राणि काञ्चनानि बहूनि च ।
विविधानि च शस्त्राणि चक्रुः सज्जानि सर्वशः ॥ २२
पदातयश्च पुरुषाः शस्त्राणि विविधानि च ।
उपजह्रुः शरीरेषु हेमचित्राण्यनेकशः ॥ २३
तदुत्सव इवोदग्रं संप्रहृष्टनरावृतम् ।
नगरं धार्तराष्ट्रस्य भारतासीत्समाकुलम् ॥ २४
जनौघसलिलावर्तो रथनागाश्वमीनवान् ।
शङ्खदुन्दुभिनिर्घोषः कोशसंचयरत्नवान् ॥ २५
चित्राभरणवर्मोर्मिः शस्त्रनिर्मलफेनवान् ।
प्रासादमालाद्रिवृतो रथ्यापणमहाह्रदः ॥ २६
योधचन्द्रोदयोद्भूतः कुरुराजमहार्णवः ।
अदृश्यत तदा राजंश्चन्द्रोदय इवार्णवः ॥ २७

इति श्रीमहाभारते उद्योगपर्वणि पञ्चाशदधिकशततमोऽध्यायः ॥ १५० ॥

१५१

वैशंपायन उवाच ।
वासुदेवस्य तद्वाक्यमनुस्मृत्य युधिष्ठिरः ।
पुनः पप्रच्छ वार्ष्णेयं कथं मन्दोऽब्रवीदिदम् ॥ १
अस्मिन्नभ्यागते काले किं च नः क्षममच्युत ।

C. 5. 5217
B. 5. 154. 2
K. 5. 154. 2

---

19 b) G1.4.5 स्पृशंतश्च (for संस्पृशन्तः). T2 G2.5 शनैस्ततः; G3 ततस्ततः; M ततः शनैः (for शनैः शनैः). — c) T2 G2 °हस्ताश्च. — d) K2 °गरुभूषितैः; K3 B Dn1 Ds D2–4.6 G3 °गुरुभूषितान्; K4 D1 T2 G1.2 °गुरुरूषि°; T1 broken; G5 M1.2 °गरुरूषि°.

21 a) T2 G2.5 रथिनां (for रथिनः). K1.2.5 D7 M2.5 श्रेष्ठान् (for श्रेष्ठाः). — c) K D2.7 S (except M1.2) सज्जयंतः. K (except K3) B3 D2.7 T2 G2.5 च; T1 G1.3.4 [अ]थ; M3–5 [अ]श्च- (for स्म). K (except K4) D7 ते नागान् (for नागांश्च). — d) K1.2 °शिक्षार्थ-शिक्षिताः; K3.5 B1–3 D1.7 °शिक्षासु शिक्षिताः; B4 Dn1 Ds D3.4.6.8.10 °शिक्षास्वनुष्ठिताः; D2 °शिक्षासु निश्चिताः.

22 a) S शस्त्राणि (for चित्राणि). — b) S कवचानि (for काञ्चनानि). — K4 om. (hapl.) 22^{c}–23^{b}. — c) D3.4 वस्त्राणि; S तीक्ष्णानि (for शस्त्राणि). — d) B Dn1 Ds D2–4.6.10 सर्वाणि (for सज्जानि).

23 K4 om. 23^{ab} (cf. v.l. 22). — a) G1.4 विविधाः (for पुरुषाः). — b) G1.5 कवचानि (for विविधा°). — c) K4 B Dn1 D1.3.4.6.8 उपाजह्रुः.

24 a) K D1–4.7 उत्सवमहो°; T2 G2.5 M3–5 उत्सवमिवो° (for उत्सव इवो°). — b) K D1–4.7 °नरा-(K3 °जना)कुलं; M1.2 °जनावृतं.

25 b) K3 °नागाश्वमत्स्यवान्; D10 °नागौघमीनवान्. — d) A few N MSS. कोष°.

26 Ds om. (hapl.) 26^{ab}. — a) G5 तत्रा°. — c) B3 D6 °मालाभि°; D3.4 °मालोद°; Ca °मालाद्रि° (as in text). — d) D3.4 रथपण्यामहा°; S (except G3) °ग्रहः.

27 a) K5 योधचंद्रोदयोद्धूतः; B5 द्रोणचंद्रोदयोद्भूतः; S (except T1) योगचंद्रोदयोद्धूतः. — b) D7 T1 G1.4.5 M1.2 °बलार्णवः; G3 °भवार्णवः. — Ds2 om. (hapl.) 27^{cd}. — c) K4 B (except B3) Dn1 Ds1 D6.8.10 व्यदृश्यत. K (except K4) D1.2 ततो राजन्; G5 महाराज. — d) K1(m as in text) कुरुराजमहार्णवः (= b).

Colophon lost in T1 on a broken fol. Dn2 D5.9 missing. — *Sub-parvan:* K1.2.5 Dn1 D2.7 अभिनिर्याणयात्रा; K3 पुरनिर्याणयात्रा; K4 B4 Ds D6.8.10 अभिनिर्यात्रा; B1–3.5 अभियात्रा; G5 निर्याणयात्रा; M निर्यात्रा. — *Adhy. name:* G1.4 M कुरुबलवर्णनं; G5 दुर्योधनबलकथनं. — *Adhy. no.* (figures, words or both): D6 43 (=143); T2 M 153 (M4 152); G1 155; G2.4.5 154; G3 151. — *S'loka no.:* K5 28.

151

☞ This adhy. is missing in Dn2 (cf. v.l. 5. 143. 2); the MS. is mostly ignored here. T1 reads this adhy. after adhy. 148.

C. 5. 5217
B. 5. 154. 2
K. 5. 154. 2

कथं च वर्तमाना वै स्वधर्मान्न च्यवेमहि ॥ २
दुर्योधनस्य कर्णस्य शकुनेः सौबलस्य च ।
वासुदेव मतज्ञोऽसि मम सभ्रातृकस्य च ॥ ३
विदुरस्यापि ते वाक्यं श्रुतं भीष्मस्य चोभयोः ।
कुन्त्याश्च विपुलप्रज्ञ प्रज्ञा कार्त्स्न्येन ते श्रुता ॥ ४
सर्वमेतदतिक्रम्य विचार्य च पुनः पुनः ।
यन्नः क्षमं महाबाहो तद्ब्रवीह्यविचारयन् ॥ ५
श्रुत्वैतद्धर्मराजस्य धर्मार्थसहितं वचः ।
मेघदुन्दुभिनिर्घोषः कृष्णो वचनमब्रवीत् ॥ ६
उक्तवानसि यद्वाक्यं धर्मार्थसहितं हितम् ।
न तु तन्निकृतिप्रज्ञे कौरव्ये प्रतितिष्ठति ॥ ७
न च भीष्मस्य दुर्मेधाः शृणोति विदुरस्य वा ।
मम वा भाषितं किंचित्सर्वमेवातिवर्तते ॥ ८
न स कामयते धर्मं न स कामयते यशः ।
जितं स मन्यते सर्वं दुरात्मा कर्णमाश्रितः ॥ ९
बन्धमाज्ञापयामास मम चापि सुयोधनः ।
न च तं लब्धवान्कामं दुरात्मा शासनातिगः ॥ १०
न च भीष्मो न च द्रोणो युक्तं तत्राहतुर्वचः ।
सर्वे तमनुवर्तन्ते ऋते विदुरमच्युत ॥ ११
शकुनिः सौबलश्चैव कर्णदुःशासनावपि ।
त्वय्ययुक्तान्यभाषन्त मूढा मूढममर्षणम् ॥ १२
किं च तेन मयोक्तेन यान्यभाषन्त कौरवाः ।
संक्षेपेण दुरात्मासौ न युक्तं त्वयि वर्तते ॥ १३
न पार्थिवेषु सर्वेषु य इमे तव सैनिकाः ।
यत्पापं यन्न कल्याणं सर्वं तस्मिन्प्रतिष्ठितम् ॥ १४
न चापि वयमत्यर्थं परित्यागेन कर्हिचित् ।
कौरवैः शममिच्छामस्तत्र युद्धमनन्तरम् ॥ १५
तच्छ्रुत्वा पार्थिवाः सर्वे वासुदेवस्य भाषितम् ।

---

1 b) T G2.5 °श्रुत्य (for °स्मृत्य).

2 d) K (except K4) D1.2.7 न च्यवेम स्वधर्मतः.

4 a) D3.4 तु (for [अ]पि). K4 B Dn1 Ds D3.4.6–8.10 तद्वाक्यं. — b) Ds D10 श्रुत्वा (for श्रुतं). — d) T1 G1.4 कार्त्स्न्येन भवता श्रुता; T2 G2 कार्त्स्न्येनैव च ते श्रुता.

5 a) Ds अशेषेण (for अतिक्रम्य). — c) K4 B Dn1 Ds D1.6.10 (by transp.) क्षमं यन्नो (B3 यन्नः क्षेमं); D2 यत्तु क्षमं; D3.4 यत्ते क्षमं. — d) G3 तन्न ब्रूहि; M3.4 (*inf. lin.* as in text).5 तन्मे ब्रूहि (for तद्ब्रवीहि). D7 अवधार° (for अविचार°). — K4 *repeats* 5cd (v.l. क्षमं यत्ते for यन्नः क्षमं).

6 K4 reads 7ab for 6ab, *repeating* it in its proper place. — c) D7 M (except M1) °निर्घोषं. — d) K (except K4) D1–4.7 इदं (for कृष्णो). K4 B (except B3) Dn1 Ds D6.8.10 वाक्यमथाब्रवीत् (for वचनम°).

7 Before 7, K1–3.5 B3 D1–4.7 ins. वासुदेव उ°; K4 B1.2.4 Dn1 Ds D6.8.10 कृष्ण उ°; T2 श्रीकृष्णः. — a) Ds G3 असि (for अस्मि). G3 यत्पापं (for यद्वाक्यं). — d) S (except M4) कौरवे (for °व्ये).

8 a) B1.3 S तु (for च). — b) K (except K3) B1–3 D1–4.6–8 च (for वा). — d) S (except T1 G1) सर्वमेतन्निरर्थकं.

9 a) K4 B Dn1 Ds D2–4.6.8.10 नैष (for न स). — b) K4 B Ds D6.8.10 नैष; Dn1 नैव; D2 न च (for न स).

10 b) D3.4 [अ]पि च (by transp.). — c) T1 G1.4 तत् (for तं). — d) K4 B Dn1 Ds D6.8.10 °त्मा पापनिश्चयः.

11 c) K4 D3.4.7.10 G1.3.4 M (except M5) तमन्व(G1 समन्व-; G4 तमनु)वर्तत; B3 तदनुमोदंत (for तमनुवर्तन्ते). — d) K (except K4) D7 G5 M1 अच्युतं; D3.4 अप्युत (for अच्युत).

12 a) B3 सौबलश्चापि; S सौबलेयश्च (for सौबलश्चैव). — d) G1 मूढं (for मूढा). T1 G1.4 दृढम् (for मूढम्). D7 अमर्षणाः; T1 G4 अमर्षिणः; M1 (*inf. lin.*).2 अनुव्रताः (for अमर्षणम्).

13 a) K1.2 ममो° (for मयो°). — b) K4 B Dn1 D6 T1 G1.4 यान्यभाषत कौरवः. Ca.s cite यान्यभाषंत (as in text). — d) B2 युक्तं न (by transp.); Cs as in text.

14 a) K4 B2.4.5 Dn1 Ds D2–4.6.8.10 पार्थिवेषु न (by transp.). — c) K3 D3.4 S यदकल्याणं; D1 यच्च क°. — d) S तस्मिन्सर्वं (by transp.).

15 a) K3 D1.7 अत्यंतं; B3 Ds D10 अप्यर्थं; Cd.s अत्यर्थं (as in text). — b) B2 केन° (for कर्हि°). — c) K (except K4) D1.2.7 शममिच्छाम कुरुभिः.

अब्रुवन्तो मुखं राज्ञः समुदैक्षन्त भारत ॥ १६
युधिष्ठिरस्त्वभिप्रायमुपलभ्य महीक्षिताम् ।
योगमाज्ञापयामास भीमार्जुनयमैः सह ॥ १७
ततः किलकिलाभूतमनीकं पाण्डवस्य ह ।
आज्ञापिते तदा योगे समहृष्यन्त सैनिकाः ॥ १८
अवध्यानां वधं पश्यन्धर्मराजो युधिष्ठिरः ।
निष्टनन्भीमसेनं च विजयं चेदमब्रवीत् ॥ १९
यदर्थं वनवासश्च प्राप्तं दुःखं च यन्मया ।
सोऽयमस्मानुपैत्येव परोऽनर्थः प्रयत्नतः ॥ २०
यस्मिन्यत्नः कृतोऽस्माभिः स नो हीनः प्रयत्नतः ।
अकृते तु प्रयत्नेऽस्मानुपावृत्तः कलिर्महान् ॥ २१
कथं ह्यवध्यैः संग्रामः कार्यः सह भविष्यति ।
कथं हत्वा गुरून्वृद्धान्विजयो नो भविष्यति ॥ २२
तच्छ्रुत्वा धर्मराजस्य सव्यसाची परंतपः ।
यदुक्तं वासुदेवेन श्रावयामास तद्वचः ॥ २३
उक्तवान्देवकीपुत्रः कुन्त्याश्च विदुरस्य च ।
वचनं तत्त्वया राजन्निखिलेनावधारितम् ॥ २४
न च तौ वक्ष्यतोऽधर्ममिति मे नैष्ठिकी मतिः ।
न चापि युक्तं कौन्तेय निवर्तितुमयुध्यतः ॥ २५
तच्छ्रुत्वा वासुदेवोऽपि सव्यसाचिवचस्तदा ।
स्मयमानोऽब्रवीत्पार्थमेवमेतदिति ब्रुवन् ॥ २६
ततस्ते धृतसंकल्पा युद्धाय सहसैनिकाः ।
पाण्डवेया महाराज तां रात्रिं सुखमावसन् ॥ २७

C. 5. 5242
B. 5. 154. 27
K. 5. 154. 27

इति श्रीमहाभारते उद्योगपर्वणि एकपञ्चाशदधिकशततमोऽध्यायः ॥ १५१ ॥

---

16 Before 16, K_{3-5} Dn_1 D_5 $D_{1.3.4.6.8.10}$ ins. वैशंपायन उ°. — [b]) S वासुदेवेन. — D_6 om. 16^c–17^b.

17 D_6 om. 17^{ab} (cf. v.l. 16). — [b]) K_4 अभि-लप्स्य; $B_{2.4.5}$ Dn_1 D_5 $D_{1.3.10}$ अभिलक्ष्य; B_5 अभिलभ्य; $M_{1.2}$ उपलक्ष्य (for उपलभ्य).

18 [a]) S (except G_1 M_2) किलिकिला-. K_4 D_6 -शब्दम् (for -भूतम्). Ca. d. s किलकिलाभूतं (as in text). — [b]) Dn_1 $D_{3.4}$ T_2 $G_{2.3.5}$ पांडवैः सह (for °वस्य ह).

19 [c]) K B Dn_1 D_5 $D_{6.8-10}$ निः(*or* नि)श्वसन् (K_5 निरीक्षन्); $D_{3.4}$ अर्जुनं; D_7 नकुलं; Ca. d निष्टनन् (as in text). — [d]) $D_{3.4}$ विलपन् (for विजयं). K_4 त्विदम्; $D_{3.4}$ इदम्; T_1 चैवम् (for चेदम्).

20 [a]) B_3 D_{10} G_5 M_1(*inf. lin.*)$_{.2.3.5}$ °वासं च. — [c]) B_3 D_5 $G_{3.5}$ M_{3-5} उपेत्यैव; D_7 T_1 G_4 उपेत्येव (for उपैत्येव). — [d]) D_1 परानंदः; D_7 परानर्थः.

21 [a]) K_4 B Dn_1 D_5 $D_{1.3.4.6.10}$ T G (except G_3) तस्मिन्; Ca. d यस्मिन् (as in text). — [c]) $K_{1.2.5}$ सत्कृते (for अकृते). K_5 B_3 च; $M_{1.2}$ [ऽ]पि (for तु). D_7 कृतेपि यत्ने अस्मान्वै.

22 [b]) K_4 $D_{3.4}$ स्वार्यैः (for कार्यैः). — [c]) K (except K_4) G_3 कुरून् (for गुरून्). — [d]) $D_{3.4}$ नु (for नो).

23 [d]) D_5 D_1 T_1 $G_{1.3}$ तत्वतः (for तद्वचः).

25 [a]) K_5 [अ]ति-; T G (except G_3) ते; Ca. d तौ (as in text). D_2 पश्यतः; D_7 विंदतः; D_5 T $G_{1.2.5}$ M_{3-5} वक्ष्यते; G_4 वर्तते; Ca. d वक्ष्यतः (as in text). — [c]) K_4 B Dn_1 D_5 $D_{6.8.10}$ नापि युक्तं च; $D_{3.4}$ नापि युक्तं तु (for न चापि युक्तं). B_2 ते राजन् (for कौन्तेय). — [d]) $D_{3.4}$ निवर्तयितुमद्य वै; S विनिवर्तेत युद्धतः. Ca. d cite अयुध्यतः.

26 [c]) K_4 B (except B_3) Dn_1 D_5 $D_{6.8.10}$ M_{3-5} वाक्यं (for पार्थं). — [d]) K_4 B (for B_3 see below) Dn D_5 $D_{6.8.10}$ पार्थमेवम्; B_3 $G_{1.2}$ एवमेवम्; M_{3-5} पार्थमेतद् (for एवमेतद्). K_5 B_2 $D_{1-4.7}$ G_3 ध्रुवं (for ब्रुवन्).

27 [a]) K_5 $D_{3.4}$ कृत° (for धृत°). — [d]) D_7 सुखमा-विशन्; $M_{3.4}$(*inf. lin.* as in text)$_{.5}$ सुखिनोवसन् (for सुखमा°).

Colophon. Dn_2 $D_{5.9}$ missing. — *Sub-parvan:* $K_{1-3.5}$ D_2 G_5 अभिनिर्याणयात्रा; K_4 B D_5 $D_{6.8.10}$ $M_{1.2}$ अभिनिर्यात्रा (B_3 अभियात्रा); Dn_1 विनिर्यात्रा; D_7 निर्याण-यात्रा; T_1 भगवत्प्रतियान. — *Adhy. name:* G_5 $M_{1.2}$ युधिष्ठिरयुद्ध(M_2 om. युद्ध)प्रोत्साहनं. — *Adhy. no.* (figures, words or both): D_6 44 (=144); T_1 M_4 153; T_2 $M_{1-3.5}$ 154; G_1 156; $G_{2.4.5}$ 155; G_3 152. — *S'loka no.:* K_5 Dn_1 27.

१५२

C. 5. 5243
B. 5. 155. 1
K. 5. 155. 1

वैशंपायन उवाच ।
व्युषितायां रजन्यां तु राजा दुर्योधनस्ततः ।
व्यभजत्तान्यनीकानि दश चैकं च भारत ॥ १
नरहस्तिरथाश्वानां सारं मध्यं च फल्गु च ।
सर्वेष्वेतेष्वनीकेषु संदिदेश महीपतिः ॥ २
सानुकर्षाः सतूणीराः सवरूथाः सतोमराः ।
सोपासङ्गाः सशक्तीकाः सनिषङ्गाः सपोथिकाः ॥ ३
सध्वजाः सपताकाश्च सशरासनतोमराः ।
रज्जुभिश्च विचित्राभिः सपाशाः सपरिस्तराः ॥ ४
सकचग्रहविक्षेपाः सतैलगुडवालुकाः ।
साशीविषघटाः सर्वे ससर्जरसपांसवः ॥ ५
सघण्टाफलकाः सर्वे वासीवृक्षादनान्विताः ।
व्याघ्रचर्मपरीवारा वृताश्च द्वीपिचर्मभिः ॥ ६
सवस्तयः सशृङ्गाश्च सप्रासविविधायुधाः ।

152

☞ This adhy. is missing in Dn2 (cf. v.l. 5. 143. 2); the MS. is mostly ignored here.

1 ^{a}) K4 B (except B2) Dn1 Ds D6-8.10 व्युष्टायां वै (B4 तु) (for व्युषितायां). Ca cites व्युष्टायां. K4 B5 Dn1 Ds D6.7 हि; B4 Ds वै (for तु). — ^{b}) K1.2 B (except B4) D1.7 T G1.2.4 तदा (for ततः).

2 ^{c}) K5 D7 S (except G1) तेषु (for [ए]तेषु). K3 सैन्येषु (for [अ]नीकेषु). — ^{d}) K4 Dn1 Ds D6.8.10 नराधिपः (for मही°).

3 ^{a}) G3 सधनुष्काः; Ca. d. s सानुकर्षाः (as in text). T2 G2 समीनीकाः; Ca. d. s सतूणीराः (as in text). — ^{d}) K1-3.5 B5 D1.2 सपावकाः; K4 B3.4 Dn1 Ds D6.8.10 °हर्ष्टिकाः; B2 G4 °सायकाः; D3.4 °यंत्रकाः; D7 °सेवकाः; T2 G2.5 °गोधिकाः; G3 °नायकाः (for °पोथिकाः). Ca. d cite पावकः.

4 ^{b}) D3.4 सशरत्सरु°; T G M1 (*inf. lin.*) °सायकाः; Ca.s as in text. — ^{c}) D3.4 रज्जुभिर्विविधाभिश्च. — ^{d}) K B2.4 Ds D1-4.6-8.10 G3 Cn °परिच्छदाः (Cnp as in text).

5 ^{a}) K5 °कचग्राह°; G3 °चक्रग्रह°; Cs.np °करग्रह°; Ca. d as in text. — ^{c}) D3.4 चैव (for सर्वे). — ^{d}) A few MSS. °पांशवः.

6 ^{a}) B1.4.5 D1.3.4 T1 G1 Cn सघंट°; T2 सघष्टि°; G2 सघृष्टि°. D7 सकीलक्रकचाः सर्वे (= line 5 of 543*). Ca. d. s cite घंटाफलकं. — After 6^{a}, K (K3.4 om. lines 4-5) B Dn1 Ds D2.6.8.10 ins.:

543* सायोगुडजलोपलाः ।
सशालभिन्दिपालाश्च समधूच्छिष्टमुद्गराः ।
सकाण्डदण्डकाः सर्वे ससीरविषतोमराः ।
सशूर्पपिटकाः सर्वे सदात्राङ्कुशतोमराः ।
सकीलक्रकचाः सर्वे

[(L. 1) D8 सप्रासलगुडोपलाः. Ca. d cite अयोगुडः. — (L. 2) K1-3.5 Ca. d ससार-; B3 Ds1 D8.10 Cnp सशूल- (for सशाल-). ※ Nil: सशूलेति गौडपाठः। ※ — (L. 3) K1 सदंडकाष्टकाः; K2.3.5 B2 D2.7 Ca. d. s. np सदंडकंटकाः (for सकाण्डदण्डकाः). K3 सदाशंकुसरोषसः; K4 D7 सशीरविषतोमराः; D6.8 सशार°. Ca. d. s cite सीर°. — (L. 4) K1.2.5 Ds D6.7 सशूर्प°; B3 सगुल्मविटपाः; B4 सगुल्मपिटकाः. Ca cites गुल्मपिटके, Cd सूर्पपिटके, Cs शूलपिटकं. K1.2.5 B (except B5) D2 Ca. d °रोधसः (for °तोमराः). — (L. 5) B1.4.5 °कवचाः; Ca. d. np °क्रकचाः (as above).]

— K4 om. 6^{bcd}. — ^{b}) K1 वासो भक्ष्यो°; K3.5 B D2 Cn वाशीवृक्षा°; Dn1 वायुवृक्षा°; D1 वामवृक्षा°; D3.4 सयंत्रांकुशतोमराः; D10 वास्यवृक्षादनान्विताः; S वासिवृक्षादनीयु(G3 °यु-; G5 °कु-; M °यु)ताः. Ca. d. np cite वासी, and Ca. d वृक्षादनं. — S reads 6^{cd} after 7. — ^{c}) B2.3 D2-4 °परीधानाः. — ^{d}) B1.4 Dn1 Ds D6.8.10 द्वीपिचर्मा(Ds1 D6.8 °र्मै)वृताश्च ते; S वृता गोद्वीपिचर्मभिः

7 ^{a}) K4 सत्सूर्यः (sic); B (except B2) Dn1 Ds D3.4.6-8.10 G5 सहर्ष्टयः (for सवस्तयः). Ca. d cite बस्तिः, Cs ऋष्टिः. — ^{b}) K4 D6.7 सप्राश-; D10 G5 सप्राशा. Ca. d cite प्रासः. — ^{c}) G3.4 M4 (*inf. lin.*) सकुंतालाः; M3-5 सकुंदालाः (for सकुद्दालाः). — ^{d}) K D3.4.7 सचैल-; B4.5 Ds D2 सचेल-; T1 G1.4.5 समधु-; G2 समंद-; G3 M समल- (for सतैल-). K3 D1 S -क्षौद्र- (for -क्षौम-). B5 Ds -वाससः (for -सर्पिषः). — S reads 6^{cd} after 7 (G3.4, after 544*). — After 7, N (Dn2 missing) G3.4 ins.:

544* रुक्मजालप्रतिच्छन्ना नानामणिविभूषिताः ।

K3.5 cont.:

545* व्याघ्रचर्मपरीधानाः सुवेषाः समलंकृताः ।
[Cf. 6^{c} and v.l.]

सकुठाराः सकुद्दालाः सतैलक्षौमसर्पिषः ॥ ७
चित्रानीकाः सुवपुषो ज्वलिता इव पावकाः ।
तथा कवचिनः शूराः शस्त्रेषु कृतनिश्रमाः ॥ ८
कुलीना हययोनिज्ञाः सारथ्ये विनिवेशिताः ।
बद्धारिष्टा बद्धकक्ष्या बद्धध्वजपताकिनः ॥ ९
चतुर्युजो रथाः सर्वे सर्वे शस्त्रसमायुताः ।
संहृष्टवाहनाः सर्वे सर्वे शतशरासनाः ॥ १०
धुर्ययोर्हययोरेकस्तथान्यौ पार्ष्णिसारथी ।
तौ चापि रथिनां श्रेष्ठौ रथी च हयवित्तथा ॥ ११
नगराणीव गुप्तानि दुरादेयानि शत्रुभिः ।
आसन्रथसहस्राणि हेममालीनि सर्वशः ॥ १२
यथा रथास्तथा नागा बद्धकक्ष्याः स्वलंकृताः ।
बभूवुः सप्त पुरुषा रत्नवन्त इवाद्रयः ॥ १३
द्वावङ्कुशधरौ तेषु द्वावुत्तमधनुर्धरौ ।
द्वौ वरासिधरौ राजन्नेकः शक्तिपताकधृक् ॥ १४
गजैर्मत्तैः समाकीर्णं सवर्मायुधकोशकैः ।
तद्बभूव बलं राजन्कौरव्यस्य सहस्रशः ॥ १५
विचित्रकवचामुक्तैः सपताकैः स्वलंकृतैः ।
सादिभिश्चोपसंपन्ना आसन्नयुतशो हयाः ॥ १६
सुसंग्राहाः सुसंतोषा हेमभाण्डपरिच्छदाः ।
अनेकशतसाहस्रास्ते च सादिवशे स्थिताः ॥ १७
नानारूपविकाराश्च नानाकवचशस्त्रिणः ।

C. 5. 5263
B. 5. 155. 21
K. 5. 155. 21

---

8 a) K1.2 सुवहवः; K3.5 D1 सुबहुशः; S वपुष्मंतः (for सुवपुषः). — After 8^{ab}, G4 M5 read 10^{cd}; T1 G5 read 8^{cd} (with 9^{ab}) after 10. — d) K4.5 B (except B2) Dn1 D3.4.8 T1 G4 °निश्रयाः; Ca °निश्रमाः (as in text).

9 T1 G5 read 9^{ab} (with 8^{cd}) after 10. — b) K1.2 D3.4.7 G3 M [ऽ]भि-; Cs वि- (as in text). — *Ds* om. 9^{c}–10^{d}; *G4* om. (hapl.) 9^{c}–10^{b}. — c) A few N MSS. °कक्षाः. D3.4 बद्धासयो बद्धरिष्टाः. — After 9, N (except Ds; Dn2 missing) ins.:

546* बद्धाभरणनिर्व्यूहा बद्धचर्मासिपट्टिशाः ।

[K5 B (except B2) D6 Ca.d.n.s °तिर्यूहा (for °निर्व्यूहा).]

10 Ds om. 10; G4 om. 10^{ab} (cf. v.l. 9). — a) D3.4 चतुर्युगरथाः. — B5 om. (hapl.) 10^{bc}. — b) K1.2.5 D7 सर्वे चैव श(K5 सि)तोत्तराः; K3 D1 सर्वे चैव सतोमराः; K4 B (B5 om.) Dn1 D6.8.10 सर्वे चोत्तमवाजिनः; D2 सर्वे चैव सतां नराः; D3.4 सर्वे च सहतोमराः; T G (G4 om.) सर्वशस्त्रसमायुताः. — G4 M5 read 10^{cd} after 8^{ab}. — c) K1–3.5 D1–4.7 सपार्ष्णिवाहकाः सर्वे; K4 B1.4 Dn1 D6.8.10 सप्रासऋ(K4 °कृ)ष्टिकाः सर्वे; B2 Ca सप्रासिवाहकाः सर्वे; B3 सप्राणऋष्टिकाः सर्वे; T1 G1.3.4 संहृष्टवदनाः सर्वे. Cd cites वाहकाः. — d) T2 G2.3.5 शर° (for शत°). — After 10, T1 G5 read 8^{c}–9^{b}.

11 b) S (except T2) अन्यः (for अन्यौ). T1 G1 M प्राष्ठि-; G3.4 प्रष्ठि-; G5 प्रष्ठ- (for पार्ष्णि-). S (except T2) -सारथिः. — c) K (except K4) D7 धनुषि (for रथिनां). — d) K (except K4) D1 रथे च. K1.2 हयकोविदौ; K5 D1 हयवित्तमौ.

12 a) D6 T G च (for [इ]व). — b) K1.4 B Dn1 Ds D3.4.6.8.10 दुराधर्षाणि; D1 °धेयानि; Ca.s as in text.

13 b) N (mostly) बद्धकक्षाः. — c) D3.4 ते बभुः (for बभूवुः). — d) D3.4 अचलाः (for अद्रयः).

14 a) K4 B Dn1 Ds D3.4.6.8.10 तत्र (*for* तेषु). — b) D3.4 द्वौ तु तत्र; M (except M1) द्वावुत्तर-; Ca द्वौ एव च (for द्वावुत्तम-). — d) K4 B Dn1 Ds D6.7.10 Ca °पिनाकधृक् (B3.5 °धृत्; D2 °भृत्). S एक-(T2 G1.2 °कः)च्छत्रपताकधृक् (T °धृत्).

15 b) K1 Dn1 T2 G2 सचर्मायुध-. K (except K4) B2 D7 -भूषणैः; a few other MSS. -कोपकैः (for -कोशकैः). — d) K4 B2.4 Dn1 Ds D2–4.6.8.10 महात्मनः (for सह°).

16 a) K4 B1–3.5 Dn1 Ds D1.3.4.6.8.10 T1 आमुक्तकवचैः युक्तैः (B2 शूरैः; Ds मुक्तैः); B4 आमुक्तचित्रकवचैः; D2.7 G3 विचित्रकवचायुक्तैः. — b) D6.8 G4 M2.4 सुपताकैः. — c) K4 B Dn1 Ds D6.8.10 चोपपन्नास्तु (B1–4 °श्च); D3.4 चैव संपन्ना; T2 G2 चापि सं°. — d) B (except B5) Dn1 Ds D6.8.10 तथा चा° (for आसन्न°).

17 a) K3.5 B1.3 D7 S सुसंग्रहाः; K4 B4 D6 Cn असंग्राहाः; Dn1 ससंग्राहाः; *D1.2* असंग्रहाः; *D3.4* असंग्राह्याः. K4 B Dn1 Ds D6.8.10 सुसंपन्नाः; D3.4 सुसंपन्न-. — d) K1.2 तत्र; K4 B2.4.5 Dn1 Ds D6.8.10 सर्वे; D8 बले (for ते च). D3.4 तेजसादित्यसंनिभाः.

C. 5. 5263
B. 5. 155. 21
K. 5. 155. 21

पदातिनो नरास्तत्र बभूवुर्हेममालिनः ॥ १८
रथस्यासन्दश गजा गजस्य दश वाजिनः ।
नरा दश हयस्यासन्पादरक्षाः समन्ततः ॥ १९
रथस्य नागाः पञ्चाशन्नागस्यासञ्शतं हयाः ।
हयस्य पुरुषाः सप्त भिन्नसंधानकारिणः ॥ २०
सेना पञ्चशतं नागा रथास्तावन्त एव च ।
दश सेना च पृतना पृतना दश वाहिनी ॥ २१
वाहिनी पृतना सेना ध्वजिनी सादिनी चमूः ।
अक्षौहिणीति पर्यायैर्निरुक्ताथ वरूथिनी ।
एवं व्यूढान्यनीकानि कौरवेयेण धीमता ॥ २२
अक्षौहिण्यो दशैका च संख्याताः सप्त चैव ह ।
अक्षौहिण्यस्तु सप्तैव पाण्डवानामभूद्बलम् ।
अक्षौहिण्यो दशैका च कौरवाणामभूद्बलम् ॥ २३
नराणां पञ्चपञ्चाशदेषा पत्तिर्विधीयते ।
सेनामुखं च तिस्रस्ता गुल्म इत्यभिसंज्ञितः ॥ २४
दश गुल्मा गणस्त्वासीद्गणास्त्वयुतशोऽभवन् ।
दुर्योधनस्य सेनासु योत्स्यमानाः प्रहारिणः ॥ २५
तत्र दुर्योधनो राजा शूरान्बुद्धिमतो नरान् ।
प्रसमीक्ष्य महाबाहुश्चक्रे सेनापतींस्तदा ॥ २६
पृथगक्षौहिणीनां च प्रणेतॄन्नरसत्तमान् ।
विधिपूर्वं समानीय पार्थिवानभ्यषेचयत् ॥ २७
कृपं द्रोणं च शल्यं च सैन्धवं च महारथम् ।
सुदक्षिणं च काम्बोजं कृतवर्माणमेव च ॥ २८
द्रोणपुत्रं च कर्णं च भूरिश्रवसमेव च ।
शकुनिं सौबलं चैव बाह्लीकं च महारथम् ॥ २९
दिवसे दिवसे तेषां प्रतिवेलं च भारत ।
चक्रे स विविधाः संज्ञाः प्रत्यक्षं च पुनः पुनः ॥ ३०
तथा विनियताः सर्वे ये च तेषां पदानुगाः ।
बभूवुः सैनिका राजन्राज्ञः प्रियचिकीर्षवः ॥ ३१

इति श्रीमहाभारते उद्योगपर्वणि द्विपञ्चाशदधिकशततमोऽध्यायः ॥ १५२ ॥ समाप्तमभिनिर्याणपर्व ॥

---

18 ^{a}) D3.4 °विचित्राश्च. Ca. d cite विकाराः (as in text). — ^{b}) D7 °धारिणः. — ^{c}) K3 पदातयो.

19 ^{d}) K1–3 D1 सहस्रशः (for समन्ततः).

20 ^{a}) K1.2 D6.8 T2 G1.3.4 पंचासन् (for पञ्चाशत्). — ^{b}) T2 G1.4.5 तथा (for शतं).

21 ^{a}) M2.5 पंचाशतं. — ^{b}) B3.5 हि (for च). — After 21^{ab}, T G (except G3) ins.:

547* पञ्चाशच्च शतं चाश्वा नराः पञ्चगुणास्ततः ।

22 ^{a}) K4 B Dn1 Ds D6.8.10 सेना तु (B3.5 Dn1 च) वाहिनी चैव. — ^{b}) D3.4 चैव सा (for सादिनी). K4 B Dn1 Ds D6.8.10 पृतना ध्वजिनी चमूः. — ^{c}) A few MSS. अक्षोहिणी. K5 D1 M5 हि; B2 Ds तु; D3.4 च (for [इ]ति). — ^{d}) K4.5 B Dn1 Ds D3.4.6.8.10 च (for [अ]थ).

23 ^{a}) A few MSS. अक्षोहिण्यः. — K3 om. (hapl.) 23^{b}–23^{e}; D1 om. 23^{bcd}. — ^{b}) K1 B2 सप्त एव; K2 तत्र चैव; D3.4 सर्वं एव (for सप्त चैव). K (K3 om.) B2.5 D2.3 G4 हि; Ds च (for ह). For 23^{b}, G5 reads 23^{f} (for the first time), *repeating* it in its proper place. — ^{e}) A few MSS. अक्षोहिण्यः. K1.2 D7 च (for तु). — K1.2.5 B4 D2–4 T2 G2 om. (hapl.) 23^{ef}.

24 ^{b}) T2 G2.4 एषां (for एषा). — ^{c}) K4 D6.8.10 तु (for च). — ^{d}) K3 B2 D1 °धीयते; K4 B5 °शब्दितः; B4 Dn1 °शब्दितं; Ds D2 °संज्ञितं; S (except G5 M1.2) °संज्ञिताः (for °संज्ञितः).

25 ^{a}) K4 B Dn1 Ds D2–4.6.10 T1 Ca त्रयो; Cd दश (as in text). D1.3 गुल्मो; G3–5 गुल्म- (for गुल्मा). T G (except G3) गणास्त्वा(G5 °श्चा)सन् (for गणास्त्वासीत्). — ^{b}) K2 B3 Dn1 Ds D6.8.10 गणस् (for गणास्). Ds D6.8.10 भवेत् (for ऽभवन्). — ^{c}) K3.5 D6.8 सेनास्तु; D3.4 °थां (for °सु).

26 ^{a}) D1 S (except T2 G1.2) ततो (for तत्र). T1 G4 राज्ञः (for राजा). — ^{b}) Ds वरान् (for नरान्). — ^{c}) D10 T2 G1.2 महाबाहून्. — ^{d}) K3 ततः; K5 Ds D8 G3 तथा (for तदा).

27 ^{b}) K1.3 D2 रथ°; K2 अथ; G1.4 नृप° (for नर°). — ^{c}) K4 B Dn1 Ds D1.6.8.10 विधिवत्पूर्वमानीय. — ^{d}) K4 B Dn1 Ds D3.4.6.8.10 °भाषत (for °षेचयत्).

28 ^{b}) K4 B2.4.5 Dn1 Ds D6–8.10 जयद्रथं (for महा°). — ^{c}) T G2 कांभोजं.

29 ^{a}) K3 T1 विकर्णं (for च कर्णं). — ^{d}) Some MSS. बाह्लिकं. K3.4 B2.4.5 Dn1 Ds D7.8.10 महाबलं.

30 ^{a}) K1.2 B3 D2–4.7 चैषां (for तेषां). — ^{b}) D2

१५३

वैशंपायन उवाच ।

ततः शांतनवं भीष्मं प्राञ्जलिर्धृतराष्ट्रजः ।
सह सर्वैर्महीपालैरिदं वचनमब्रवीत् ॥ १
ऋते सेनाप्रणेतारं पृतना सुमहत्यपि ।
दीर्यते युद्धमासाद्य पिपीलिकपुटं यथा ॥ २
न हि जातु द्वयोर्बुद्धिः समा भवति कर्हिचित् ।
शौर्यं च नाम नेतॄणां स्पर्धते च परस्परम् ॥ ३
श्रूयते च महाप्राज्ञ हैहयानमितौजसः ।
अभ्ययुर्ब्राह्मणाः सर्वे समुच्छ्रितकुशध्वजाः ॥ ४
तानन्वयुस्तदा वैश्याः शूद्राश्चैव पितामह ।
एकतस्तु त्रयो वर्णा एकतः क्षत्रियर्षभाः ॥ ५
ते स्म युद्धेष्वभज्यन्त त्रयो वर्णाः पुनः पुनः ।
क्षत्रियास्तु जयन्त्येव बहुलं चैकतो बलम् ॥ ६
ततस्ते क्षत्रियानेव पप्रच्छुर्द्विजसत्तमाः ।
तेभ्यः शशंसुर्धर्मज्ञा याथातथ्यं पितामह ॥ ७
वयमेकस्य शृणुमो महाबुद्धिमतो रणे ।
भवन्तस्तु पृथक्सर्वे स्वबुद्धिवशवर्तिनः ॥ ८
ततस्ते ब्राह्मणाश्चक्रुरेकं सेनापतिं द्विजम् ।
नयेषु कुशलं शूरमजयन्क्षत्रियांस्ततः ॥ ९
एवं ये कुशलं शूरं हिते स्थितमकल्मषम् ।

C. 5. 5237
B. 5. 155. 10
K. 5. 156. 10

बलं प्रति (for प्रतिवेलं). — ^{c}) $D_{3.4}$ च; G_4 [ऽ]थ (for स). K_4 B Dn_1 Ds $D_{2-4, 6, 8, 10}$ पूजाः; Ca. d संज्ञाः (as in text).

31 ^{a}) T_1 G (except G_2) [अ]पि (for वि·). — ^{b}) M_{3-5} वशा° (for पदा°). — After 31^{ab}, B_2 $D_{2.8}$ ins.:

548* हृष्टाः पुष्टाः सुसंनद्धा विक्रमे दृढनिश्चयाः ।

— ^{c}) K_{1-3} $D_{1.7}$ सव; K_4 $B_{1.4}$ राज्ञां; B_2 Dn_1 Ds $D_{6.8.10}$ राज्ञः (for राजन्). — ^{d}) K_4 Ds $D_{6.8.10}$ प्रियं राजंश्रि°; $B_{1.4}$ Dn_1 प्रियं राज्ञश्रि°.

Colophon. Dn_2 $D_{5.9}$ missing. — *Sub-parvan:* $K_{1.2.5}$ $D_{2.7}$ T_1 $G_{1.4.5}$ अभिनिर्याणयात्रा; B_3 अभियात्रा; K_4 $B_{1.2.4.5}$ Dn_1 Ds $D_{6.8.10}$ M_{1-4} अभि(M_{2-4} om. अभि)निर्यात्रा. — *Adhy. name:* T_1 $G_{1.5}$ M धार्तराष्ट्रसेनाविभागकरणं (T_1 G_1 °कथनं); G_4 धार्तराष्ट्रसेनाविभागं. — *Adhy. no.* (figures, words or both): D_6 45 (=145); D_7 T_2 M 155 (M_4 154); T_1 $G_{2.4.5}$ 156; G_1 157; G_3 153. — *S'loka no.:* K_5 40; Dn_1 35.

153

☞ This adhy. is missing in Dn_2 (cf. v.l. 5. 143. 2). Dn_1 om. this adhy. The MSS. are mostly ignored here.

2 ^{d}) T_1 $G_{4.5}$ °गणो; Ca. d °पुटं (as in text).

3 ^{c}) K_2 बलमनेतॄणां; B_4 $D_{1.6.8.10}$ च बलने°; $D_{3.4}$ च वर्धते नृणां; S च जायते नृणां (for च नाम नेतॄणां). — ^{d}) D_2 T_2 $G_{2.3.5}$ M_{3-5} स्पर्धते.

4 ^{a}) K_5 $D_{2.7}$ T_2 G_2 M (except M_2) हि (for च). — ^{b}) S (except T_2 G_2) हेहयान्; D_2 both हैहयान् and क्षत्रियान्. — ^{d}) K_3 D_2 (*sup.lin.*) समुद्धृत°; K_5 समुत्थित°; $D_{3.4}$ °कुशायुधाः.

5 K_4 om. 5. — ^{a}) $B_{2.4.5}$ D_{1-4} अभ्ययुस् (for अन्वयुस्). S (except T_2 $G_{1.2}$) तथा (for तदा).

6 ^{a}) K_3 B_3 तेषु; K_4 B_4 Ds $D_{1.6.8.10}$ ततो; $D_{3.4}$ ते तु; D_7 तेपि (for ते स्म). B_{1-3} D_2 युद्धेषु भज्यंते (B_2 D_2 °त); D_7 युद्धे व्यभज्यंत; T $G_{1.2.5}$ M युद्धे प्रभज्यंते (G_5 $M_{1.2.4}$ °त); G_3 युद्धे प्रवर्तंते; G_4 युद्धे प्रसज्यंते. — After 6^{ab}, G_4 ins.:

549* तथापि नियताः सर्वे क्षत्रियास्तु जघन्यजाः ।

— ^{c}) K_4 B Ds $D_{1.2.6.8.10}$ च (for तु). — ^{d}) D_2 चैव तद् (for चैकतो).

7 ^{a}) B_2 तान्; T_2 तु (for ते). — ^{c}) $K_{1.3}$ $G_{2.4}$ धर्मज्ञ. — ^{d}) $K_{1.4}$ D_{10} T G (except G_1) M_5 यथातथ्यं (G_2 °त्वं).

8 ^{a}) K_4 B Ds $D_{6.10}$ शृण्वानाः (for शृणुमः). — ^{b}) T_1 यदा; $G_{1.4}$ यथा (for महा-). $D_{3.4}$ वचः (for रणे). — ^{c}) $B_{1.2.4}$ पृथग्भूताः (for पृथक्सर्वे).

9 ^{b}) G_5 रणे (for द्विजम्). — D_6 om. 9^{c}–11^{d}. — ^{c}) $B_{1.4.5}$ D_{2-4} नये सुकुशलं शूरं. — K_3 om. (hapl.) 9^{d}–10^{a}. — ^{d}) K_4 D_{2-4} G_1 तदा (for ततः).

10 K_3 om. 10^{a}; D_6 om. 10 (cf. v.l. 9). — ^{b}) B Ds $D_{2-4, 10}$ हितेऽभिरतम्; D_7 हिते रतम् (for हिते स्थितम्). — ^{d}) K_{1-3} तरंति (for जयन्ति).

11 D_6 om. 11 (cf. v.l. 9). — ^{a}) K_{1-3} $D_{1.2}$

C. 5. 5297 B. 5. 156. 10 K. 5. 158. 10

सेनापतिं प्रकुर्वन्ति ते जयन्ति रणे रिपून् ॥ १०
भवानुशनसा तुल्यो हितैषी च सदा मम ।
असंहार्यः स्थितो धर्मे स नः सेनापतिर्भव ॥ ११
रश्मीवतामिवादित्यो वीरुधामिव चन्द्रमाः ।
कुबेर इव यक्षाणां मरुतामिव वासवः ॥ १२
पर्वतानां यथा मेरुः सुपर्णः पततामिव ।
कुमार इव भूतानां वसूनामिव हव्यवाट् ॥ १३
भवता हि वयं गुप्ताः शक्रेणेव दिवौकसः ।
अनाधृष्या भविष्यामस्त्रिदशानामपि ध्रुवम् ॥ १४
प्रयातु नो भवानग्रे देवानामिव पावकिः ।
वयं त्वामनुयास्यामः सौरभेया इवर्षभम् ॥ १५

भीष्म उवाच ।

एवमेतन्महाबाहो यथा वदसि भारत ।
यथैव हि भवन्तो मे तथैव मम पाण्डवाः ॥ १६
अपि चैव मया श्रेयो वाच्यं तेषां नराधिप ।
योद्धव्यं तु तवार्थाय यथा स समयः कृतः ॥ १७
न तु पश्यामि योद्धारमात्मनः सदृशं भुवि ।
ऋते तस्मान्नरव्याघ्रात्कुन्तीपुत्राद्धनंजयात् ॥ १८
स हि वेद महाबाहुर्दिव्यान्यस्त्राणि सर्वशः ।
न तु मां विवृतो युद्धे जातु युध्येत पाण्डवः ॥ १९
अहं स च क्षणेनैव निर्मनुष्यमिदं जगत् ।
कुर्यां शस्त्रबलेनैव ससुरासुरराक्षसम् ॥ २०
न त्वेवोत्सादनीया मे पाण्डोः पुत्रा नराधिप ।
तस्माद्योधान्हनिष्यामि प्रयोगेणायुतं सदा ॥ २१
एवमेषां करिष्यामि निधनं कुरुनन्दन ।
न चेत्ते मां हनिष्यन्ति पूर्वमेव समागमे ॥ २२
सेनापतिस्त्वहं राजन्समयेनापरेण ते ।
भविष्यामि यथाकामं तन्मे श्रोतुमिहार्हसि ॥ २३
कर्णो वा युध्यतां पूर्वमहं वा पृथिवीपते ।
स्पर्धते हि सदात्यर्थं सूतपुत्रो मया रणे ॥ २४

उशनसस् (for उशनसा). — ^{d}) D_3 मम (for स नः). M_{3-5} भवेत् (for भव).

12 ^{a}) K_{1-3} D_7 प्रभावताम्; B D_n $D_{1-4.6.10}$ T_2 G_2 रश्मिव(B_3 D_n °म)ताम्. — G_5 om. (hapl.) 12^{d}–13^{c}. — ^{d}) $K_{4.5}$ B D_n $D_{6.8.10}$ देवानामिव.

13 G_5 om. 13^{abc} (cf. v.l. 12). — ^{b}) K_4 B D_n $D_{6.8.10}$ °र्णः पक्षिणां यथा. — ^{c}) K_4 B D_n $D_{1.6-8.10}$ देवानां (for भूतानां).

14 ^{d}) S त्रिदशैरपि यद् (M_1 *inf. lin.* च) ध्रुवं.

15 ^{a}) G_4 भगवान् (for नो भवान्). — ^{b}) K_5 G_4 M_2 पावकः; Ca. d पावकिः (as in text). — ^{d}) G_2 सारमेया (for सौरभेया). — After 15, K_3(marg. *sec. m.*) ins.:

550* इत्युक्त्वा पादयोस्तस्य निपपात नराधिपः ।
रक्षास्मान्राजशार्दूल त्वामहं शरणं गतः ।

16 ^{a}) D_2 एतत्सत्यं (for एवमेतन्). T_2 $G_{2.5}$ महाराज. — ^{c}) K_2 $D_{3.4}$ तथैव (for य°). K_{1-3} $D_{1.2}$ तु (for हि). K_3 भवान्मह्यं (for भवन्तो मे).

17 ^{a}) $K_{3.5}$ युध्यतापि; D_1 त्वयि चैव (for अपि चैव). T_2 G_2 वचः; G_5 तव (for मया). — ^{b}) $K_{3.5}$ $D_{1-4.7}$ S (except $G_{1.4}$) जना° (for नरा°). — ^{c}) $K_{1.2.5}$ च (for तु). K_4 B (except B_3) D_n $D_{6.10}$ संयोद्धव्यं (for योद्धव्यं तु). — ^{d}) K_4 B D_n $D_{3.4.6.8.10}$ मे; K_5 च (for स).

18 ^{a}) K_4 $D_{6.8}$ तं (for तु). — ^{c}) D_2 महाबाहो (for नरव्याघ्रात्).

19 ^{a}) $K_{4.5}$ B (except B_2) D_n $D_{3.4.6.8.10}$ °बुद्धिः (for °बाहुः). — ^{b}) $K_{3.4}$ $B_{1.3.5}$ D_n $D_{3.4.6.8.10}$ [अ]नेकशः; B_4 [अ]शेषतः (for सर्वशः). — ^{c}) $K_{1-3.5}$ मे; T $G_{2.3.5}$ M मा (for मां). D_2 विधृतः; $D_{3.4}$ M_4 विवृते; G_1 अवृते; Ca. d. 3 विवृतः (as in text).

20 ^{a}) K_4 $D_{6.8}$ चैक-; B_{1-3} $D_{3.4}$ चापि; $B_{4.5}$ D_n D_1 चैव; $D_{7.10}$ चैकः (for स च). — ^{c}) $K_{1.2}$ D_7 कुर्यां चास्त्र°; K_3 S (for G_2 see below) कुर्यावोस्त्र°; K_5 कुर्याव: स्व°; $D_{2.4}$ G_2 कुर्यामस्त्र°. — ^{d}) $K_{1.2}$ B_2 $D_{2.7}$ सदेवासुर°; $K_{3.5}$ G_1 ससुरा(K_3 °देवा)सुरमानुषं.

21 B_2 om. 21. — ^{a}) $D_{3.4}$ न त्वेवो°. — ^{b}) K_4 $B_{1.3.4}$ D_n $D_{6.8.10}$ जना° (for नरा°). — ^{d}) $K_{1.3.5}$ $D_{3.4.8}$ Ca. d. 3 प्रयोगेण (as in text); the rest °न. K_5 $D_{6.10}$ T_2 $G_{1-3.5}$ M तदा (G_1 सदा also, as in text); D_n T_1 G_4 तथा.

22 ^{b}) D_1 कुरुपुंगव; S °सत्तम.

23 ^{a}) K_4 D_n $D_{6.10}$ भविष्यामि (for त्वहं राजन्). — ^{b}) K_1 च; T_2 G_2 तु (for ते). D_7 समयेनैवमप्युत. — K_4 D_6 om. 23^{cd}. — ^{c}) K_{1-3} B_4 D_7 °कालं (for °कामं).

24 ^{c}) B_3 G_5 M_2 मया°; D_1 स चा° (for सदा°). — ^{d}) B_3 M_2 महा- (for मया).

कर्ण उवाच ।

नाहं जीवति गाङ्गेये योत्स्ये राजन्कथंचन ।
हते भीष्मे तु योत्स्यामि सह गाण्डीवधन्वना ॥ २५

वैशंपायन उवाच ।

ततः सेनापतिं चक्रे विधिवद्भूरिदक्षिणम् ।
धृतराष्ट्रात्मजो भीष्मं सोऽभिषिक्तो व्यरोचत ॥ २६
ततो भेरीश्च शङ्खांश्च शतशश्चैव पुष्करान् ।
वादयामासुरव्यग्राः पुरुषा राजशासनात् ॥ २७
सिंहनादाश्च विविधा वाहनानां च निस्वनाः ।
प्रादुरासन्ननभ्रे च वर्षं रुधिरकर्दमम् ॥ २८
निर्घाताः पृथिवीकम्पा गजबृंहितनिस्वनाः ।
आसंश्च सर्वयोधानां पातयन्तो मनांस्युत ॥ २९
वाचश्चाप्यशरीरिण्यो दिवश्चोल्काः प्रपेदिरे ।
शिवाश्च भयवेदिन्यो नेदुर्दीप्तस्वरा भृशम् ॥ ३०
सेनापत्ये यदा राजा गाङ्गेयमभिषिक्तवान् ।
तदैतान्युग्ररूपाणि अभवञ्शतशो नृप ॥ ३१
ततः सेनापतिं कृत्वा भीष्मं परबलार्दनम् ।
वाचयित्वा द्विजश्रेष्ठान्निष्कैर्गोभिश्च भूरिशः ॥ ३२
वर्धमानो जयाशीर्भिर्निर्ययौ सैनिकैर्वृतः ।
आपगेयं पुरस्कृत्य भ्रातृभिः सहितस्तदा ।
स्कन्धावारेण महता कुरुक्षेत्रं जगाम ह ॥ ३३
परिक्रम्य कुरुक्षेत्रं कर्णेन सह कौरवः ।
शिबिरं मापयामास समे देशे नराधिपः ॥ ३४
मधुरानूषरे देशे प्रभूतयवसेन्धने ।
यथैव हास्तिनपुरं तद्वच्छिबिरमाबभौ ॥ ३५

C. 5. 5313
B. 5. 156. 36
K. 5. 156. 38

इति श्रीमहाभारते उद्योगपर्वणि त्रिपञ्चाशदधिकशततमोऽध्यायः ॥ १५३ ॥

---

25 =(var.) 5. 165. 27. — [b]) $K_{3.4}$ B D_8 $D_{6.8.10}$ transp. योत्स्ये and राजन्. — [c]) K_5 $B_{1.2}$ D_{2-4} S (except G_3) transp. भीष्मे and तु. K_{1-3} B_2 $D_{2.7}$ योद्धास्मि (for योत्स्यामि). — [d]) $K_{2.5}$ D_7 सह गांजीवधन्व-(K_2 °न्वि)ना.

26 [b]) K_4 B_5 D_8 $D_{2.6.8.10}$ °दक्षिणः.

27 [a]) $K_{3.5}$ D_8 $D_{6-8.10}$ $G_{3.4}$ $M_{2.3.6}$ शंखांश्च. — [b]) K_4 B (except B_2) D_8 $D_{6.8.10}$ शतशोथ सहस्रशः. Ca.d cite पुष्करं, Cs पुष्कराणि. — [c]) K_1 नादया°; K_2 नोदया°; D_8 ताडया°. — [d]) K_4 B (except B_3) D_8 $D_{6.8.10}$ वादका (for पुरुषा).

28 [b]) A few MSS. निःस्वनाः. — S reads 28[cd] after 30[ab]. — [c]) $K_{3.5}$ $D_{3.4.7}$ आसीद् (for आसन्). K_3 $D_{3.4}$ $G_{1.4}$ अनभ्रेषु; D_7 ततस्तत्र (for अनभ्रे च). — [d]) B_4 °मेव च (for °कर्दमम्).

29 [b]) Some MSS. °निःस्वनाः. — [d]) K (except K_4) B_2 D_8 $D_{1.7.8}$ तापयंतो; S (except T_1) पीड°. K_3 [अ]थ; D_1 G_2 च (for [उ]त).

30 [b]) T_2 G (except G_5) दिश°. $K_{1.5}$ $D_{1.7}$ प्रपेतिरे. — After 30[ab], S reads 28[cd]. — [c]) $K_{1.2}$ [अ]भाव° (for भय°). — [d]) K_4 $B_{2.4.5}$ D_8 $D_{2.6.8.10}$ °तराः; $B_{1.3}$ °मुखाः; $D_{3.4}$ °स्वनाः; Ca.d °स्वराः (as in text).

31 [a]) K_5 B D_{n1} $D_{3.4.6}$ सैना° (for सेना°). D_8 राजन् (for राजा). G_5 reads 31[cd] after 32[ab]. — [c]) K (except K_4) B_2 $D_{1.2.7}$ तदैवाद्भुतरूपाणि; $D_{3.4}$ तदैतान्यनुपूर्वाणि; T_1 G_4 तथैवात्युग्ररूपाणि; T_2 G_2 तदैवात्युग्र°; G_1 तदेवान्युक्त°; G_5 वाचकान्युग्र°. — [d]) To avoid hiatus! K_{1-3} B_2 D_2 T_2 G_{1-3} M ह्यभवन्; K_4 $B_{1.3-5}$ D_8 $D_{1.3.4.6-8.10}$ बभूवुः; K_5 प्रभवन् (for अभवन्).

32 $D_{3.4}$ om. 32. — [b]) G_5 °बलांतकं. — After 32[ab], G_5 reads 31[cd]. — [d]) K_4 B (except B_2) D_8 $D_{6.8.10}$ transp. निष्कैः and गोभिः. K (except K_4) D_7 धनेन च; D_1 च सर्वशः (for च भूरिशः).

33 [a]) $K_{1.2}$ वंद्य°; $K_{3.5}$ $D_{3.4.8}$ नंद्य°; S (except G_3) पूज्य° (for वर्ध°). — [b]) S निर्भयः (T G_2 °यं; $G_{1.3}$ °यैः) (for निर्ययौ). — 33[c] = 5. 149. 56[c].

34 [c]) = 5. 149. 72[a]. K_5 $D_{1.10}$ T_2 G_2 स्थाप° (T_2 *also* प्राप°); G_3 याप° (for माप°). — [d]) $B_{2.4}$ D_{2-4} समदेशे. $K_{1.2}$ $B_{2.5}$ नराधिप; K_4 $B_{3.4}$ D_8 $D_{2-4.6.8.10}$ जनाधिपः (K_4 B_4 $D_{2.6.10}$ °प).

35 [ab]) = 5. 149. 69[a] + 67[b]. — [c]) Some S MSS. हस्तिनपुरं. — [d]) B_3 तथा (for तद्वच्). K (except K_4) $D_{1.2.7}$ तद्वत्तत् (K तथैव) शिबिरं बभौ; S शिबिरं तत्तथाभवत्.

Colophon om. in D_{n1}. D_{n2} $D_{5.9}$ missing — *Sub-parvan*: $K_{1.2.5}$ B_3 $D_{2.7}$ G_5 अभिनिर्याण(B_3 om.

१५४

C. 5. 5314
B. 5. 157. 1
K. 5. 157. 1

जनमेजय उवाच ।

आपगेयं महात्मानं भीष्मं शस्त्रभृतां वरम् ।
पितामहं भारतानां ध्वजं सर्वमहीक्षिताम् ॥ १
बृहस्पतिसमं बुद्ध्या क्षमया पृथिवीसमम् ।
समुद्रमिव गाम्भीर्ये हिमवन्तमिव स्थिरम् ॥ २
प्रजापतिमिवौदार्ये तेजसा भास्करोपमम् ।
महेन्द्रमिव शत्रूणां ध्वंसनं शरवृष्टिभिः ॥ ३
रणयज्ञे प्रतिभये स्वाभीले लोमहर्षणे ।
दीक्षितं चिररात्राय श्रुत्वा राजा युधिष्ठिरः ॥ ४
किमब्रवीन्महाबाहुः सर्वधर्मविशारदः ।
भीमसेनार्जुनौ वापि कृष्णो वा प्रत्यपद्यत ॥ ५

वैशंपायन उवाच ।

आपद्धर्मार्थकुशलो महाबुद्धिर्युधिष्ठिरः ।
सर्वान्भ्रातॄन्समानीय वासुदेवं च सात्वतम् ।
उवाच वदतां श्रेष्ठः सान्त्वपूर्वमिदं वचः ॥ ६
पर्याक्रामत सैन्यानि यत्तास्तिष्ठत दंशिताः ।
पितामहेन वो युद्धं पूर्वमेव भविष्यति ।
तस्मात्सप्तसु सेनासु प्रणेतॄन्मम पश्यत ॥ ७

निर्याण)यात्रा; K_{4} $B_{1.4.5}$ Ds $D_{2-4.6.8.10}$ M अभि(M_{2-5} om. अभि)निर्यात्रा. — *Adhy. name*: T_{1} M भीष्मसेनापत्य-(T_{1} M_{1} °त्या)भिषेचनं; G_{4} भीष्मसेनापत्याभिषेकः; G_{5} भीष्मसैनापत्यं. — *Adhy. no.* (figures, words or both): D_{6} 45 (=145); T_{1} $G_{2.5}$ 157; T_{2} M 156 (M_{4} 155); G_{1} 158; G_{3} 154; G_{8} 150. — *S'loka no.*: K_{5} 36.

☞ The *name* भीष्माभिषेचन is *given* tentatively to this sub-parvan (adhy. 153-56) on the authority of the Parvasaṁgraha summary of the Ādiparvan, although its place is not definitely indicated there, nor in our MSS. The name does not occur in any of our MSS., which regard these adhy. as a continuation of अभिनिर्याण, as do also the printed editions except that of P. P. S. Sastri; but some S MSS. give the adhy. name of 153 as भीष्मसेनापत्याभिषेचन or °भिषेक, justified by its contents. The *end* of this sub-parvan is indicated by the definite commencement of the next sub-parvan उलूकयान at adhy. 157.

154

☞ This adhy. is missing in Dn_{2} (cf. v.l. 5. 143. 2); the MS. is mostly ignored here. Dn_{1} resumes from this adhy.।

1 ^{b}) $K_{2.3}$ °विदां (for °भृतां). — ^{d}) $K_{1.2}$ वृद्धं; Dn_{1} भुजं (for ध्वजं). D_{5} पूर्व (for सर्व-).

2 G_{2} om. (hapl.) 2^{c}–3^{b}. — ^{d}) $K_{1.2}$ T_{1} स्थितौ; B_{3} D_{1} G_{3} (before corr.).4.5 M (except M_{1}) स्थितं; $D_{3.4}$ [अ]तुलं (for स्थिरम्).

3 G_{2} om. 3^{ab} (cf. v.l. 2). — ^{d}) K_{5} T_{1} ध्वंसने; D_{2} ध्वंसाय; Ca as in text.

4 ^{a}) K_{4} B (except B_{2}) Dn_{1} Ds_{1} $D_{3.4.6.8.10}$ प्रवितते; Ca.d.s प्रतिभये (as in text). — ^{b}) K_{4} $B_{1.3-5}$ $D_{2-4.6.8.10}$ सुभीमे; K_{5} आभिले; B_{2} [ऽ]भ्यास्तीर्णे; Dn_{1} संग्रामे; Ds_{1} त्वाभीले; Ds_{2} [ऽ]धाभीले; G_{1} सुभीते; G_{3} स्वाभीते; Ca ध्याडीले; Cd.s आभीले. S (except T_{1} G_{5}) रोम°. — ^{d}) K_{4} Ds $D_{6.10}$ दृष्ट्वा राजा; D_{8} तत्र श्रुत्वा (for श्रुत्वा राजा). K_{4} B Dn_{1} Ds $D_{6.10}$ तत्र; $D_{3.4}$ तं च (for राजा).

5 T_{2} G_{2} om. 5. — ^{b}) K_{1} सर्वशस्त्रविशारदः; $K_{3.4}$ $B_{1.3.4}$ Dn_{1} Ds $D_{2.6.8.10}$ °शस्त्रभृतां वरः; B_{5} $D_{3.4}$ °धर्मभृतां वरः. — ^{c}) D_{8} तदा भीमा° (for भीमसेना°). K_{2} Dn_{1} Ds_{2} $D_{1.3.4.7.8}$ चापि; $G_{1.3.5}$ M वा किं (for वापि). — ^{d}) K_{4} B_{4} Dn_{1} Ds $D_{3.4.6.8.10}$ प्रत्यभाषत; D_{1} किमभाषत; D_{7} देवकीसुतः; $G_{1.5}$ प्रत्यपद्यतां; M_{3-5} प्रतिपद्यत.

6 ^{c}) K_{1} समानाय्य; K_{3} °भाष्य; D_{1} T_{2} M_{4} °दाय; G_{2} °धाय (for समानीय). — ^{d}) $K_{2.4}$ B (except B_{2}) Dn_{1} $D_{6.10}$ M_{4} च शाश्वतं; K_{5} ससात्यकिं (*for* च सात्वतम्). — ^{e}) K_{3} अवदद् (for उवाच).

7 ^{a}) K_{5} D_{7} G_{3} पर्यक्रमत; B_{2} पर्याकुरुत; T_{2} G_{5} $M_{3.4}$(*inf. lin.*).5 परिक्रामत. — ^{b}) G_{2} युक्तास. B_{3} तिष्ठंतु. S (*mostly*) दंसिताः. — ^{c}) K_{1} M (except M_{1}) वा (for वो). D_{1} योद्धव्यं (for वो युद्धं). — ^{f}) $D_{1.7.8}$ सम; G_{3} युधि (for मम). $D_{3.4}$ प्रणेतारं च पश्यत.

वासुदेव उवाच ।

यथार्हति भवान्वक्तुमस्मिन्काल उपस्थिते ।
तथेदमर्थवद्वाक्यमुक्तं ते भरतर्षभ ॥ ८
रोचते मे महाबाहो क्रियतां यदनन्तरम् ।
नायकास्तव सेनायामभिषिच्यन्तु सप्त वै ॥ ९

वैशंपायन उवाच ।

ततो द्रुपदमानाय्य विराटं शिनिपुंगवम् ।
धृष्टद्युम्नं च पाञ्चाल्यं धृष्टकेतुं च पार्थिवम् ।
शिखण्डिनं च पाञ्चाल्यं सहदेवं च मागधम् ॥ १०
एतान्सप्त महेष्वासान्वीरान्युद्धाभिनन्दिनः ।
सेनाप्रणेतॄन्विधिवदभ्यषिञ्चद्युधिष्ठिरः ॥ ११
सर्वसेनापतिं चात्र धृष्टद्युम्नमुपादिशत् ।
द्रोणान्तहेतोरुत्पन्नो य इद्धाज्जातवेदसः ॥ १२
सर्वेषामेव तेषां तु समस्तानां महात्मनाम् ।
सेनापतिपतिं चक्रे गुडाकेशं धनंजयम् ॥ १३
अर्जुनस्यापि नेता च संयन्ता चैव वाजिनाम् ।
संकर्षणानुजः श्रीमान्महाबुद्धिर्जनार्दनः ॥ १४
तद्दृष्ट्वोपस्थितं युद्धं समासन्नं महात्ययम् ।
प्राविशद्भवनं राज्ञः पाण्डवस्य हलायुधः ॥ १५
सहाक्रूरप्रभृतिभिर्गदसाम्बोल्मुकादिभिः ।
रौक्मिणेयाहुकसुतैश्चारुदेष्णपुरोगमैः ॥ १६
वृष्णिमुख्यैरभिगतैर्व्याघ्रैरिव बलोत्कटैः ।
अभिगुप्तो महाबाहुर्मरुद्भिरिव वासवः ॥ १७
नीलकौशेयवसनः कैलासशिखरोपमः ।
सिंहखेलगतिः श्रीमान्मदरक्तान्तलोचनः ॥ १८
तं दृष्ट्वा धर्मराजश्च केशवश्च महाद्युतिः ।
उदतिष्ठत्तदा पार्थो भीमकर्मा वृकोदरः ॥ १९
गाण्डीवधन्वा ये चान्ये राजानस्तत्र केचन ।

C. 5. 5334
B. 5. 157. 21
K. 5. 157. 21

8 K4 B1.4.5 Dn1 Ds D6.8.10 कृष्णः; B8 विष्णुः; T G श्रीभगवान् (for वासुदेवः). — ^{a}) T1 G4 यदार्हति. — ^{b}) To avoid hiatus! K3.4 Dn1 Ds D6.8.10 ह्युप° (for उप°). — ^{c}) K8 तथैवम्; B5 D3.4 T1 तदेवम् (for तथेदम्).

9 ^{a}) D3.4 T2 G1.2 ते (for मे). — Ds2 om. (hapl.) 9^{bc}. — ^{c}) T2 G1.2.4 नायकान्. K5 M (except M1) सेनायाः; T1 G4 °सु (for °याम्). — ^{d}) K4 B Dn1 Ds D6.7.10 क्रियतामिह; D1 G3 अभिषिंचंतु; D8 T1 G1 °षिंचतु; T2 G2 °षिंचत; G4 °षेक्तुं तु (for अभिषिच्यन्तु).

10 K5 om. (hapl.) 10^{de}. — ^{d}) K4 B5 पार्थिव. — ^{e}) B2 युधां श्रेष्ठं; G1 च युद्धज्ञं (for च पाञ्चाल्यं).

11 ^{a}) K4 B (except B2) Dn1 Ds D2–4.6–8.10 महाभागान् (for महेष्वासान्). — ^{b}) K4.5 M धीरान् (for वीरान्). K4 B (except B2) Dn1 Ds D3.4.6–8.10 °कांक्षिणः.

12 ^{b}) K4 B (except B2) Dn1 Ds D3.4.6.7.10 चकार ह; T G अथादिशत् (for उपादिशत्). — D1 om. 12^{c}–13^{b}. — ^{c}) K (except K4) °हेतुर्. T2 G1–3 उत्पन्नं. — G4 om. 12^{d}–14^{a}. — ^{d}) B2 महत्वात्; D10 य इष्टात्; T2 G1–3 समिद्धात् (for य इद्धात्). Ca cites इद्धात्.

13 D1 om. 13^{ab}; G4 om. 13 (cf. v.l. 12); B3 om. 13^{bc}. — ^{b}) D3.4.8.10 समेतानां; B2 शूराणां सु; D7 प्रणेतॄणां; T1 सम्बद्धानां; T2 G2 सप्तानां सु (for समस्तानां). — ^{c}) G3 सेनापतिं परं चक्रे.

14 G4 om. 14^{a} (cf. v.l. 12). — ^{a}) K5 अस्य; D7 एव (for अपि). D3.4 नेतारं (for नेता च). — ^{b}) D3.4 यंतारं (for संयन्ता). K5 यंता चैवापि वाजिनां.

15 ^{a}) K4 Dn1 D7.8 G3 M3–5 तं (for तद्). G4 अव° (for उप°). — ^{c}) K1.2 आविशद्. K5 प्राज्ञः; B Dn1 D1 राजन् (for राज्ञः). — K4 om. 15^{d}–17^{a}. — ^{d}) B D1.7 पांडवानां; G2 धर्मज्ञस्य (for पाण्डवस्य).

16 K4 om. 16 (cf. v.l. 15). — ^{b}) K3.5 शांब- (for साम्ब-). B1.4.5 Dn1 Ds D8.10 T2 G1.2 -उद्धव- (for -उल्मुक-). — ^{c}) D10 (m as in text) रौहिणेय- (for रौक्मिणेय-). T G1.2.5 -युतैः (for -सुतैः). K1.2 रौक्मिणेयाह्व(K2 °ह्व)तिशुकैः.

17 K4 om. 17^{a} (cf. v.l. 15). — ^{a}) K5 °वीरैर् (for °मुख्यैर्). K5 B3–5 Dn1 D1.3.4.7 M1.2.4 अधिगतैर्; Ds D6.8.10 उपगतैर्; D2 अधिगतो; M3.5 अभिगतो. — ^{b}) K3 D1.7 S मदो° (for बलो°).

18 ^{a}) B2.3 °कौषेय°. — ^{b}) Some N MSS. कैलाश°.

19 ^{a}) D3.4.7.8 G3 उदतिष्ठन् (for उदतिष्ठत्). K3.4 B (except B2) Dn1 Ds D1.6.8.10 ततः पार्थौ; K5 G4 M3.5 तथा पार्थौ; D7 महाबाहो.

20 ^{a}) A few MSS. गांजीवधन्वा. — ^{b}) D1 भारत (for केचन). — ^{cd}) T1 G1 ततः (for ते स्म). K3.4 B Dn1 Ds D1.6.8.10 G4 °चक्रिरे ते वै (B3 Ds2 तं वै; D8 सर्वे; G4 [ऽ]भ्येत्य) समायांतं (Dn1 Ds D10 समायातं; G4 ततः सर्वे) हलायुधं.

C. 5. 5335
B. 5. 157. 22
K. 5. 157. 21

पूजयांचक्रुरभ्येत्य ते स्म सर्वे हलायुधम् ॥ २०
ततस्तं पाण्डवो राजा करे पस्पर्श पाणिना ।
वासुदेवपुरोगास्तु सर्व एवाभ्यवादयन् ॥ २१
विराटद्रुपदौ वृद्धावभिवाद्य हलायुधः ।
युधिष्ठिरेण सहित उपाविशदरिंदमः ॥ २२
ततस्तेषूपविष्टेषु पार्थिवेषु समन्ततः ।
वासुदेवमभिप्रेक्ष्य रौहिणेयोऽभ्यभाषत ॥ २३
भवितायं महारौद्रो दारुणः पुरुषक्षयः ।
दिष्टमेतद्ध्रुवं मन्ये न शक्यमतिवर्तितुम् ॥ २४
अस्माद्युद्धात्समुत्तीर्णानपि वः ससुहृज्जनान् ।
अरोगानक्षतैर्देहैः पश्येयमिति मे मतिः ॥ २५
समेतं पार्थिवं क्षत्रं कालपक्कमसंशयम् ।
विमर्दः सुमहान्भावी मांसशोणितकर्दमः ॥ २६
उक्तो मया वासुदेवः पुनः पुनरुपह्वरे ।
संबन्धिषु समां वृत्तिं वर्तस्व मधुसूदन ॥ २७
पाण्डवा हि यथास्माकं तथा दुर्योधनो नृपः ।
तस्यापि क्रियतां युक्त्या सपर्येति पुनः पुनः ॥ २८
तच्च मे नाकरोद्वाक्यं त्वदर्थे मधुसूदनः ।
निविष्टः सर्वभावेन धनंजयमवेक्ष्य च ॥ २९
ध्रुवो जयः पाण्डवानामिति मे निश्चिता मतिः ।
तथा ह्यभिनिवेशोऽयं वासुदेवस्य भारत ॥ ३०
न चाहमुत्सहे कृष्णमृते लोकमुदीक्षितुम् ।
ततोऽहमनुवर्तामि केशवस्य चिकीर्षितम् ॥ ३१
उभौ शिष्यौ हि मे वीरौ गदायुद्धविशारदौ ।
तुल्यस्नेहोऽस्म्यतो भीमे तथा दुर्योधने नृपे ॥ ३२
तस्माद्यास्यामि तीर्थानि सरस्वत्या निषेवितुम् ।
न हि शक्ष्यामि कौरव्यान्नश्यमानानुपेक्षितुम् ॥ ३३
एवमुक्त्वा महाबाहुरनुज्ञातश्च पाण्डवैः ।
तीर्थयात्रां ययौ रामो निवर्त्य मधुसूदनम् ॥ ३४

इति श्रीमहाभारते उद्योगपर्वणि चतुःपञ्चाशदधिकशततमोऽध्यायः ॥ १५४ ॥

---

21 [a]) T_1 $G_{4.5}$ रामं; G_1 राजन् (for राजा). — [c]) K_4 $B_{1.2.4.5}$ Dn_1 D_5 $D_{1.6.8.10}$ M_4 तं; K_5 B_3 $M_{3.5}$ ते (for तु). — [d]) T_2 G_2 M °पूज° (for °वाद°).

22 [d]) K_1 $D_{3.4.7}$ M_5 °दम (for °दमः).

☞ The fragm. MS. G_4 *ends* with 23[ab]! It is mostly ignored hereafter.

23 [d]) $D_{3.4}$ (?gloss) बलदेवो (for रौहिणेयो).

24 [b]) T_2 G_2 M_3 पुरुषर्षभ. — 24[cd] = 5. 193. 52[ab]. — [c]) $K_{1.2}$ एव (for एतद्). $D_{3.4}$ अहं; Ca. d ध्रुवं (as in text).

25 [a]) $K_{3.4}$ B (except B_2) Dn_1 D_5 $D_{3.4.6.10}$ तस्माद्. — [b]) S (except G_5) °सुहृद्गणान्. — [d]) K_4 B (except B_2) Dn_1 D_5 $D_{3.4.6.8.10}$ द्रष्टास्मीति मतिर्मम.

26 [c]) K_3 $B_{4.5}$ Dn_1 D_6 च (for सु-).

27 [b]) B_3 °प्लुवे; Ca. s °ह्वरे (as in text). — [d]) M_2 यायास्त्वं (for वर्तस्व).

28 K_5 Dn_1 om. (hapl.) 28[a]–29[b]. — [c]) $D_{3.4}$ अस्य (for तस्य). M (except M_1) हि (for [अ]पि). $K_{3.4}$ $B_{1.4.5}$ $D_{6.10}$ Ca साह्यं; B_3 शक्तया; D_5 D_8 सह्यं; T $G_{2.3.5}$ युक्ता (for युक्त्या).

29 K_5 Dn_1 om. 29[ab] (cf. v.l. 28). — [c]) K_3 B (except B_2) Dn_1 $D_{1.3.4.6}$ निर्विष्टः; D_5 निसृष्टः. — [d]) $K_{3.4}$ B (except B_2) Dn_1 D_5 $D_{6.8.10}$ ह (for च).

30 [a]) K (except K_4) D_1 ध्रुवं (for ध्रुवो). — [c]) S यथा (for तथा). K_4 D_5 $D_{8.10}$ ह्यरिविनाशोयं; K_5 [अ]स्याभिनिवेशोयं. — [d]) $K_{1.2}$ B_2 दृश्यते (for भारत).

31 [ab]) T_2 $G_{2.6}$ transp. कृष्णम् and लोकम्. — [c]) K_6 $D_{2.7}$ S अतो (for ततो). T_2 G_5 °पश्यामि (for °वर्तामि).

32 [a]) B_2 एतौ (for उभौ). — [c]) K_1 D_8 °स्नेहोस्मि ते; B_3 °स्नेहगतौ; T_2 °स्नेहो यथा; G_2 °स्नेहोस्म्यहं; G_5 °स्नेहोप्यसौ. — [d]) $K_{1.2}$ B_2 D_{10} G_3 नृप (for नृपे).

33 T_2 G_2 om. (hapl.) 33[cd]. — [c]) T_1 कौरव्यं (for °व्यान्). — [d]) K_4 D_2 $G_{1.3.5}$ अवेक्षितुं; $D_{1.3.4}$ उदी° (for उपे°). T_1 नश्यमानमवेक्षितुं.

34 Before 34, S ins. वैशं°. — [b]) G_3 बांधवैः (for पाण्डवैः). — [d]) $K_{2.5}$ निर्वर्त्य; T G निमंत्र्य; Ca. d as in text.

Colophon. Dn_2 $D_{5.9}$ G_4 missing. — *Sub-parvan:* $K_{1.2}$ D_7 T_1 अभिनिर्याणयात्रा; K_3 निर्याणयात्रा; K_4 $B_{1.4.5}$ Dn_1 D_5 $D_{6.8.10}$ M अभिनिर्यात्रा; B_3 अभियात्रा; D_2 अभियानयात्रा. — *Adhy. name:* K_5

१५५

वैशंपायन उवाच ।
एतस्मिन्नेव काले तु भीष्मकस्य महात्मनः ।
हिरण्यलोम्नो नृपतेः साक्षादिन्द्रसखस्य वै ॥ १
आहृतीनामधिपतेर्भोजस्यातियशस्विनः ।
दाक्षिणात्यपतेः पुत्रो दिक्षु रुक्मीति विश्रुतः ॥ २
यः किंपुरुषसिंहस्य गन्धमादनवासिनः ।
शिष्यः कृत्स्नं धनुर्वेदं चतुष्पादमवाप्तवान् ॥ ३
यो माहेन्द्रं धनुर्लेभे तुल्यं गाण्डीवतेजसा ।
शार्ङ्गेण च महाबाहुः संमितं दिव्यमक्षयम् ॥ ४
त्रीण्येवैतानि दिव्यानि धनूंषि दिविचारिणाम् ।
वारुणं गाण्डिवं तत्र माहेन्द्रं विजयं धनुः ॥ ५
शार्ङ्गं तु वैष्णवं प्राहुर्दिव्यं तेजोमयं धनुः ।
धारयामास यत्कृष्णः परसेनाभयावहम् ॥ ६
गाण्डीवं पावकाल्लेभे खाण्डवे पाकशासनिः ।
द्रुमाद्रुक्मी महातेजा विजयं प्रत्यपद्यत ॥ ७
संछिद्य मौरवान्पाशान्निहत्य मुरमोजसा ।
निर्जित्य नरकं भौममाहृत्य मणिकुण्डले ॥ ८
षोडश स्त्रीसहस्राणि रत्नानि विविधानि च ।
प्रतिपेदे हृषीकेशः शार्ङ्गं च धनुरुत्तमम् ॥ ९
रुक्मी तु विजयं लब्ध्वा धनुर्मेघसमस्वनम् ।
विभीषयन्निव जगत्पाण्डवानभ्यवर्तत ॥ १०
नामृष्यत पुरा योऽसौ स्वबाहुबलदर्पितः ।
रुक्मिण्या हरणं वीरो वासुदेवेन धीमता ॥ ११
कृत्वा प्रतिज्ञां नाहत्वा निवर्तिष्यामि केशवम् ।
ततोऽन्वधावद्वार्ष्णेयं सर्वशस्त्रभृतां वरम् ॥ १२
सेनया चतुरङ्गिण्या महत्या दूरपातया ।

C. 5. 5362
B. 5. 158. 12
K. 5. 158. 12

हलधरवाक्यं; T1 M बलदेवनिर्गमनं (T1 °निवृत्तिः); G5 बलदेवतीर्थयात्रानिर्याणं. — *Adhy. no.* (figures, words or both): D6 47 (=147); T1 G1.2.5 158; T2 M 157 (M4 156); G3 155. — *S'loka no.:* K5 34; Dn1 35.

155

☞ This adhy. is missing in Dn2 (cf. v.l. 5. 143. 2); the MS. is mostly ignored here.

1 ᵇ) D7 सुतो नृपः (for महा°). — ᶜ) K4 B Dn1 Ds D1.6.8.10 °रोम्णो (for °लोम्नो).

2 ᵃ) K1 Ds2 T1 G3 आहु(K1 °हू)तीनाम्; K2 आह्वृतीनाम्; K3.4 B Dn1 D6 आकूती(Dn1 °ति)नाम्; K5 आरुतीनाम्; Ds1 D1 M2 आह्वतीनाम्; D7.8 T2 G1.2.5 आहु(D8 °हू)कानाम्. K3.5 B2.4.5 Dn1 Ds D1-4.6.7.10 T2 G2 अधिपतिः. — ᵇ) K5 D7 G3 अपि (for अति-). — ᶜ) K5 D2.7 द(K5 दा)क्षिणाधिपतेः; Ds °पतिः.

3 ᶜ) K3.4 B5 Dn1 Ds D6.10 T1 transp. शिष्यः and कृत्स्नं.

4 ᵇ) A few MSS. गांजीव-. B5 D7 Ca °धन्वना (for °तेजसा). — ᶜ) K5 S °बाहो. — ᵈ) M1.2 नित्यम् (for दिव्यम्). K4 Dn1 Ds D6.8.10 दिव्यलक्षणं; D2 दिवि पूजितं; D3.4 दिव्यमव्ययं (for दिव्यमक्षयम्).

5 ᵃ) B3 च (for [ए]वं). K2 G5 तानि (K2 एतानि also as in text). — ᶜ) K2 चैव (for तत्र). K5 गांजिवं वारुण तत्र.

6 K1.2 om. (hapl.) 6ᵃᵇ. — ᵃ) B3 G1 च; T G2.3.5 M हि (for तु). D3.4 G1 चाहुः (for प्राहुः). — ᵇ) K3 *repeats* 4ᵈ for 6ᵇ (v.l. संमतं for संमितं). — ᶜ) K3.4 B Dn1 Ds D1.3.4.6.7.10 T2 G1.2.5 तत् (for यत्). — ᵈ) K (except K4) B2 D1.2.7 °भयंकरं.

7 ᵃ) A few MSS. गांजीवं. Ds G3 पांडवः (for पावकात्). — ᶜ) K5 अन्यद्; G5 इंद्राद् (for द्रुमाद्). — ᵈ) Ds S सम°; Ca प्रत्य° (as in text).

8 ᵇ) K1.2 असुरम्; K3-5 B Dn1 Ds D1-4.6.7.10 मुरुम् (for मुरम्).

10 ᵇ) K (except K1) B3-5 Dn1 Ds D1.3.4.6.8.10 M1 °निभ° (for °सम°).

11 ᵇ) K4 B Dn1 Ds D6.8.10 °गर्वितः. — ᵈ) K1.3.5 B2 D1.7 वीर्यवान् (for धीमता).

12 ᵇ) K4 B (except B2) Dn1 Ds D6.8.10 निवर्तिष्ये जनार्दनं. — ᶜ) G1 अन्वयाच्च (for अन्वधावद्). — ᵈ) B Ds D1-4.10 वरः; Dn1 वर (for वरम्).

13 ᵃ) K4 D8 सेनया च वरूथिन्या. — B2 om. (hapl.) 13ᵇᶜ. — ᵇ) K1.5 दूरया तया; B3 त्वरया तया (for दूरपा°). — ᶜ) K4 D8 विचित्रवीर्यधर्मिण्या.

C. 5. 5362
B. 5. 158. 13
K. 5. 158. 13

विचित्रायुधवर्मिण्या गङ्गयेव प्रवृद्धया ॥ १३

स समासाद्य वार्ष्णेयं योगानामीश्वरं प्रभुम् ।
व्यंसितो व्रीडितो राजन्नाजगाम स कुण्डिनम् ॥ १४

यत्रैव कृष्णेन रणे निर्जितः परवीरहा ।
तत्र भोजकटं नाम चक्रे नगरमुत्तमम् ॥ १५

सैन्येन महता तेन प्रभूतगजवाजिना ।
पुरं तद्भुवि विख्यातं नाम्ना भोजकटं नृप ॥ १६

स भोजराजः सैन्येन महता परिवारितः ।
अक्षौहिण्या महावीर्यः पाण्डवान्समुपागमत् ॥ १७

ततः स कवची खड्गी शरी धन्वी तली रथी ।
ध्वजेनादित्यवर्णेन प्रविवेश महाचमूम् ॥ १८

विदितः पाण्डवेयानां वासुदेवप्रियेप्सया ।
युधिष्ठिरस्तु तं राजा प्रत्युद्गम्याभ्यपूजयत् ॥ १९

स पूजितः पाण्डुसुतैर्यथान्यायं सुसत्कृतः ।
प्रतिपूज्य च तान्सर्वान्विश्रान्तः सहसैनिकः ।
उवाच मध्ये वीराणां कुन्तीपुत्रं धनंजयम् ॥ २०

सहायोऽस्मि स्थितो युद्धे यदि भीतोऽसि पाण्डव ।
करिष्यामि रणे साह्यमसह्यं तव शत्रुभिः ॥ २१

न हि मे विक्रमे तुल्यः पुमानस्तीह कश्चन ।
निहत्य समरे शत्रूंस्तव दास्यामि फल्गुन ॥ २२

इत्युक्तो धर्मराजस्य केशवस्य च संनिधौ ।
शृण्वतां पार्थिवेन्द्राणामन्येषां चैव सर्वशः ॥ २३

वासुदेवमभिप्रेक्ष्य धर्मराजं च पाण्डवम् ।
उवाच धीमान्कौन्तेयः प्रहस्य सखिपूर्वकम् ॥ २४

---

14 a) K4 D3.4.8 S समासाद्य तु (K4 D3.4.8 च) वा°. — b) K1.2 Dn1 D8 योगि(D8 °गी)नां; G1 गोपानां; Cd योगानां (as in text). G6 ऋषभं (for ईश्वरं). K5 गुरुं (for प्रभुम्). T2 G2 सर्वशस्त्रभृतां वरं. — After 14^{ab}, B2 ins.:

551* कृतप्रतिज्ञो राजासौ वासुदेवेन निर्जितः ।

— c) K5 D8 विजितः; D7 ध्वंसि°; D10 भ्रंशि°; T2 G1.2.5 हिंसि°; M3 (*by corr.*) निर्जि°; Ca.d व्यंसि° (as in text). K5 G5 M1.2.4 (*by corr.*) राजा; M3.4 (*before corr.*).5 राज्ञा (for राजन्).

15 a) K1.2.5 D2.7 पुरा (for रणे). B3 तत्र कृष्णेन हि रणे; B4 यत्रैव निर्जितो राजन्. — b) B4 कृष्णेन (for निर्जितः). — d) K3.4 B2.4.5 Dn1 D3 D6.8.10 कृतं (for चक्रे).

17 ab) Ds2 भोजः सैन्येन महता परिवार्य महामतिः. — c) Some S MSS. अक्षोहिण्या. — d) K4 B2.4.5 Dn1 D3 D6.8.10 क्षिप्रमागमत्; D3.4 समुपागतः.

18 a) K4 B (except B2) Dn1 D3 D6.8.10 धन्वी (for खड्गी). — b) G1 transp. शरी and तली; G3 transp. तली and रथी. D2–4 बली (for तली). K4 B (except B2) Dn1 D3 D6.8.10 तली खड्गी शरासनी; T2 G2 वीरधन्वी शरी रथी. B3 *repeats* 18^{ab} with v.l. [धन्वी (for खड्गी in a) and खड्गी शरी तली रथी (for b).] — c) T G2.3.5 M1.2 रथेन; M3–5 गजेन (for ध्वजेन). K1.2.5 B3.5 D7 °रूपेण.

19 b) K1.2.5 D5 D3.4 °प्रियेच्छया. — d) K2 D3.4 अभिपू° (for अभ्यपू°).

20 B2 om. 20^{abcd}. — a) Dn1 G3 सुपूजितः. K3 B1.3.4 Dn1 D3 D1.2.6 T G1–3 पांडुपुत्रैः. — b) K4 B1.5 Dn1 D3 D6.10 सुसंस्तुतः; K5 सुतोषितः; B3 स्वयं स्तुतः; B4 समंततः; D1.7.8 सुसंस्कृतः (for सुसत्कृतः). — c) K4 B4 D3 D3.4.6.10 °गृह्य; Dn1 °गृह्णात् (for °पूज्य). K4 B5 Dn1 D3.4.6 तु (for च). K (except K4) D7 transp. तान् and सर्वान्. — d) B1.3.5 D7 T1 G1 सह सैनिकैः.

21 a) K4 B1–3 D3 D2–4.7 सा(D2 स)हाय्ये (for सहायो). Dn1 Ds2 D2.7.10 अस्मिन् (*for* अस्मि). — c) B2 रणं (for रणे). B2 पार्थ; B3 सत्यम्; D3 D3.4.7 M5 सह्यम् (for साह्यम्). — d) K3 B3 D3.4 अशक्यं; D7 प्रसह्य (for असह्यं). D7 शत्रुभिस्तव (by transp.).

22 b) M3.5 इति (for इह). — After 22^{ab}, N (Dn2 missing) ins.:

552* हनिष्यामि रणे भागं यन्मे दास्यसि पाण्डव ।
अपि द्रोणकृपौ वीरौ भीष्मकर्णावथो पुनः ।
अथ वा सर्वं एवैते तिष्ठन्तु वसुधाधिपाः ।

[(L. 1) K1.2.5 D7 यं मे (for यन्मे). — (L. 2) D7 महारथौ (for अथो पुनः).]

— d) S यास्यामि. K1–3 फाल्गुन; K4.5 B Dn1 D3 D3.4.6–8.10 मेदिनीं.

23 D1 om. 23^{ab}. — a) D3.4 T1 इत्युक्ते. — b) K (except K4) B2 D7 संनिधौ केशवस्य च (K3 तु). — d) K5 भारत (for सर्वशः). K1.2 सर्वेषां चैव भारत.

24 c) K1.2.5 B2 D1.7 वाक्यं (for धीमान्). — d) D3.4 प्रहसन्; D10 M2 प्रसह्य (for प्रहस्य). D3.4 सख्य°;

युध्यमानस्य मे वीर गन्धर्वैः सुमहाबलैः ।
सहायो घोषयात्रायां कस्तदासीत्सखा मम ॥ २५
तथा प्रतिभये तस्मिन्देवदानवसंकुले ।
खाण्डवे युध्यमानस्य कः सहायस्तदाभवत् ॥ २६
निवातकवचैर्युद्धे कालकेयैश्च दानवैः ।
तत्र मे युध्यमानस्य कः सहायस्तदाभवत् ॥ २७
तथा विराटनगरे कुरुभिः सह संगरे ।
युध्यतो बहुभिस्तात कः सहायोऽभवन्मम ॥ २८
उपजीव्य रणे रुद्रं शक्रं वैश्रवणं यमम् ।
वरुणं पावकं चैव कृपं द्रोणं च माधवम् ॥ २९
धारयन्गाण्डिवं दिव्यं धनुस्तेजोमयं दृढम् ।
अक्षय्यशरसंयुक्तो दिव्यास्त्रपरिबृंहितः ॥ ३०
कौरवाणां कुले जातः पाण्डोः पुत्रो विशेषतः ।
द्रोणं व्यपदिशञ्शिष्यो वासुदेवसहायवान् ॥ ३१
कथमस्मद्विधो ब्रूयाद्भीतोऽस्मीत्ययशस्करम् ।
वचनं नरशार्दूल वज्रायुधमपि स्वयम् ॥ ३२
नास्मि भीतो महाबाहो सहायार्थश्च नास्ति मे ।
यथाकामं यथायोगं गच्छ वान्यत्र तिष्ठ वा ॥ ३३
विनिवर्त्य ततो रुक्मी सेनां सागरसंनिभाम् ।
दुर्योधनमुपागच्छत्तथैव भरतर्षभ ॥ ३४
तथैव चाभिगम्यैनमुवाच स नराधिपः ।
प्रत्याख्यातश्च तेनापि स तदा शूरमानिना ॥ ३५
द्वावेव तु महाराज तस्माद्युद्धाद्व्यपेयतुः ।
रौहिणेयश्च वार्ष्णेयो रुक्मी च वसुधाधिपः ॥ ३६
गते रामे तीर्थयात्रां भीष्मकस्य सुते तथा ।
उपाविशन्पाण्डवेया मन्त्राय पुनरेव हि ॥ ३७
समितिर्धर्मराजस्य सा पार्थिवसमाकुला ।
शुशुभे तारकाचित्रा द्यौश्चन्द्रेणेव भारत ॥ ३८

C. 5. 5390
B. 5. 158. 40
K. 5. 158. 39

इति श्रीमहाभारते उद्योगपर्वणि पञ्चपञ्चाशदधिकशततमोऽध्यायः ॥ १५५ ॥

G_1 स्मित° (for सखि°).

☞ For stanzas 25–29 cf. lines 6–11 and 13–15 of passage No. 39 of App. I of the Virāṭaparvan.

25 Before 25, T_1 G_1 ins. धनंजयः; T_2 अर्जुनः. — ^{d}) $K_{2.5}$ $B_{1.2}$ $D_{1.3.4.7}$ T_2 G_2 सखे (for सखा).

26 See note above. T_2 G_2 om. (hapl.) 26. — ^{a}) $G_{3.5}$ तदा (for तथा). — ^{d}) G_3 कस्तदा यः सखाभवत् (cf. v.l. 27).

27 See note above. K_4 D_{2-4} om. (hapl.) 27. $K_{1-3.5}$ B_2 $D_{1.7}$ transp. 27 and 28. — ^{b}) K (K_4 om.) कालिकेयैश्च; D_7 कालखंजै°. — ^{d}) G_3 कस्तदा यः सखाभवत् (cf. v.l. 26).

28 See note above. $K_{1-3.5}$ B_2 $D_{1.7}$ transp. 27 and 28. — ^{a}) T_2 G_2 तदा (for तथा). — ^{b}) B_2 D_{10} संगमे; $D_{1.2.7}$ S °युगे (for °गरे). — ^{c}) K_4 B Dn_1 Ds $D_{1.3.4.6.8.10}$ G_5 तत्र (for तात). — ^{d}) K_2 कः सहायस्तदाभवत् (= 26^d, 27^d). — After 28, $K_{1.2}$ D_1 S read 31.

29 See note above. — ^{a}) $G_{1.5}$ उपजीवन्; G_3 °गम्य (for °जीव्य). $K_{3.5}$ गुरुं द्रोणं (for रणे रुद्रं). — ^{d}) K (except K_4) T_2 G M_2 कृष्णं (for द्रोणं). $K_{3.5}$ शंकरं (for माधवम्).

30 ^{d}) B_2 °स्त्रशरसंवृतः; M_{3-5} °स्त्रैः परिबृं°.

31 $K_{1.2}$ D_1 S read 31 after 28. — ^{c}) K_1 Ds $D_{2.7}$ $Ca._{d.s}$ शिल्पे; K_2 शल्ये (for शिष्यो). — After 31, K_5 B Dn_1 Ds $D_{1.3.4.6-8.10}$ ins.:

553* भीतोऽस्मीति कथं ब्रूयां दधानो गाण्डिवं धनुः ।

32 ^{b}) $K_{3.4}$ B_4 Dn_1 Ds $D_{6.8.10}$ यशोहरं (for [अ]यशस्करम्). — ^{c}) D_1 S राज° (for नर°).

33 D_6 om. from 33^b up to सागर (in 34^b). — ^{b}) G_1 सहायार्थं च. — ^{d}) $D_{3.4}$ वाप्यत्र; S वात्रैव (for वान्यत्र). — After 33, S ins.:

554* तच्छ्रुत्वा वचनं तस्य विजयस्य च धीमतः ।
[M_{3-5} स (for च).]

34 D_6 om. up to सागर (cf. v.l. 33). — ^{a}) D_1 G_3 विनिवृत्य. — ^{c}) B_3 समा° (for उपा°).

35 ^{a}) $K_{1.2.5}$ B_2 $D_{2.7}$ °संगम्य; $D_{3.4}$ °गम्यैवं; T G °गम्याथ (for °गम्यैनम्). — ^{b}) $K_{1.2.5}$ B_2 $D_{2.7}$ प्रोवाच (for उवाच). $K_{3.4}$ $B_{4.5}$ Dn_1 Ds $D_{1.6.8.10}$ वसुधा° (for स नरा°). — ^{d}) D_1 °मानवान् (for °मानिना).

36 ^{a}) D_7 तौ (for तु). K_5 °भाग; T_1 °राजन् (for °राज). — ^{b}) K_5 युद्धात्तस्माद् (by transp.); T_1 असायुद्धाद्. $K_{3.4}$ B (except B_2) Dn_1 Ds $D_{3.4.6.8.10}$ Ca

१५६

C. 5. 5391
B. 5. 159. 1
K. 5. 159. 1

जनमेजय उवाच ।
तथा व्यूढेष्वनीकेषु कुरुक्षेत्रे द्विजर्षभ ।
किमकुर्वन्त कुरवः कालेनाभिप्रचोदिताः ॥ १
वैशंपायन उवाच ।
तथा व्यूढेष्वनीकेषु यत्तेषु भरतर्षभ ।
धृतराष्ट्रो महाराज संजयं वाक्यमब्रवीत् ॥ २
एहि संजय मे सर्वमाचक्ष्वानवशेषतः ।
सेनानिवेशे यद्वृत्तं कुरुपाण्डवसेनयोः ॥ ३
दिष्टमेव परं मन्ये पौरुषं चाप्यनर्थकम् ।
यदहं जानमानोऽपि युद्धदोषान्क्षयोदयान् ॥ ४
तथापि निकृतिप्रज्ञं पुत्रं दुर्द्यूतदेविनम् ।
न शक्नोमि नियन्तुं वा कर्तुं वा हितमात्मनः ॥ ५
भवत्येव हि मे सूत बुद्धिर्दोषानुदर्शिनी ।
दुर्योधनं समासाद्य पुनः सा परिवर्तते ॥ ६
एवं गते वै यद्भावि तद्भविष्यति संजय ।
क्षत्रधर्मः किल रणे तनुत्यागोऽभिपूजितः ॥ ७
संजय उवाच ।
त्वद्युक्तोऽयमनुप्रश्नो महाराज यथार्हसि ।

अपेयतु; T_2 G_2 व्यपोहितौ (for व्यपेयतुः). — ^{c}) D_{2-4} तु (for च). — ^{d}) $K_{3.5}$ $B_{2.5}$ Dn_1 $D_{1.7.10}$ वसुधाधिप; S स नराधिपः (G_1 भरतर्षभ).

37 ^{b}) T_1 $G_{2.3.5}$ तदा (for तथा). — ^{d}) $K_{3.4}$ Dn_1 D_3 $D_{6.8.10}$ च; B (except B_2) D_{2-4} ह (for हि).

38 ^{a}) D_1 संमतिर्. — ^{b}) $K_{1.2}$ °शताकुला; $B_{3.5}$ पार्थिवैश्च (B_5 °वैः सा) समा°. — ^{c}) $K_{3.4}$ B (except B_2) Dn_1 D_3 $D_{6.8.10}$ तारकैश् (for तारका°). — ^{d}) T_2 च चंद्रेण; G_5 सचंद्रेण (for चन्द्रेणेव). $K_{1-3.5}$ $D_{1.7}$ शारदी (for भारत).

Colophon. Dn_2 $D_{5.9}$ G_4 missing. — *Sub-parvan:* $K_{1.2}$ B_2 D_7 T_1 G_5 अभिनिर्याणयात्रा; K_3 निर्याणयात्रा; K_4 $B_{1.3.4}$ Dn_1 D_3 $D_{6.8.10}$ $M_{1.2}$ अभिनिर्यात्रा (D_{10} °णं); D_2 अभियात्राः to it K_{1-3} D_7 add समाप्ता. — *Adhy. name:* B_5 तीर्थयात्रा; D_1 T_1 G_5 रुक्मि(G_5 °क्मी)प्रत्याख्यानं; $M_{1.2}$ रुक्मि(M_2 °ग्मि)विसर्गः. — *Adhy. no.* (figures, words or both): D_6 48 (=148); T_1 $G_{1.2.5}$ 159; T_2 M 158 (M_4 157); G_3 156. — *S'loka no.:* K_5 39; Dn_1 40.

156

☞ This adhy. is missing in Dn_2 (cf. v.l. 5. 143. 2); the MS. is mostly ignored here.

1 ^{b}) D_2 T_2 G_2 यत्तेषु भरतर्षभ (D_2 °भाः) (=2^b); T_1 $G_{1.3.5}$ M युद्धाय भरतर्षभाः (cf. v.l. 2^b) — D_{10} om. (hapl.) 1^c–2^b. — ^{c}) $K_{3.4}$ $B_{4.5}$ Dn_1 D_3 $D_{1.6.8}$ किमकुर्वंश्च; $B_{1.3}$ किमकुर्वत. G_5 कौरव्याः. — ^{d}) $K_{1.2.5}$ °प्रणोदिताः.

1 ^{a}) B D (except D_2) भद्रे (for वत्से). — ^{d}) $K_{3.4}$ $D_{1.2.7}$ महाव्रतं; G_5 महामुनिं.

2 ^{a}) K_3 B D (except $D_{1.2}$) महेंद्रं वै °श्रेष्ठं. — ^{b}) K_{3-5} B D (except D_2) रामो. B Dn Ds $D_{6.8.10}$ उपास्ति ह; $D_{3.4}$ उपाश्रितः (for उपासते). — ^{c}) B D (except $D_{1.2.7}$) वेदविद्वांसः.

3 D_7 om. (hapl.) 3^{b}–4^{a}. — ^{c}) Hypermetric! G_1 एव (for पूर्वं). B D (except $D_{1.2}$) अभिवाद्य च तं मूर्ध्ना; T_2 शिरसाभिवाद्य वृद्धं.

4 D_7 om. 4^{a} (cf. v.l. 3). — ^{b}) K_3 अभीप्सितं; K_5 B_2 चिकीर्षितं (for मनी°). — ^{d}) D_{10} transp. सर्वं and तत्ते. K_1 ते तत्; K_5 त्वेतत्; D_8 तात (for तत्ते).

5 ^{c}) $D_{3.4}$ जामदग्न्यस्ततो वीरः.

C. 5. 6057
B. 5. 176. 34
K. 5. 176. 34

जमदग्निसुतो वीरः सर्वशस्त्रभृतां वरः ॥ ५
एवं ब्रुवति कन्यां तु पार्थिवे होत्रवाहने ।
अकृतव्रणः प्रादुरासीद्रामस्यानुचरः प्रियः ॥ ६
ततस्ते मुनयः सर्वे समुत्तस्थुः सहस्रशः ।
स च राजा वयोवृद्धः सृञ्जयो होत्रवाहनः ॥ ७
ततः पृष्ट्वा यथान्यायमन्योन्यं ते वनौकसः ।
सहिता भरतश्रेष्ठ निषेदुः परिवार्य तम् ॥ ८
ततस्ते कथयामासुः कथास्तास्ता मनोरमाः ।
कान्ता दिव्याश्च राजेन्द्र प्रीतिहर्षमुदा युताः ॥ ९
ततः कथान्ते राजर्षिर्महात्मा होत्रवाहनः ।
रामं श्रेष्ठं महर्षीणामपृच्छदकृतव्रणम् ॥ १०
क्व संप्रति महाबाहो जामदग्न्यः प्रतापवान् ।
अकृतव्रण शक्यो वै द्रष्टुं वेदविदां वरः ॥ ११

अकृतव्रण उवाच ।

भवन्तमेव सततं रामः कीर्तयति प्रभो ।
सृञ्जयो मे प्रियसखो राजर्षिरिति पार्थिव ॥ १२
इह रामः प्रभाते श्वो भवितेति मतिर्मम ।
द्रष्टास्येनमिहायान्तं तव दर्शनकाङ्क्षया ॥ १३
इयं च कन्या राजर्षे किमर्थं वनमागता ।
कस्य चेयं तव च का भवतीच्छामि वेदितुम् ॥ १४

होत्रवाहन उवाच ।

दौहित्रीयं मम विभो काशिराजसुता शुभा ।
ज्येष्ठा स्वयंवरे तस्थौ भगिनीभ्यां सहानघ ॥ १५
इयमम्बेति विख्याता ज्येष्ठा काशिपतेः सुता ।
अम्बिकाम्बालिके त्वन्ये यवीयस्यौ तपोधन ॥ १६
समेतं पार्थिवं क्षत्रं काशिपुर्यां ततोऽभवत् ।
कन्यानिमित्तं ब्रह्मर्षे तत्रासीदुत्सवो महान् ॥ १७
ततः किल महावीर्यो भीष्मः शांतनवो नृपान् ।
अवाक्षिप्य महातेजास्तिस्रः कन्या जहार ताः ॥ १८
निर्जित्य पृथिवीपालानथ भीष्मो गजाह्वयम् ।
आजगाम विशुद्धात्मा कन्याभिः सह भारत ॥ १९
सत्यवत्यै निवेद्याथ विवाहार्थमनन्तरम् ।

---

6 ^{a}) S तां (for तु). — ^{b}) Here and below a few MSS. होतृ°. — ^{c}) Hypermetric!

7 ^{d}) K_5 Dn_1 D_7 संजयो (for सृञ्जयो).

8 ^{a}) $K_{2.5}$ B D (except $D_{1.7}$) दृष्ट्वा (for पृष्ट्वा). B Dn Ds $D_{6.8.10}$ कृतातिथ्यम् (for यथान्यायम्). — ^{c}) $K_{1.2.5}$ च कुरुश्रेष्ठ; Ca भरत° (as in text).

9 ^{b}) Ds सुमनोरमाः; $D_{3.4}$ सुमनोहराः (for ता मनो°). — ^{c}) $K_{3.4}$ B Dn Ds $D_{2-4.6-8.10}$ धन्या; D_1 पुण्या; T $G_{1.2}$ तथा; G_5 कथा (for कान्ता). — ^{d}) $B_{1.2.4}$ $D_{3.4}$ °मुदान्विताः; D_1 °समायुताः; Cs as in text.

10 ^{c}) $B_{1.2.4}$ द्विजातीनां (for मह°).

11 ^{a}) B_3 सोप्यस्ति (for संप्रति). K_3 $G_{1.3.5}$ $M_{1.2}$ महाबाहुः. — ^{c}) $K_{1.2}$ $D_{1.2}$ M शक्यं; D_7 शक्ये (for शक्यो). $B_{2.5}$ [ऽ]सौ; D_7 [ऽ]हं; G_2 नु (for वै). — ^{d}) $K_{1.2}$ $D_{1.7}$ $G_{1.5}$ M वरं; $B_{1.4.5}$ Dn_2 $D_{2.10}$ वर (for वरः).

12 ^{b}) K_5 $D_{1.7}$ S (except T_2 $G_{1.2}$) कीर्तयते. K_4 प्रभुः; D_7 S (except G_3 $M_{1.2}$) विभो. — ^{c}) K (except K_3) B_3 D (except D_{1-4}) प्रियसखा. — ^{d}) $K_{2.4}$ T G_2 पार्थिवः.

13 ^{a}) $K_{3.5}$ वै (for श्वो). $D_{3.4}$ इह प्रभाते श्वोभूते. — ^{b}) D_8 D_{10} भवेदिति (for भवि°). — ^{c}) T_2 G_2 द्रष्टासि तम्; G_1 °स्येतम्; G_5 °सीमम्. K_1 $B_{2.3}$ $D_{8.10}$ [आ]यातं; D_1 प्राप्तं.

14 ^{a}) $K_{1.2.5}$ transp. च and कन्या. — ^{b}) K $D_{1.7}$ इह चा° (for वनमा°). — ^{c}) T G_2 केयं (for चे°). — ^{d}) D_7 एनामिच्छामि; T_1 $G_{1.5}$ ब्रवीहीच्छामि.

15 ^{b}) K_4 B Dn Ds $D_{6.8.10}$ प्रिया (for शुभा). — ^{c}) K_1 B_3 Dn_2 Ds स्वयंवरा; K_3 $D_{3.4.8}$ °वरं. — ^{d}) S (except T_1) भगिनीनां. T G M_2 तदानघ.

16 ^{b}) A few S MSS. काशी°. — ^{c}) $K_{1.3.5}$ B (except B_2) Dn D_6 कन्ये (for त्वन्ये). T_2 $G_{1.2}$ अंबिकांबालिकेत्यन्ये. — ^{d}) $K_{1.2}$ B (except B_2) D (except $D_{1.7}$) कनीयस्यौ त°.

17 ^{b}) A few S MSS. काशी°. $K_{1.2.5}$ $B_{1.2.4}$ G_3 तदा°; T अथा° (for ततो°). — ^{c}) $B_{1.3.5}$ Dn Ds $D_{6-8.10}$ विप्रर्षे; B_2 $D_{3.4}$ राजर्षे. — ^{d}) T_1 तदा (for तत्र). G_5 अभूद् (for आसीद्).

18 ^{b}) D_2 नृपः; $M_{1.2}$ महान् (for नृपान्). — ^{c}) K_4 B Dn Ds $D_{3.4.6.8.10}$ अधिक्षिप्य; $D_{1.2.7}$ तत्राक्षिप्य; T_2 G_2 अव°.

19 ^{c}) D_1 महावीर्यः (for विशु°). — ^{d}) B (except B_3) भारतः (for °त).

20 ^{b}) K_4 B D (except $D_{1.7}$) विवाहं समनंतरं.

भ्रातुर्विचित्रवीर्यस्य समाज्ञापयत प्रभुः ॥ २०
ततो वैवाहिकं दृष्ट्वा कन्येयं समुपार्जितम् ।
अब्रवीत्तत्र गाङ्गेयं मन्त्रिमध्ये द्विजर्षभ ॥ २१
मया शाल्वपतिर्वीर मनसाभिवृतः पतिः ।
न मामर्हसि धर्मज्ञ परचित्तां प्रदापितुम् ॥ २२
तच्छ्रुत्वा वचनं भीष्मः संमन्त्र्य सह मन्त्रिभिः ।
निश्चित्य विससर्जेमां सत्यवत्या मते स्थितः ॥ २३
अनुज्ञाता तु भीष्मेण शाल्वं सौभपतिं ततः ।
कन्येयं मुदिता विप्र काले वचनमब्रवीत् ॥ २४
विसर्जितास्मि भीष्मेण धर्मं मां प्रतिपादय ।
मनसाभिवृतः पूर्वं मया त्वं पार्थिवर्षभ ॥ २५
प्रत्याचख्यौ च शाल्वोऽपि चारित्रस्याभिशङ्कितः ।
सेयं तपोवनं प्राप्ता तापस्येऽभिरता भृशम् ॥ २६
मया च प्रत्यभिज्ञाता वंशस्य परिकीर्तनात् ।
अस्य दुःखस्य चोत्पत्तिं भीष्ममेवेह मन्यते ॥ २७

अम्बोवाच ।

भगवन्नेवमेवैतद्यथाह पृथिवीपतिः ।
शरीरकर्ता मातुर्मे सृञ्जयो होत्रवाहनः ॥ २८
न ह्युत्सहे स्वनगरं प्रतियातुं तपोधन ।
अवमानभयाच्चैव व्रीडया च महामुने ॥ २९
यत्तु मां भगवान्रामो वक्ष्यति द्विजसत्तम ।
तन्मे कार्यतमं कार्यमिति मे भगवन्मतिः ॥ ३० C. 5. 6062 B. 5. 178. 59 K. 5. 176. 59

इति श्रीमहाभारते उद्योगपर्वणि पञ्चसप्तत्यधिकशततमोऽध्यायः ॥ १७५ ॥

— Ds_{2} om. (hapl.) 20^{c}–21^{b}. — ^{d}) $K_{1.2}$ प्रभो.

21 Ds_{2} om. 21^{ab} (cf. v.l. 20). — ^{a}) $K_{1.2.5}$ B_{2} तत्र; $K_{3.4}$ $B_{1.3-5}$ Dn_{1} $D_{1-4.6.8}$ तं तु; Dn_{2} $D_{7.10}$ तत्तु (for ततो). — ^{b}) B_{3} T_{2} $G_{1.2}$ समुपस्थिता; D_{7} °पाहृतं; T_{1} $G_{3.5}$ M_{5} °पस्थितं. — ^{c}) T G तात (for तत्र). — ^{d}) $D_{3.4}$ नृप°; $M_{1.2}$ सभा° (for मन्त्रि°).

22 22^{ab} = (var.) 5. 171. 6^{ab}. — ^{a}) K_{3} D_{1} S साल्व°. $K_{1.4}$ Dn_{2} वीरः; $K_{2.5}$ D_{7} पूर्वं (for वीर). — ^{b}) K_{1} विधृतः; T_{1} हि धृतः (for [अ]भि°). — ^{d}) $K_{1.2}$ $D_{2.7}$ प्रदाय वै; K_{5} यवीयसे; T G प्रदापय (for °पितुम्). K_{2} m. $_{3.4}$ B Dn Ds $D_{3.4.6.8.10}$ दातुं भ्रात्रेन्यमानसां.

23 ^{b}) K_{3} D_{2} बंधु° (for मन्त्रि°). — ^{c}) Dn_{1} $D_{1.7}$ एनां (for इमां). — ^{d}) = 1. 95. 5^{d}; 96. 1^{d}, 59^{d}.

24 D_{8} om. (hapl.) 24^{b}–25^{a}. — ^{b}) $K_{1.3}$ D_{1} S साल्वं. D_{1} तदा (for ततः). — ^{c}) K (except K_{4}) B_{2} $D_{1.2.7}$ विदिता (for मु°). $K_{3.4}$ B D (except $D_{1.2.7}$; D_{8} om.) तत्र (for विप्र).

25 D_{8} om. 25^{a} (cf. v.l. 24). — ^{b}) Dn_{1} स्वधर्मं; S धर्मे मां. B_{2} D_{1} प्रतिपालय. — ^{c}) Dn_{1} [अ]भिगतः; D_{2} च वृतः; T_{1} हि वृतः.

26 ^{a}) $K_{1.3}$ D_{1} S साल्वो. K_{4} B (except B_{2}) Dn Ds $D_{6.8.10}$ [ऽ]स्याश् (for ऽपि). — ^{b}) Dn_{1} Ds चरित्रस्य; T_{2} चारित्रं च. K_{3} [अ]विशंकितः; $B_{1.3}$ S (except G_{3}) [अ]तिशंकितः; $D_{3.4}$ [अ]भिशंकिता. $K_{1.2.4.5}$ $D_{1.2.7}$ चारित्रेस्या वि(D_{2} °भि)शंकितः. — ^{d}) B_{5} D_{7} T_{2} $G_{2.3}$ तपसि; D_{3} M_{3-5} तपस्ये. $K_{1.2.5}$ निरता; T_{1} [ऽ]तिरता (for ऽभि°).

27 ^{a}) $K_{1.2}$ तु (for च). — ^{c}) B_{3} Ds D_{10} उत्पत्तिः; $D_{3.4.7.8}$ उत्पत्तौ; Ca as in text. — ^{d}) $K_{1.2.5}$ भीष्ममेव हि; Ds $D_{6-8.10}$ भीष्म एवेह. — After 27, K_{1-5} D_{8} ins.:

575* एवं ब्रुवति वै राज्ञि कन्या वचनमब्रवीत् ।

28 ^{a}) K_{4} B (except B_{2}) Dn Ds $D_{6.8.10}$ इह (for एतद्).

29 ^{a}) $K_{1.2.5}$ न ह्युत्सहामि नगरं; K_{3} नाभ्युत्सहामि नगरं; D_{6} न समुत्सहे स्व° (hypermetric!); D_{10} नोत्सहे पितृ°; T_{1} नाभ्युत्सहे स्व°. — ^{c}) K_{4} B (except B_{2}) D (except $D_{1.2.7}$) अप° (for अव°). — ^{d}) $K_{3.4}$ $D_{1.2.7}$ G_{1} °मते (for °मुने).

30 ^{a}) D_{1} स (for यत्). D_{1} यद्; T_{1} $G_{3.4}$ M मा; G_{5} मे (for मां). K_{1} Dn_{2} $M_{1.2}$ भगवन्. — ^{b}) K_{4} B_{2} Ds_{2} D_{1} G_{3} $M_{1.2}$ °सत्तमः. — ^{c}) $K_{1.2}$ कार्यसमं. — ^{d}) Dn_{1} D_{7} G_{3} भगवान्. $D_{3.4}$ मनः (for मतिः).

Colophon om. in G_{1}. $D_{5.9}$ G_{4} missing. — *Sub-parvan:* K B Dn Ds $D_{1-4.6-8.10}$ T_{1} G_{5} $M_{1.2.5}$ अंबोपाख्यान. — *Adhy. no.* (figures, words or both): D_{6} (*sec. m.*) 56 (=156); T M_{4} 177; G_{2} 187; G_{3} 175 (as in text); G_{5} $M_{3.5}$ 178; $M_{1.2}$ 176. — *S'loka no.:* K_{5} 30; Dn 59.

१७६

C. 5. 6083
B. 5. 177. 1
K. 5. 177. 1

अकृतव्रण उवाच ।

दुःखद्वयमिदं भद्रे कतरस्य चिकीर्षसि ।
प्रतिकर्तव्यमबले तत्त्वं वत्से ब्रवीहि मे ॥ १
यदि सौभपतिर्भद्रे नियोक्तव्यो मते तव ।
नियोक्ष्यति महात्मा तं रामस्त्वद्धितकाम्यया ॥ २
अथापगेयं भीष्मं तं रामेणेच्छसि धीमता ।
रणे विनिर्जितं द्रष्टुं कुर्यात्तदपि भार्गवः ॥ ३
सृञ्जयस्य वचः श्रुत्वा तव चैव शुचिस्मिते ।
यदत्रानन्तरं कार्यं तदद्यैव विचिन्त्यताम् ॥ ४

अम्बोवाच ।

अपनीतास्मि भीष्मेण भगवन्नविजानता ।
न हि जानाति मे भीष्मो ब्रह्मञ्शाल्वगतं मनः ॥ ५
एतद्विचार्य मनसा भवानेव विनिश्चयम् ।
विचिनोतु यथान्यायं विधानं क्रियतां तथा ॥ ६
भीष्मे वा कुरुशार्दूले शाल्वराजेऽथ वा पुनः ।
उभयोरेव वा ब्रह्मन्यद्युक्तं तत्समाचर ॥ ७
निवेदितं मया ह्येतद्दुःखमूलं यथातथम् ।
विधानं तत्र भगवन्कर्तुमर्हसि युक्तितः ॥ ८

अकृतव्रण उवाच ।

उपपन्नमिदं भद्रे यदेवं वरवर्णिनि ।
धर्मं प्रति वचो ब्रूयाः शृणु चेदं वचो मम ॥ ९
यदि त्वामापगेयो वै न नयेद्गजसाह्वयम् ।
शाल्वस्त्वां शिरसा भीरु गृह्णीयाद्रामचोदितः ॥ १०
तेन त्वं निर्जिता भद्रे यस्मान्नीतासि भामिनि ।
संशयः शाल्वराजस्य तेन त्वयि सुमध्यमे ॥ ११
भीष्मः पुरुषमानी च जितकाशी तथैव च ।
तस्मात्प्रतिक्रिया युक्ता भीष्मे कारयितुं त्वया ॥ १२

176

1 a) K1.2 दुष्टं द्वयं; K5 दुष्टद्वयं; T G1 दुःखं द्वयोः; G2.3.5 दुःखद्वयोः; C3 as in text. — c) T1 एवैतत् (for अबले). — d) K4 B D (except D1.7) वदस्व (for ब्रवीहि).

2 a) D10 शाल्वो (for भद्रे). — b) B3 Dn Ds D3.4.10 मतस्; D6.8 मतिस् (for मते). — c) K1.2.5 D2 T G2.5 महात्मानं; K4 B Dn Ds D3.4.6.8.10 G1 महात्मा स.

3 a) B D (except D1.2.7) त्वं (for तं).

4 b) Ds G1.3.5 तथैव च; T तदै(T2 °दे)व च; G2 यस्तदेव; M (except M1) तवैव च (for तव चैव). — c) K4 B D (except D1.7) ते भृशं (for [अ]नन्तरं). — d) K5 D1.6.8 T2 G1.2.5 M1.2 अत्र (for अद्य). D10 अभिधीयतां (for विचि°).

5 b) D3.4 भगवन्नागसाह्वयं. — c) B D (except D1.7) नाभिजानाति (D3.4 °नीत). K1.2 B3 D3.4 transp. मे and भीष्मो. — d) M ब्रूहत् (for ब्रह्मन्). K3 D1 S साल्व°.

6 b) K4 B1.3.4 Dn Ds D6.10 एतद्; B5 इह (for एव). S भगवानेव निश्चयं.

7 a) Ds D6.10 च (for वा). — b) D1 S (mostly) साल्व°. — d) B1.3–5 Dn Ds D6.8.10 युक्तं यत् (for यद्युक्तं). B2 यत्तद्युक्तं समा°.

8 ab) K1.2.5 तेद्य दुःखं ह्येतद् (for ह्येतद्दुःखमूलं). D3.4 यथायथं; G3 M5 यथा तथा. — c) D3.4 त्वत्र (for तत्र). Ds2 D6.7 T1 भगवान्. — d) Ds2 D6.7 T1 अर्हति. D1 तत्वतः; D7 धर्मवित्; D8 संयुतः (for युक्तितः).

9 T2 G2 om. 9^a–10^b; G2 om. the ref. also. — b) K4 एतद् (for एवं). — c) K (except K4) D2.7 T1 G1 धर्म्यं. K3 T1 ब्रूयां. — d) G5 शृण्वेदं वचनं मम.

10 T2 G2 om. 10^{ab} (cf. v.l. 9). — ab) M1.2 न नयेत (for वै न नयेद्). — c) K3 D1 S (mostly) साल्वः. M3–5 त्वा (for त्वां). D1 भीतः (for भीरु). — d) K3.5 D7 रामनोदितः; M कामचोदितः (M4 *sup. lin.* as in text).

11 a) S (except G3) येन (for तेन). — b) K3–5 S नीता च (for नीतासि). B Dn Ds D3.4.6 (m as in text).8.10 भाविनि; D7 G1.3.5 M2 भामिनी. — c) K3 D1 S साल्व°.

12 b) D1.7 मदोत्कटः (for तथैव च). — d) K3 B D (except D1.2.7.8) तव (for त्वया).

☞ In D4, the portion from stanza 13 up to

अम्बोवाच ।

ममाप्येष महान्ब्रह्मन्हृदि कामोऽभिवर्तते ।
घातयेयं यदि रणे भीष्ममित्येव नित्यदा ॥ १३
भीष्मं वा शाल्वराजं वा यं वा दोषेण गच्छसि ।
प्रशाधि तं महाबाहो यत्कृतेऽहं सुदुःखिता ॥ १४

भीष्म उवाच ।

एवं कथयतामेव तेषां स दिवसो गतः ।
रात्रिश्च भरतश्रेष्ठ सुखशीतोष्णमारुता ॥ १५
ततो रामः प्रादुरासीत्प्रज्वलन्निव तेजसा ।
शिष्यैः परिवृतो राजञ्जटाचीरधरो मुनिः ॥ १६
धनुष्पाणिरदीनात्मा खड्गं बिभ्रत्परश्वधी ।
विरजा राजशार्दूल सोऽभ्ययात्सृञ्जयं नृपम् ॥ १७
ततस्तं तापसा दृष्ट्वा स च राजा महातपाः ।
तस्थुः प्राञ्जलयः सर्वे सा च कन्या तपस्विनी ॥ १८
पूजयामासुरव्यग्रा मधुपर्केण भार्गवम् ।
अर्चितश्च यथायोगं निषसाद सहैव तैः ॥ १९
ततः पूर्वव्यतीतानि कथयेते स्म तावुभौ ।
सृञ्जयश्च स राजर्षिर्जामदग्न्यश्च भारत ॥ २०
ततः कथान्ते राजर्षिर्भृगुश्रेष्ठं महाबलम् ।
उवाच मधुरं काले रामं वचनमर्थवत् ॥ २१
रामेयं मम दौहित्री काशिराजसुता प्रभो ।
अस्याः शृणु यथातत्त्वं कार्यं कार्यविशारद ॥ २२
परमं कथ्यतां चेति तां रामः प्रत्यभाषत ।
ततः साभ्यगमद्रामं ज्वलन्तमिव पावकम् ॥ २३
सा चाभिवाद्य चरणौ रामस्य शिरसा शुभा ।
स्पृष्ट्वा पद्मदलाभाभ्यां पाणिभ्यामग्रतः स्थिता ॥ २४ C. 5. 7008 B. 5. 177. 24 K. 5. 177. 24

---

5. 178. 29^{ab} is lost on a missing fol.; the MS. is mostly ignored up to the end of the lacuna.

13 ^{a}) $K_{1.5}$ B_2 $D_{1.2.7}$ महा-; $K_{3.4}$ $B_{1.3-5}$ Dn Ds $D_{8.10}$ सदा; $D_{6.8}$ ततो (for महान्). — ^{b}) $K_{4.5}$ हि वर्तते; Ds [ऽ]ति°; D_8 G_3 $M_{3.4}$ [ऽ]भिवर्धते; D_7 [ऽ]पि वर्तते; D_8 [ऽ]भ्यवर्तत; $M_{1.2}$ [ऽ]नुवर्तते.

14 ^{a}) K_3 D_1 S साल्व°. — ^{b}) B_3 यस्माद्दोषमिहेच्छसि. — After 14, T_2 $G_{1.2}$ ins. a colophon (*adhy. no.* 178).

16 ^{d}) $K_{1.2}$ D_8 जटी; K_5 शिखी (for जटा-). T G नृप (for मुनिः).

17 ^{b}) A few MSS. परस्वधी, °स्वधं, °श्वधं. B Ds $D_{3.6.10}$ स च राजा महातपाः (= 18^{b}). — ^{c}) K_4 D_3 G_3 विरजो; B (except B_4) Ds $D_{6.10}$ विनयाद्; M_4 (*inf. lin.*) विराजन्. D_3 विनयान्नरशार्दूल. — ^{d}) K_3 B Dn_2 D_6 transp. सोऽभ्य° and सृञ्जयं. D_3 सृंजयः. $B_{3.5}$ $D_{3.6}$ नृपः; B_4 तदा (for नृपम्). Ds D_{10} सृंजयः सोभ्ययान्नृपः.

18 ^{a}) K_3 B_2 D_7 T_1 G_3 ते (for तं). D_2 तापसं. D_3 रामं; D_7 सर्वे (for दृष्ट्वा). — D_7 om. (hapl.) 18^{bc}. — ^{b}) D_3 (m as in text) दृष्ट्वा (for स च). — Dn_1 om. 18^{c}–19^{d}. — ^{c}) K_4 B D (except $D_{1.2}$; Dn_1 D_7 om.) राजन् (for सर्वे). — ^{d}) Ds D_{10} यश° (for तप°).

19 Dn_1 om. 19 (cf. v.l. 18). — ^{a}) D_2 G_2 अव्यग्रं. — ^{c}) $K_{1.2}$ अर्हितश्च; S पूजितश्च. D_1 स (for च). K_3 यथायोग्यं; K_4 B D (except $D_{1-3.7}$; Dn_1 om.) T G यथान्यायं. — ^{d}) D_1 T $G_{1.2.5}$ M सहाथ तैः; D_7 सहाध्वरैः; G_3 सभासदैः.

20 ^{a}) B_2 Dn_1 G_3 पूर्वं (for पूर्व-). — ^{b}) K_4 B D M_{3-5} कथयंतौ. — ^{c}) $D_{1.3}$ transp. च and स. B Dn Ds $D_{6.8.10}$ आसा(Ds D_8 °स-; D_{10} °सी)तां जामदग्न्यश्च. — ^{d}) K_5 प्रतापवान् (for च भारत). B Dn Ds $D_{6.8}$ सृंजयश्चैव भारत; D_{10} सृंजयो होत्रवाहनः (= 5. 175. 7^{d}, 28^{d}).

21 ^{a}) K_5 B_3 D (except $D_{1.7}$) G_5 तथा (for ततः). — ^{c}) K_1 Ds D_1 वचनं (for मधुरं). — M_2 om. 21^{d}–23^{d}. — ^{d}) T G_5 कामं (for रामं). D_1 मधुरम् (for वचनम्). K_3 उत्तमं (for अर्थवत्).

22 M_2 om. 22 (cf. v.l. 21). — ^{b}) A few MSS. काशी°. K $D_{1.7}$ विभो (for प्रभो).

23 M_2 om. 23 (cf. v.l. 21) — ^{a}) T_2 G_5 प्रथमं (for परमं). — ^{b}) D_7 transp. तां and रामः. B_3 $D_{3.8}$ T G $M_{3.4}$ तं (for तां). $D_{1.2}$ रामः प्रत्यभ्यभाषत. — ^{c}) K_4 B (except B_2) Dn Ds $D_{6.10}$ साभ्यवदद्; $D_{3.7}$ साभ्यागमद्. S राजन् (for रामं). — ^{d}) $K_{1.2.5}$ ज्वलंतमनलं यथा.

24 ^{a}) K_{3-5} T_2 $G_{2.5}$ $M_{1.2}$ साथ°; B Dn Ds $D_{3.6.8.10}$ ततो°; D_7 सांबा°; G_1 साभिवाद्याथ (for सा चाभि°). — ^{b}) Dn_2 Cn शिरसौ (= श्रेष्ठौ Nil.!) (for शिरसा). K_4 तदा; B (except B_2) Dn Ds D_6 $M_{1.2}$ शुभौ; D_8 उभौ (for शुभा). — ^{c}) $K_{1.2}$ $D_{1.3}$ T_2 G_2 पद्मपलाशाभ्यां; Dn_1 पद्मदलाग्राभ्यां.

C. 5. 7007
B. 5. 177. 25
K. 5. 177. 25

रुरोद सा शोकवती बाष्पव्याकुललोचना ।
प्रपेदे शरणं चैव शरण्यं भृगुनन्दनम् ॥ २५

राम उवाच ।

यथासि सृञ्जयस्यास्य तथा मम नृपात्मजे ।
ब्रूहि यत्ते मनोदुःखं करिष्ये वचनं तव ॥ २६

अम्बोवाच ।

भगवञ्शरणं त्वाद्य प्रपन्नास्मि महाव्रत ।
शोकपङ्कार्णवाद्घोरादुद्धरस्व च मां विभो ॥ २७

भीष्म उवाच ।

तस्याश्च दृष्ट्वा रूपं च वयश्चाभिनवं पुनः ।
सौकुमार्यं परं चैव रामश्चिन्तापरोऽभवत् ॥ २८
किमियं वक्ष्यतीत्येवं विमृशन्भृगुसत्तमः ।
इति दध्यौ चिरं रामः कृपयाभिपरिप्लुतः ॥ २९
कथ्यतामिति सा भूयो रामेणोक्ता शुचिस्मिता ।
सर्वमेव यथातत्त्वं कथयामास भार्गवे ॥ ३०
तच्छ्रुत्वा जामदग्न्यस्तु राजपुत्र्या वचस्तदा ।
उवाच तां वरारोहां निश्चित्यार्थविनिश्चयम् ॥ ३१
प्रेषयिष्यामि भीष्माय कुरुश्रेष्ठाय भामिनि ।
करिष्यति वचो धर्म्यं श्रुत्वा मे स नराधिपः ॥ ३२
न चेत्करिष्यति वचो मयोक्तं जाह्नवीसुतः ।
धक्ष्याम्येनं रणे भद्रे सामात्यं शस्त्रतेजसा ॥ ३३
अथ वा ते मतिस्तत्र राजपुत्रि निवर्तते ।
तावच्छाल्वपतिं वीरं योजयाम्यत्र कर्मणि ॥ ३४

अम्बोवाच ।

विसर्जितास्मि भीष्मेण श्रुत्वैव भृगुनन्दन ।
शाल्वराजगतं चेतो मम पूर्वं मनीषितम् ॥ ३५
सौभराजमुपेत्याहमब्रुवं दुर्वचं वचः ।
न च मां प्रत्यगृह्णात्स चारित्रपरिशङ्कितः ॥ ३६

---

25 a) K $D_{1.2}$ Ca. d शुक्रुद($K_{3.5}$ Ca °दं)ती (for शोक°). S प्ररुरोद वरारोहा. — b) Ds बाष्पगद्गदलोचना; M_{3-5} °पर्याकुलेक्षणा. — c) $K_{1.2.5}$ चैनं; D_{10} रामं (for चैव). — d) D_{10} तापसं (for शरण्यं).

26 a) K_{3-5} B D त्वं (for [अ]सि). D_{10} असि (for अस्य). — b) B_{3-5} Dn Ds $D_{6.8.10}$ मे त्वं (Dn_{1} [by transp.] त्वं मे) (for मम). — c) $K_{1.2.5}$ वद (for ब्रूहि).

27 a) $K_{1.2.5}$ शरण्यं (for भगवन्). — b) $B_{4.5}$ D (except Dn_{1} $D_{1.2}$) महाव्रतं. — cd) Ds_{1} $D_{6.10}$ °पंकार्णवे. B Dn Ds $D_{6.8.10}$ मग्नां घोरादुद्धर (for घोरादुद्धरस्व च). $M_{1.2}$ मा (for मां). B_{2} S प्रभो; $B_{4.5}$ स्थितां (for विभो).

28 a) $K_{1.2}$ स; K_{3} $B_{2.5}$ $D_{1-3.7}$ तु (for the first च). K_{3} D_{7} तद्रूपं (for रूपं च). K_{5} तस्याः सुरूपं दृष्ट्वा च. — b) K_{3-5} B D (except D_{10}) G_{1} वपुश् (for वयश्). K_{2} $D_{3.7}$ G_{5} M_{4} चापि (for चाभि-). $B_{2.4}$ शनैः (for पुनः). — d) $K_{3.4}$ $D_{1.2.7}$ रामश्चिंतां समा(K_{4} $D_{2.7}$ °तामथा)विशत्.

29 D_{1} om. 29–30. — a) $K_{1.3}$ D_{3} M एव (for एवं). — b) K (except K_{4}) D_{7} M_{2} भृगुनंदनः. B Dn Ds $D_{6.8.10}$ विममर्श भृगूद्वहः.

30 D_{1} om. 30 (cf. v.l. 29). — c) $K_{1.2}$ एतद् (for एव). D_{10} यथावृत्तं.

31 a) T_{1} G_{3} श्रुत्वा तु (for तच्छ्रुत्वा). $B_{4.5}$ T_{1} च (for तु). — d) $K_{1.2.5}$ $D_{1.2.7}$ विनिश्चित्यार्थनिश्चयं (D_{1} °श्चितं); D_{3} निश्चित्यात्मवि°; T_{1} निश्चित्य गुरुलाघवं; T_{2} G M_{4} निश्चितार्थो ($G_{3.5}$ °र्थं-) विनिश्चये.

32 Before 32, N ins. राम उ° (K_{3} $D_{1.3}$ om. उ°). — b) B Dn Ds_{1} $D_{2.6.8.10}$ भाविनि. D_{8} मत्तमातंगगामिनि. — c) K_{4} B (except B_{2}) Dn Ds $D_{6.8.10}$ T G मह्यं (for धर्म्यं). — d) B Dn $D_{6.10}$ च स; D_{8} स च; T G धर्म्यं (for मे स).

33 b) B_{2} D_{7} M_{5} मयोक्तो. — c) B (except B_{2}) Dn अहं (for एनं).

34 b) K (except K_{3}) B Dn $D_{2.3.6}$ न (for नि-). — c) N यावत् (D_{7} याहि). K_{3} D_{1} S साल्व°.

35 a) K_{4} B D (except $D_{1.7}$) अहं (for अस्मि). — b) D_{7} एतद् (for एव). — c) K_{3} D_{1} S साल्व°; T_{2} $G_{1.2.5}$ °पतिं. K_{4} B D भावं (for चेतो). — d) $K_{2.5}$ Dn_{1} $D_{2.10}$ T G_{1} $M_{3.5}$ पूर्वे- (for पूर्वं).

36 a) A few N MSS. शा(*or* सा)ल्व° (for सौभ°). — b) K_{3} B_{5} Dn Ds $D_{6-8.10}$ अवोचं (for अब्रुवं). K_{1} दुःखदं; D_{10} कृपणं (for दुर्वचं). — c) $K_{1.2.5}$ न मां स वै प्रत्यगृह्णात्. — d) $K_{1.2.5}$ भीष्मस्य परि; K_{3} चारित्रं प्रति; D_{3} चारित्रभय-; T_{1} चारित्रे मम; T_{2} G M_{3-5} चारित्रमभि- (G_{3} °ति-); $M_{1.2}$ चारित्रस्याति-. Some MSS. चारित्र्य-.

एतत्सर्वं विनिश्चित्य स्वबुद्ध्या भृगुनन्दन ।
यदत्रौपयिकं कार्यं तच्चिन्तयितुमर्हसि ॥ ३७
ममात्र व्यसनस्यास्य भीष्मो मूलं महाव्रतः ।
येनाहं वशमानीता समुत्क्षिप्य बलात्तदा ॥ ३८
भीष्मं जहि महाबाहो यत्कृते दुःखमीदृशम् ।
प्राप्ताहं भृगुशार्दूल चराम्यप्रियमुत्तमम् ॥ ३९
स हि लुब्धश्च मानी च जितकाशी च भार्गव ।
तस्मात्प्रतिक्रिया कर्तुं युक्ता तस्मै त्वयानघ ॥ ४०
एष मे ह्रियमाणाया भारतेन तदा विभो ।
अभवद्धृदि संकल्पो घातयेयं महाव्रतम् ॥ ४१
तस्मात्कामं ममाद्येमं राम संवर्तयानघ ।
जहि भीष्मं महाबाहो यथा वृत्रं पुरंदरः ॥ ४२

इति श्रीमहाभारते उद्योगपर्वणि षट्सप्तत्यधिकशततमोऽध्यायः ॥ १७६ ॥

१७७

भीष्म उवाच ।
एवमुक्तस्तदा रामो जहि भीष्ममिति प्रभो ।
उवाच रुदतीं कन्यां चोदयन्तीं पुनः पुनः ॥ १
काश्ये कामं न गृह्णामि शस्त्रं वै वरवर्णिनि ।
ऋते ब्रह्मविदां हेतोः किमन्यत्करवाणि ते ॥ २
वाचा भीष्मश्च शाल्वश्च मम राज्ञि वशानुगौ ।
भविष्यतोऽनवद्याङ्गि तत्करिष्यामि मा शुचः ॥ ३
न तु शस्त्रं ग्रहीष्यामि कथंचिदपि भामिनि ।
ऋते नियोगाद्विप्राणामेष मे समयः कृतः ॥ ४
अम्बोवाच ।
मम दुःखं भगवता व्यपनेयं यतस्ततः ।
तत्तु भीष्मप्रसूतं मे तं जहीश्वर माचिरम् ॥ ५

C. 5. 7029
B. 5. 178. 5
K. 5. 178. 5

---

38 a) K4 B D (except D2) तु (for [अ]त्र). D7 आसीत् (for अस्य). — b) K5 transp. भीष्मो and मूलं. D1 हेतुः (for मूलं). K1.2 B2.5 Ds D3.6.10 M3–5 महाव्रत; T G महातपाः. — c) D8 येनाहं च समानीता. — d) K1.2 समुत्कृष्य ब°.

39 d) B3 transp. अप्रियं and उत्तमं. K (except K4) च(K1 by corr. भ)रस्व प्रियमुत्तमं.

40 a) K1.2 दुष्ट°; T1 दृप्त° (for लुब्ध°). B Dn Ds D6.8.10 नीचश्च (for मानी च). — b) K4 D7 भारतः (for भार्गव). — cd) K3.4 D1.3.7 transp. कर्तुं and युक्ता.

41 Dn2 D1 om. (hapl.) 41^{a}–42^{b}. — a) K3 Dn1 एवं (for एष). K3 B3–5 Dn1 क्रियमाणायाः; Ca as in text. — b) D6 तदाभिभो; T G2 तथा विभो.

42 Dn2 D1 om. 42^{ab} (cf. v.l. 41). — a) K3 B3 D7 अपि (for अद्य). K6 T G1.2.5 एव; B3 D2.3 एवं; D7 एतं; D10 M3.5 एनं (for इमं). — b) B D (except D2.7) संपादय (for संव°).

Colophon om. in K4. D4.5.9 G4 missing. — *Sub-parvan:* K1–3.5 B Dn Ds D1–3.6–8.10 G5 M1–4 अंबोपाख्यान. — *Adhy. name:* T1 भगवद्भार्गवदर्शनं; G5 भार्गवदर्शनं. — *Adhy. no.:* D6 (*sec. m.*) 57 (=157); T1 M4 178; T2 G1.2.5 M3.5 179; G3 176 (as in text); M1.2 177. — *S'loka no.:* K5 Dn2 42; Dn1 40.

177

☞ This adhy. is missing in D4 (cf. v.l. 5. 176. 13); the MS. is mostly ignored here.

1 a) K1.2.5 तया (for तदा). — cd) K3.4 B2 D1.2.7 transp. रुदतीं and कन्यां. Ds उवाच रुदती दीना चोदयंती etc.

2 D2 transp. 2^{ab} and 4^{ab}. — a) B4.5 D (except D1–3) transp. कामं and न.

3 a) K1.2.5 Ds वचो (for वाचा). K3 T1 G1.3 transp. भीष्म° and शाल्व°. K3 S साल्व°.

4 D2 transp. 2^{ab} and 4^{ab}. — a) B3 T G M3–5 च (for तु). T G M3–5 प्रगृह्णामि (for ग्रही°). M1.2 न शस्त्रं प्रतिगृह्णामि. — b) B D (except D1.2.7) भाविनि. — c) S नियोगं. — d) K3 इति मे निश्चयः कृतः.

5 M4 om. 5–6. — b) K D2.7.8 G3 M2 ततस्ततः; D1 यथा तथा (for यतस्ततः). — c) B1.3.5 D (except D1.2.7) तच्च; B2.4 अत्र (for तत्तु). K (except K4) वै (for मे). — d) D8 जहीश्वर नदीसुतं; T2 G तं जहि

C. 5. 7080
B. 5. 178. 6
K. 5. 178. 6

राम उवाच ।

काशिकन्ये पुनर्ब्रूहि भीष्मस्ते चरणावुभौ ।
शिरसा वन्दनार्होऽपि ग्रहीष्यति गिरा मम ॥ ६

अम्बोवाच ।

जहि भीष्मं रणे राम मम चेदिच्छसि प्रियम् ।
प्रतिश्रुतं च यदि तत्सत्यं कर्तुमिहार्हसि ॥ ७

भीष्म उवाच ।

तयोः संवदतोरेवं राजन्रामाम्बयोस्तदा ।
अकृतव्रणो जामदग्न्यमिदं वचनमब्रवीत् ॥ ८
शरणागतां महाबाहो कन्यां न त्यक्तुमर्हसि ।
जहि भीष्मं रणे राम गर्जन्तमसुरं यथा ॥ ९
यदि भीष्मस्त्वयाहूतो रणे राम महामुने ।
निर्जितोऽस्मीति वा ब्रूयात्कुर्याद्वा वचनं तव ॥ १०
कृतमस्या भवेत्कार्यं कन्याया भृगुनन्दन ।
वाक्यं सत्यं च ते वीर भविष्यति कृतं विभो ॥ ११
इयं चापि प्रतिज्ञा ते तदा राम महामुने ।
जित्वा वै क्षत्रियान्सर्वान्ब्राह्मणेषु प्रतिश्रुतम् ॥ १२
ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चैव रणे यदि ।
ब्रह्मद्विड्भविता तं वै हनिष्यामीति भार्गव ॥ १३
शरणं हि प्रपन्नानां भीतानां जीवितार्थिनाम् ।
न शक्ष्यामि परित्यागं कर्तुं जीवन्कथंचन ॥ १४
यश्च क्षत्रं रणे कृत्स्नं विजेष्यति समागतम् ।
दृप्तात्मानमहं तं च हनिष्यामीति भार्गव ॥ १५
स एवं विजयी राम भीष्मः कुरुकुलोद्वहः ।
तेन युध्यस्व संग्रामे समेत्य भृगुनन्दन ॥ १६

राम उवाच ।

स्मराम्यहं पूर्वकृतां प्रतिज्ञामृषिसत्तम ।
तथैव च करिष्यामि यथा साम्नैव लप्स्यते ॥ १७

त्वर मा चिरं.

6 G_8 M_4 om. 6 (for M_4 cf. v.l. 5). — ^{a}) K_4 D_8 भ्रुवं सुभ्रु; D_1 ·चिरात्सुभ्रु (for पुनर्ब्रूहि). — ^{c}) S (G_3 M_4 om.) वंदमानो (for वन्दनार्हो). K_3 शिरसा वंदनाहेतोः. — ^{d}) T G (G_3 om.) गिरं (for गिरा).

7 ^{a}) = 9^{c}. T_2 M_{3-5} वीर; G_1 भीम; $G_{3,5}$ $M_{1,2}$ वीरं (for राम). G_2 महावीर (for रणे राम). — After 7^{a}, $B_{3,5}$ Dn Ds $D_{6,8,10}$ ins.:

576* गर्जन्तमसुरं यथा ।
समाहूतो रणे राम.
[Cf. 9^{cd}.]

— ^{b}) K $D_{1,3,7}$ transp. इच्छसि and प्रियं. Dn_1 चेदिच्छसि प्रियं प्रति. — ^{c}) Dn Ds $D_{6,8}$ यदपि; D_{10} सदसि (for यदि तत्). — ^{d}) $D_{1,2,7}$ S इच्छसि (for अर्हसि). Dn Ds $D_{6,8,10}$ तत्सत्यं कर्तुमर्हसि.

8 S om. the ref. — ^{a}) Dn_1 M (except M_5) एव (for एवं). — ^{c}) Hypermetric! B Dn Ds $D_{6,10}$ ऋषिः परमधर्मात्मा. $C_{a,s}$ cite ऋषिः; Cnp अकृतव्रणः (as in text).

9 ^{a}) Hypermetric! — ^{b}) K_5 transp. कन्यां and न. G_3 रक्षितुम् (for न त्यक्तुम्). — B_{1-3} Dn Ds D_{10} om. 9^{cd} (cf. 576*). — ^{c}) = 7^{a}. D_8 शत्रुं (for भीष्मं).

10 $B_{4,5}$ om. 10^{ab}. — ^{a}) S यथा (for यदि). B_{1-3} Dn Ds $D_{6,8,10}$ रणे राम; D_8 समाहूतः (for त्वया°). — ^{b}) D_8 त्वया मृधे (for महा°). B_{1-3} Dn Ds $D_{6,8}$ समाहूतस्त्वया मृधे; D_{10} न युक्तश्चेत्त्वया मृधे.

12 ^{a}) G_5 सा (for ते). — ^{b}) $K_{1,2,5}$ D_8 D_8 यदा (for तदा). B D_3 महाहवे (for °मुने). — ^{d}) B Dn D_1 T G प्रतिश्रुता.

13 ^{c}) K_1 (m as in text) Dn_2 Ds $D_{3,7,8,10}$ G_3 ब्रह्मविद् (for °द्विड्). — ^{d}) T_2 $G_{1,2,5}$ विने° (for हनि°).

14 G_6 om. (hapl.) 14–15. — ^{a}) B_3 Dn Ds $D_{6,8,10}$ शरणार्थं (B_3 Dn_2 °र्थे) (for शरणं हि). K_3 च;; D_2 च (for हि). — ^{b}) B Dn Ds $D_{6,7}$ शरणार्थिनां; D_{10} शरणैषिणां; T G (G_5 om.) विजयार्थिनां. — ^{c}) B (except B_2) Dn Ds $D_{6,7,10}$ शक्यामि.

15 G_6 om. 15 (cf. v.l. 14). — ^{a}) G_3 यच्च (for यश्च). B_2 तु (for च). B_3 D (except $D_{3,7}$; D_5 missing) transp. क्षत्रं and कृत्स्नं. $B_{1,4}$ क्षत्रं; T_1 दृप्तं (for कृत्स्नं). — ^{c}) $K_{3,4}$ B D दीप्तात्मानम्; G_3 दृष्टात्मानम्. K_5 $D_{1,2}$ वै (for च).

16 D_2 om. 16^{a}–17^{b}. — ^{a}) D_8 (by transp.) एवं स; S स एष. — ^{b}) B_3 कुरुपितामहः.

17 D_8 जामदग्न्युवाच (for राम उ°). — D_2 om. 17^{ab} (cf. v.l. 16). — ^{c}) K_5 (by transp.) तथा चैव; D_{10} तथैवाहं. M_{3-5} चरि° (for करि°). — ^{d}) K_3 T_1 लभ्य°; D_8 लक्ष्य° (for लप्स्य°). T_2 $G_{1,2,5}$ यथा

कार्यमेतन्महद्ब्रह्मन्काशिकन्यामनोगतम् ।
गमिष्यामि स्वयं तत्र कन्यामादाय यत्र सः ॥ १८
यदि भीष्मो रणश्लाघी न करिष्यति मे वचः ।
हनिष्याम्येनमुद्रिक्तमिति मे निश्चिता मतिः ॥ १९
न हि बाणा मयोत्सृष्टाः सज्जन्तीह शरीरिणाम् ।
कायेषु विदितं तुभ्यं पुरा क्षत्रियसंगरे ॥ २०

भीष्म उवाच ।

एवमुक्त्वा ततो रामः सह तैर्ब्रह्मवादिभिः ।
प्रयाणाय मतिं कृत्वा समुत्तस्थौ महामनाः ॥ २१
ततस्ते तामुषित्वा तु रजनीं तत्र तापसाः ।
हुताग्नयो जप्तजप्याः प्रतस्थुर्मज्जिघांसया ॥ २२
अभ्यगच्छत्ततो रामः सह तैर्ब्राह्मणर्षभैः ।
कुरुक्षेत्रं महाराज कन्यया सह भारत ॥ २३
न्यविशन्त ततः सर्वे परिगृह्य सरस्वतीम् ।
तापसास्ते महात्मानो भृगुश्रेष्ठपुरस्कृताः ॥ २४

इति श्रीमहाभारते उद्योगपर्वणि सप्तसप्तत्यधिकशततमोऽध्यायः ॥ १७७ ॥

१७८

भीष्म उवाच ।

ततस्तृतीये दिवसे समे देशे व्यवस्थितः ।
प्रेषयामास मे राजन्प्राप्तोऽस्मीति महाव्रतः ॥ १
तमागतमहं श्रुत्वा विषयान्तं महाबलम् ।
अभ्यगच्छं जवेनाशु प्रीत्या तेजोनिधिं प्रभुम् ॥ २
गां पुरस्कृत्य राजेन्द्र ब्राह्मणैः परिवारितः ।
ऋत्विग्भिर्देवकल्पैश्च तथैव च पुरोहितैः ॥ ३
स मामभिगतं दृष्ट्वा जामदग्न्यः प्रतापवान् ।
प्रतिजग्राह तां पूजां वचनं चेदमब्रवीत् ॥ ४
भीष्म कां बुद्धिमास्थाय काशिराजसुता त्वया ।

C. 5. 7054
B. 5. 178. 28
K. 5. 178. 28

साम्नोपलप्स्य(G_{5} °भ्य)ते.

18 ^{a}) K_{3} महद्विप्र; Ds D_{3} महाब्रह्मन्. — ^{b}) D_{3} कन्याया यन्मनोगतं. — D_{6} om. 18^{c}–19^{b}.

19 D_{6} om. 19^{ab} (cf. v.l. 18). — ^{c}) K_{3} एवम्; S अहम् (for एनम्). D_{3} हनिष्यामि समुद्रिक्तं; D_{7} °ष्याम्येव सुव्यक्तं.

20 ^{c}) Dn_{1} D_{7} G_{3} कार्येषु. — ^{d}) Ds क्षत्रियपुंगवे; G_{3} °संगमे.

21 N (except K_{3} B_{2} $D_{1.2}$) T_{1} om. the ref. — ^{a}) S तदा (for ततो). — ^{b}) D_{7} तैर्ब्राह्मणर्षभैः (cf. 23^{b}). — ^{d}) K_{3} B D महातपाः (for °मनाः).

22 ^{b}) D_{3} अथ (for तत्र). — ^{c}) D_{3} जप्यपराः (for जप्त°). — ^{d}) D_{3} प्रतस्थुर्मे जयाशया.

23 ^{a}) K_{4} $B_{3.5}$ T_{1} G_{1} अभ्यागच्छत्. M_{1} एवमुक्त्वा तदा रामः. — ^{b}) G_{1} समेतैर्; G_{2} संगतैर् (for सह तैर्). K_{4} B D (except $D_{1.3}$) ब्रह्मवादिभिः (cf. 21^{b}). — ^{c}) D_{10} समासाद्य; M_{1} जगामाथ (for महा°). — ^{d}) K_{3} S भार्गवः (for भारत).

24 ^{a}) K $D_{3.8}$ न्यवसंत (for न्यवि°).

Colophon om. in Dn D_{4}. $D_{5.9}$ G_{4} missing. — *Sub-parvan:* K B Ds $D_{1-3.6-8.10}$ G_{5} M अंबोपाख्यान. — *Adhy. name:* T_{1} भार्गवाभियाने सरस्वतीनिवासः; G_{5} रामसरस्वतीतीरनिवासः; M_{3} रामहर्षासोनं (sic); $M_{4.5}$ रामनिवासः. — *Adhy. no.* (figures, words or both): D_{6} (*sec. m.*) 58 (=158); T_{1} M_{4} 179; T_{2} $G_{1.2.5}$ $M_{3.5}$ 180; G_{3} 177 (as in text); $M_{1.2}$ 178.

178

☞ Stanzas 1–29^{ab} are missing in D_{4} (cf. v.l. 5. 176. 13); the MS. is mostly ignored up to the end of the lacuna.

1 ^{b}) B D (except $D_{1.2.7}$) संदिदेश (for समे देशे). — ^{c}) B Dn Ds $D_{6.8}$ कुरु प्रियं स मे राजन्; D_{3} कुरुक्षेत्रमहं रा°; D_{10} भृगुश्रेष्ठः स मां रा°.

2 ^{b}) K $D_{1-3.7.10}$ विषयांते. — ^{c}) K_{1-3} D_{3} G_{5} अभ्यागच्छं. — ^{d}) K_{4} B_{2} $D_{1.2.7}$ M विभुं; D_{3} भृगुं.

3 ^{a}) $K_{1.2}$ गाः (for गां). K_{4} गामर्घ्यं च पुरस्कृत्य.

4 ^{c}) K_{1} D_{3} अभि° (for प्रति°).

5 Before 5, B (except B_{3}) Dn Ds D_{10} ins. राम उ°. — ^{b}) K_{4} B D (except $D_{1.2.7}$) तदा (for त्वया). — ^{c}) B D (except $D_{1.2.7}$) अकामेन ($D_{3.6.8.10}$ °मैव) त्वयानीता. — ^{d}) G_{5} इयं (for एव).

C. 5. 7054 B. 5. 178. 28 K. 5. 178. 23 अकामेयमिहानीता पुनश्चैव विसर्जिता ॥ ५
विभ्रंशिता त्वया हीयं धर्मावाप्तेः परावरात् ।
परामृष्टां त्वया हीमां को हि गन्तुमिहार्हति ॥ ६
प्रत्याख्याता हि शाल्वेन त्वया नीतेति भारत ।
तस्मादिमां मन्नियोगात्प्रतिगृह्णीष्व भारत ॥ ७
स्वधर्मं पुरुषव्याघ्र राजपुत्री लभत्वियम् ।
न युक्तमवमानोऽयं कर्तुं राज्ञा त्वयानघ ॥ ८
ततस्तं नातिमनसं समुद्वीक्ष्याहमब्रुवम् ।
नाहमेनां पुनर्दद्यां भ्रात्रे ब्रह्मन्कथंचन ॥ ९
शाल्वस्याहमिति प्राह पुरा मामिह भार्गव ।
मया चैवाभ्यनुज्ञाता गता सौभपुरं प्रति ॥ १०
न भयान्नाप्यनुक्रोशान्न लोभान्नार्थकाम्यया ।
क्षत्रधर्ममहं जह्यामिति मे व्रतमाहितम् ॥ ११
अथ मामब्रवीद्रामः क्रोधपर्याकुलेक्षणः ।
न करिष्यसि चेदेतद्वाक्यं मे कुरुपुंगव ॥ १२
हनिष्यामि सहामात्यं त्वामद्येति पुनः पुनः ।
संरम्भादब्रवीद्रामः क्रोधपर्याकुलेक्षणः ॥ १३
तमहं गीर्भिरिष्टाभिः पुनः पुनररिंदमम् ।
अयाचं भृगुशार्दूलं न चैव प्रशशाम सः ॥ १४
तमहं प्रणम्य शिरसा भूयो ब्राह्मणसत्तमम् ।
अब्रुवं कारणं किं तद्यत्त्वं योद्धुमिहेच्छसि ॥ १५
इष्वस्त्रं मम बालस्य भवतैव चतुर्विधम् ।
उपदिष्टं महाबाहो शिष्योऽस्मि तव भार्गव ॥ १६
ततो मामब्रवीद्रामः क्रोधसंरक्तलोचनः ।

---

6 ^{a}) T1 भीष्म (for हीयं). — ^{b}) K2.5 धर्मादासेः; K3 धर्मावासे. M3-5 पुरातनात्; Ca. d. s परावरात् (as in text). B Dn Ds D3.6.8.10 धर्मादा(B3 अधर्मे)स्ते यशस्विनी; D7 क्रोधपर्याकुलेक्षणा. — ^{c}) K1.2 परिमृष्टां. — ^{d}) K1.2.5 D7.8 कोन्यो नेतुम्; K3 D2 कोभिमंतुम्; K4 B5 D8.10 कोभिर्गतुम्; D1 कोतिमंतुम्; T1 G3.5 M1 कोभिपत्तुम्; T2 G1.2 को हि वक्तुम्; M2 को न त्यक्तुम्; M3-5 को हि योक्तुम्.

7 ^{a}) K1.3 D1.2 S साल्वेन. — ^{b}) K5 D8 नीता हि (for नीतेति).

8 ^{c}) B1.2.4 Dn युक्तस्त्ववमानोयं; D7 °मवमानं वै. — ^{d}) K1.2 कर्तुं राज्ञस; K3.4 B D राज्ञां (Dn1 Ds राजन्) कर्तुं; K5 T2 G2 कर्तुं राज्ञां.

9 ^{a}) K2.4.5 B D (except D1.2.7) वै विमनसं; Ca. d. s नाति° (as in text). — ^{b}) K3-5 B5 D2.3.6.7 T2 G M3.4 समुदीक्ष्य (for °द्वीक्ष्य). A few S MSS. अब्रवं. B1-4 Dn Ds D10 उदी(Dn2 Ds D10 °द्वी)-क्ष्याहमथाब्रुवं. — ^{c}) K3.4 D1.3 T1 G3 एतां; D2 पुनर् (for एनां). D3 इमां (for पुनर्). K1.2.5 गृह्य; B3 लभ्यां; D7 गृह्यां (for दद्यां). — ^{d}) K1.2.5 D7 भ्रात्रे दद्यां; B Dn Ds D6.8.10 (by transp.) ब्रह्मन्भ्रात्रे.

10 ^{a}) K3 D1 S साल्व°. K1-4 D1 ह्याह; D2 त्वाह (for प्राह). K5 शाल्वे गतमतिर्ह्यासं. — ^{b}) K4 B Dn Ds D6.8.10 एव (for इह). — ^{d}) T1 पुरा (for गता). B Dn Ds D3.6.10 इयं नगरं (for सौभ°).

11 Cf. 5. 49. 15; 89. 24; 186. 26. — ^{a}) D3 हि; G3 M [अ]भि- (for [अ]पि). — ^{b}) K3.4 D1.7 T1 अर्थ-कारणात्; T2 G1-3 अर्थकामया (G1 °मतः; G3 °क्ष्या); Ca. आत्मकाम्यया; Cd as in text. B Dn Ds D3.6.8.10 नार्थलोभान्न काम्य(B3 °म)या. — ^{c}) K4 B (except B2) Dn Ds D6.10 क्षात्रं (for क्षत्र-). D7 ब्रह्मन् (for जह्याम्). — ^{d}) D7 न जह्यां (for इति मे).

12 ^{b}) = 13^{d}, and = 1. 166. 30^{d}; 173. 5^{b}. K4 D2 स्मयन्निव पुरातनः (D1 °रा शनैः); T G कोपपर्या°; Ca as in text. — K3 D1 om. (hapl.) 12^{c}-13^{d}. — ^{cd}) D1 transp. एतत् and वाक्यं. B Dn Ds D6.8 नर° (for कुरु°).

13 K3 D1 om. 13 (cf. v.l. 12); D8 om. 13^{cd}. — ^{c}) K1.2 संरंभतः; Ca. d as in text. — ^{d}) = 12^{b} (cf. v.l.). T2 क्रोधसंरक्तलोचनः; G2 कोपपर्या°.

14 ^{a}) M3-5 ततोहं (for तमहं). — ^{b}) K4 B3-5 D G1 M2.5 अरिंदम. — ^{d}) K4 Ds1 D7 G1-3 चैवं. — After 14, T G M1 ins.:

577* यदा प्रयाच्यमानोऽपि प्रसादं न करोति मे ।

15 ^{a}) = Hypermetric! K3 सोहं; D1 G5 M3-5 अहं (for तमहं). D3 मूर्ध्ना वै (for शिरसा). B Dn Ds D6.8.10 प्रणम्य तमहं मूर्ध्ना. — ^{b}) K D1-3.7 भूमौ (K5 क्षितौ) (for भूयो). T2 G2.5 भूयो ब्राह्मणमुत्तमं. — ^{c}) A few MSS. अब्रवं. K3 D7 किंचिद् (for किं तद्). — ^{d}) K5 D8.10 यस्त्वं; B3 यद्धै; D6 युद्धं; D7 न त्वा (for यत्त्वं). B (except B3) Dn Ds D2.3.10 G3 युद्धम् (for योद्धुम्). B D (except D1.7.8) G3 मया (for इह). D7 उत्सहे (for इच्छसि). K3 योद्धुमिच्छामि येन वै.

16 ^{b}) K1.2.5 T G (except G3) त्वया चैव (for भवतैव).

17 G2 om. 17^{ab}. — ^{b}) K3-4 D1-3.7 क्रोध(D3

जानीषे मां गुरुं भीष्म न चेमां प्रतिगृह्णसे ।
सुतां काश्यस्य कौरव्य मत्प्रियार्थं महीपते ॥ १७
न हि ते विद्यते शान्तिरन्यथा कुरुनन्दन ।
गृहाणेमां महाबाहो रक्षस्व कुलमात्मनः ।
त्वया विभ्रंशिता हीयं भर्तारं नाधिगच्छति ॥ १८
तथा ब्रुवन्तं तमहं रामं परपुरंजयम् ।
नैतदेवं पुनर्भावि ब्रह्मर्षे किं श्रमेण ते ॥ १९
गुरुत्वं त्वयि संप्रेक्ष्य जामदग्न्य पुरातनम् ।
प्रसादये त्वां भगवंस्त्यक्तैषा हि पुरा मया ॥ २०
को जातु परभावां हि नारीं व्यालीमिव स्थिताम् ।
वासयेत गृहे जानन्स्त्रीणां दोषान्महात्ययान् ॥ २१
न भयाद्वासवस्यापि धर्मं जह्यां महाद्युते ।
प्रसीद मा वा यद्वा ते कार्यं तत्कुरु माचिरम् ॥ २२
अयं चापि विशुद्धात्मन्पुराणे श्रूयते विभो ।
मरुत्तेन महाबुद्धे गीतः श्लोको महात्मना ॥ २३
गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ।
उत्पथप्रतिपन्नस्य कार्यं भवति शासनम् ॥ २४
स त्वं गुरुरिति प्रेम्णा मया संमानितो भृशम् ।
गुरुवृत्तं न जानीषे तस्माद्योत्स्याम्यहं त्वया ॥ २५
गुरुं न हन्यां समरे ब्राह्मणं च विशेषतः ।
विशेषतस्तपोवृद्धमेवं क्षान्तं मया तव ॥ २६
उद्यतेषुमथो दृष्ट्वा ब्राह्मणं क्षत्रबन्धुवत् ।
यो हन्यात्समरे क्रुद्धो युध्यन्तमपलायिनम् ।
ब्रह्महत्या न तस्य स्यादिति धर्मेषु निश्चयः ॥ २७
क्षत्रियाणां स्थितो धर्मे क्षत्रियोऽस्मि तपोधन ।
यो यथा वर्तते यस्मिंस्तथा तस्मिन्प्रवर्तयन् ।
नाधर्मं समवाप्नोति नरः श्रेयश्च विन्दति ॥ २८
अर्थे वा यदि वा धर्मे समर्थो देशकालवित् ।

C. 5. 7020
B. 5. 178. 54
K. 5. 178. 54

कोप)पर्याकुलेक्षणः (= 12^{b}, 13^{d}). — ^{d}) D1 चैव; D2 G3 चैनां (for चेमां). K4 प्रतिपद्यसे; D1.2 G1.5 °गृह्यसे; D7 °गृह्णसि. B (except B2) Dn Ds D3.6.8.10 गृह्णासीमां न चैव ह (D3.8 हि). — ^{f}) B1.2.4 Dn1 D2 महामते (for मही°).

18 ^{a}) K1–3 T1 G3.5 मे (for ते).

19 ^{c}) T2 G1.2 मां हि (for भावि). — ^{d}) D7 ब्रह्मन्कि वा (for ब्रह्मर्षे किं). G2 शृणोमि (for श्रमेण).

20 ^{c}) D7 T1 G3.5 M1.2 त्वा (for त्वां). — ^{d}) K3 D1 त्यक्तैव हि; K5 त्यक्तैवैषा (for °षा हि). B Dn Ds D6.8.10 तु (for हि). K1–3 D1 G1 M1.2 transp. पुरा and मया.

21 ^{a}) K3 जानन् (for जातु). K1.2 परभार्यां. — ^{c}) D3 वासयेत्स्व- (for °येत). K3 जातु (for जानन्). — ^{d}) G3 मर्म (for दोषान्). D2 G3 दुरत्ययान्; D3 महातपाः. B1.2.4 Dn Ds D6.8.10 स्त्रीणां दोषो महात्ययः.

22 ^{b}) B1–4 Dn Ds D3.6.8.10 महाव्रत; B5 D7 कथंचन; G3 महामते (for °द्युते). — ^{c}) Dn1 D2.5 G5 मां (for मा). K4 D8 प्रसीद मम भद्रं ते; D7 प्रसीद त्वं मयि ब्रह्मन्.

23 ^{a}) Ds D6.8.10 विशुद्धात्मा. — ^{b}) K3 S (except G1 M1) पुराणः. T G M1 (*inf. lin.* as in text) महान् (for विभो). — ^{d}) K3 गीताः श्लोकाः.

24 = (var.) Ādi, App. I, No. 81, lines 109–110; (var.) C. 12. 2053, 5294^{cd}–5295^{ab}; (var.) Rām. 2. 21. 13 (Bom. ed.); (var.) Pañcatantra 1. 341. — ^{c}) D1.7 T G M1 उत्पथं प्रति°. — ^{d}) N परित्यागो विधीयते (K2 त्यागो भवति शासनं).

25 ^{c}) K4 B D (except D1.2.7) गुरुवृत्तिं. — ^{d}) K4.5 B D (except D7) वै (for [अ]हं).

26 ^{a}) D1 G1 हन्यात्. — ^{d}) K5 transp. एवं and क्षान्तं.

27 ^{a}) S रणे (G2 रथे) (for अथो). — ^{c}) K3.4 B3 D (except D3) क्रुद्धं (for क्रुद्धो). — ^{f}) D7 इति धर्मविनिश्चयः; G5 m इति धर्मविदो विदुः.

28 ^{a}) K4 अयं धर्मः; S स्थितिर्धर्मे. — ^{b}) K (except K4) D7 [ऽ]सि (for ऽस्मि). B4 परंतप (for तपो°). — ^{d}) K4 B Dn Ds D6.10 तस्मिन्नेव (for तथा तस्मिन्). Dn2 प्रवर्तते; D1 S °येत् (M2 °नात्); D2 °नं; Ca.d.s as in text. D7 वर्तितव्यं तथा भवेत्. — ^{e}) G5 स ह्यवाप्नोति (for सम°). — ^{f}) B Dn Ds D2.6.10 न चाश्रेयश्च.

29 ^{b}) K1.2 न नरो (for समर्थो). — D4 resumes with 29^{cd}. — ^{c}) B D (except D1.2.7) Ca अर्थ- (D3.4 Ca °र्थे)संशयमापन्नः; S (except G5) अनर्थे संशयापन्नः; Cd as in text. — ^{d}) B3 D2–4 T G1.2 श्रेयो; Ca.s श्रेयान् (as in text). K4 निःश्रेयसं वचः; B Dn Ds D6.8.10 निःसंशयो (D8 °श्रेयसो) नरः; D2 T1

C. 5. 7080
B. 5. 178. 54
K. 5. 178. 54

अनर्थसंशयापन्नः श्रेयान्निःसंशयेन च ॥ २९
यस्मात्संशयितेऽर्थेऽस्मिन्यथान्यायं प्रवर्तसे ।
तस्माद्योत्स्यामि सहितस्त्वया राम महाहवे ।
पश्य मे बाहुवीर्यं च विक्रमं चातिमानुषम् ॥ ३०
एवं गतेऽपि तु मया यच्छक्यं भृगुनन्दन ।
तत्करिष्ये कुरुक्षेत्रे योत्स्ये विप्र त्वया सह ।
द्वंद्वे राम यथेष्टं ते सज्जो भव महामुने ॥ ३१
तत्र त्वं निहतो राम मया शरशताचितः ।
लप्स्यसे निर्जिताँल्लोकाञ्शस्त्रपूतो महारणे ॥ ३२
स गच्छ विनिवर्तस्व कुरुक्षेत्रं रणप्रिय ।
तत्रैष्यामि महाबाहो युद्धाय त्वां तपोधन ॥ ३३
अपि यत्र त्वया राम कृतं शौचं पुरा पितुः ।
तत्राहमपि हत्वा त्वां शौचं कर्तास्मि भार्गव ॥ ३४
तत्र गच्छस्व राम त्वं त्वरितं युद्धदुर्मद ।
व्यपनेष्यामि ते दर्पं पौराणं ब्राह्मणब्रुव ॥ ३५
यच्चापि कत्थसे राम बहुशः परिषत्सु वै ।
निर्जिताः क्षत्रिया लोके मयैकेनेति तच्छृणु ॥ ३६
न तदा जायते भीष्मो मद्विधः क्षत्रियोऽपि वा ।
यस्ते युद्धमयं दर्पं कामं च व्यपनाशयेत् ॥ ३७
सोऽहं जातो महाबाहो भीष्मः परपुरंजयः ।
व्यपनेष्यामि ते दर्पं युद्धे राम न संशयः ॥ ३८

इति श्रीमहाभारते उद्योगपर्वणि अष्टसप्तत्यधिकशततमोऽध्यायः ॥ १७८ ॥

M (except M4) निःसंशयो न च; D3.4 निश्चयमेति सः; G3 निःश्रेयसे न च; text as in K1-3.5 D1.7 T2 G1.2.5 M4. Ca cites (as in text) निःसंशयेन (= संशयाभावेन); Cd cites निःसंशये; Cs unintelligible, perhaps corrupt.

30 ^{a}) K1.2.5 D1.2.7 M तस्मात् (for यस्मात्). D3.4 स संशये; T1 असंशिते; Ca.s संश° (as in text). B Dn Ds D2-4.6.10 [ऽ]प्यर्थे; D7 [ऽ]र्थे तु; D8 ह्यर्थे (for ऽर्थेऽस्मिन्). — ^{b}) B Dn Ds D2-4.6.8.10 [ऽ]यथान्यायं; D7 यथार्थं च; Ca यथान्याय्यं. Cn.s cite अयथान्यायं (Csp अविविच्य). D2 G1 प्रवर्तते.

31 ^{d}) T G राम; M कामं (for विप्र). — ^{e}) K3 युद्धं; D1.7 G3 द्वंद्वं; D6.8 तच्च (for द्वंद्वे). K4 B (except B3) मे; K5 D3.4 त्वं; Dn1 D6.8 तु (for ते). — ^{f}) B Dn Ds D6.8.10 सज्जीभव. K3 महामते; K4 B D (except D1.2.7) °द्युते.

32 32^{ab} = (var.) 5. 179. 3^{ab}. — ^{a}) M1 (*inf. lin.*) न्यायात् (for राम). — ^{b}) K (except K4) शरशतैश्चितः; B Dn Ds D6.8.10 °शतार्दितः; G1 °शतार्पितः; G3 शतशराचितः; G5 शरचयार्पितः. — ^{c}) B Dn Ds D6.8.10 प्राप्स्यसे (for ल°). — ^{d}) K (except K4) D1.2.7 शस्त्रपूतान्; Dn1 शस्त्रकृत्तो. D1 महाहवे; T1 महाद्युते; T2 G M1 मया रणे.

33 ^{a}) B6 T G संगच्छ (G3 °च्छेद्); M तद्गच्छ (for स गच्छ). — ^{b}) T1 G3 कुरुक्षेत्रे. — After 33^{ab}, S ins.:

578* समाहूय महाबाहो युद्धाय त्वं तपोधन ।

— D3.4 om. 33^c–34^b; T2 G2.3.5 om. 33^{cd}. — ^{c}) D7 अहं राम (for महा°). — M4 om. (hapl.) 33^d–38^a. — ^{d}) M1.2 [अ]हं (for त्वां). D1 परंतप (for तपो°).

34 M4 om. 34; D3.4 om. 34^{ab} (cf. v.l. 33). — ^{a}) K1 यथा वापि; K2 M1 यत्र चापि; K5 (m as in text) यथा चापि; D7 अपि यच्च; T G1.2.5 अत्र चापि; G3 M2 अपि चापि; M3.5 अथ वापि (for अपि यत्र). — ^{b}) K1 B5 Ds त्वया पितुः; D6.8 (by transp.) पितुः पुरा. — ^{c}) G2.5 यत्र (for हत्वा). M1.2 त्वा (for त्वां).

35 M4 om. 35 (cf. v.l. 33). — ^{a}) T G (except G3) गच्छ च (for गच्छस्व). B (except B4) Dn1 तत्र राम समागच्छ; Dn2 Ds D6.8.10 तत्र राम स गच्छ त्वं. — ^{b}) K1.2.5 Dn1 D3.4 त्वरितो. K1.3.4 B3 D1.3.4.10 युद्धदुर्मदः. — ^{c}) = 38^c. K1.2 अप° (for व्यप°). — ^{d}) K3 B1.2.4 Dn2 D10 ब्राह्मणब्रुवः; K4 B3.5 Dn1 D3.4 °ब्रुवं; K5 D1.8 ब्राह्मणं ध्रुवं.

36 M4 om. 36 (cf. v.l. 33). — ^{b}) B Dn Ds D10 परिवत्सरे (for °षत्सु वै). — ^{c}) D3.4 सर्वे (for लोके). — ^{d}) K3 तु; K4 [ए]व (for [इ]ति). — After 36, D7 ins.:

579* अधर्मः सुमहानेष यच्छय्यामरणं गृहे ।
यदाजौ निधनं याति सोऽस्य धर्मः सनातनः ।

37 M4 om. 37 (cf. v.l. 33). — ^{a}) B Dn Ds D1.6.8.10 जातवान् (for जायते). — ^{b}) B D (except D2.7) क्षत्रियो वापि (Ds D6.8.10 °योपि हि) मद्विधः. — After 37^{ab}, B Dn Ds D1.6.8.10 ins.:

१७९

भीष्म उवाच ।

ततो मामब्रवीद्रामः प्रहसन्निव भारत ।
दिष्ट्या भीष्म मया सार्धं योद्धुमिच्छसि संगरे ॥ १
अयं गच्छामि कौरव्य कुरुक्षेत्रं त्वया सह ।
भाषितं तत्करिष्यामि तत्रागच्छेः परंतप ॥ २
तत्र त्वां निहतं माता मया शरशताचितम् ।
जाह्नवी पश्यतां भीष्म गृध्रकङ्कबडाशनम् ॥ ३
कृपणं त्वामभिप्रेक्ष्य सिद्धचारणसेविता ।
मया विनिहतं देवी रोदतामद्य पार्थिव ॥ ४
अतदर्हा महाभागा भगीरथसुता नदी ।
या त्वामजीजनन्मन्दं युद्धकामुकमातुरम् ॥ ५
एहि गच्छ मया भीष्म युद्धमद्यैव वर्तताम् ।
गृहाण सर्वं कौरव्य रथादि भरतर्षभ ॥ ६
इति ब्रुवाणं तमहं रामं परपुरंजयम् ।
प्रणम्य शिरसा राजन्नेवमस्त्वित्यथाब्रुवम् ॥ ७
एवमुक्त्वा ययौ रामः कुरुक्षेत्रं युयुत्सया ।
प्रविश्य नगरं चाहं सत्यवत्यै न्यवेदयम् ॥ ८
ततः कृतस्वस्त्ययनो मात्रा प्रत्यभिनन्दितः ।
द्विजातीन्वाच्य पुण्याहं स्वस्ति चैव महाद्युते ॥ ९
रथमास्थाय रुचिरं राजतं पाण्डुरैर्हयैः ।
सूपस्करं स्वधिष्ठानं वैयाघ्रपरिवारणम् ॥ १०
उपपन्नं महाशस्त्रैः सर्वोपकरणान्वितम् ।

C. 5. 7102
B. 5. 178. 75
K. 5. 178. 75

580* पश्चाज्जातानि तेजांसि तृणेषु ज्वलितं त्वया ।

Colophon om. in Dn $D_{8.4}$. $D_{5.9}$ G_4 missing. — *Sub-parvan:* K B Ds $D_{1.2.6-8.10}$ G_5 $M_{1.3-5}$ अंबोपाख्यान. — *Adhy. name:* G_5 भीष्मयुद्धोपक्रमं; $M_{1.2}$ भीष्मसंवादः; M_{3-5} रामवाक्यं. — *Adhy. no.* (figures, words or both): T_1 M_4 180; T_2 $G_{1.2.5}$ $M_{3.5}$ 181; G_3 178 (as in text); $M_{1.2}$ 179. — *S'loka no.:* K_5 41.

179

2 D_1 om. 2^a–3^b. — ^{a}) $K_{1.2.5}$ B_3 T G अहं; Ca अयं (as in text). — ^{b}) $D_{8.4}$ यथा त्वया (for त्वया सह). — ^{c}) $K_{3.4}$ B D (except D_2; D_1 om.) M_4 ते (for तत्). — ^{d}) K_4 $D_{3.4}$ तदा (for तत्र). K_3 G_1 गच्छेः; K_4 Dn_1 Ds $D_{8.4.6}$ गच्छ (*or* आगच्छ); B Dn_2 $D_{8.10}$ G_3 [आ]गच्छ; M_3(*inf. lin.* as in text)$_{.4.5}$ [आ]गच्छः (for [आ]गच्छेः).

3 D_1 om. 3^{ab} (cf. v.l. 2). — 3^{ab} = (var.)5. 178. 32^{ab}. — ^{a}) D_6 om. (hapl.) from माता up to विनिहतं in 4^c. $D_{3.4}$ तात (for माता). — ^{b}) K (except K_4) शरशतैश्चितं; Dn_1 °शतान्वितं; $D_{3.4}$ °शतार्दितं; D_8 शतशराचितं; G_1 M_5 शरशतार्पितं. — ^{d}) MSS. (variously) °बलाशनं, °वळाशनं; °वलाशनं; °बिडाशनं. K_3 कंकगृध्रबिडा°; $D_{1.2.10}$ गृध्रकंकवटावृतं (D_2 °श्रितं). Ca cites बलाः, Cd बडाः.

4 D_6 om. up to विनिहतं (cf. v.l. 3). — ^{a}) T_2 कृपणा. — ^{c}) D_4 om. from देवी up to सूप in 10^c. S वीर (for देवी). — ^{d}) M_{3-5} जाह्नवी (for पार्थिव).

5 D_4 om. 5 (cf. v.l. 4). — ^{a}) $K_{1.2.5}$ न तदर्हा. K_5 G_5 महाभागा. — ^{b}) B Dn_2 Ds $D_{3.6.10}$ [अ]नघा (for नदी).

6 D_4 om. 6 (cf. v.l. 4). — ^{a}) D_8 (by transp.) भीष्म मया गच्छ. $M_{2.5}$ सार्धं (for भीष्म). — ^{b}) K $D_{1.2.7}$ दुर्मते (for वर्तताम्). B Dn Ds $D_{3.6.8.10}$ युद्धकामुक दुर्मद (cf. 5^d).

7 D_4 om. 7 (cf. v.l. 4). — ^{c}) K_3 B D (except $D_{1.2.7}$; D_4 om.) रामं; T_2 G_2 देवं (for राजन्). — ^{d}) K_3 च (for [अ]थ). M अब्रवम्.

8 D_4 om. 8 (cf. v.l. 4). — ^{a}) $K_{3.4}$ T_1 उक्तो (for उक्त्वा). — 8^{cd} = (var.)5. 187. 12^{cd}. Cf. 5. 170. 22.

9 D_4 om. 9 (cf. v.l. 4). — ^{b}) $K_{1.2.5}$ चाप्यभिनंदितः; B D (except $D_{1.2.7}$; D_4 om.) च प्रतिनंदितः.

10 D_4 om. up to सूप in 10^c (cf. v.l. 4). — ^{b}) T_2 $G_{1.3}$ M_5 राजितं. S (mostly) पांडरैर्. — 10^{cd} = (var.)5. 81. 18^{ab}. — ^{c}) $K_{1.2}$ परिस्कृतं; S (except T_2) स्वव(G_1 स्वप-; G_5 साव)स्करं (for सूप°). — ^{d}) = 5. 81. 18^b; 138. 21^b. $K_{1.2.4}$ T_2 G_1 °वारितं.

11 D_6 om. 11^c–12^d. — ^{c}) $K_{1.2.5}$ $D_{1.7}$ तं; T_1 M_{3-5} सत्- (for तत्-). K_5 T G धीरेण; $D_{3.4}$ सूतेन; D_7 शूरेण (for वीरेण). — ^{d}) K_2 Dn Ds °शस्त्र°. B_3 Dn

C. 5. 7102
B. 5. 178. 75
K. 5. 178. 75

तत्कुलीनेन वीरेण हयशास्त्रविदा नृप ॥ ११
युक्तं सूतेन शिष्टेन बहुशो दृष्टकर्मणा ।
दंशितः पाण्डुरेणाहं कवचेन वपुष्मता ॥ १२
पाण्डुरं कार्मुकं गृह्य प्रायां भरतसत्तम ।
पाण्डुरेणातपत्रेण ध्रियमाणेन मूर्धनि ॥ १३
पाण्डुरैश्चामरैश्चापि वीज्यमानो नराधिप ।
शुक्लवासाः सितोष्णीषः सर्वशुक्लविभूषणः ॥ १४
स्तूयमानो जयाशीर्भिर्निष्क्रम्य गजसाह्वयात् ।
कुरुक्षेत्रं रणक्षेत्रमुपायां भरतर्षभ ॥ १५
ते हयाश्चोदितास्तेन सूतेन परमाहवे ।
अवहन्मां भृशं राजन्मनोमारुतरंहसः ॥ १६
गत्वाहं तत्कुरुक्षेत्रं स च रामः प्रतापवान् ।
युद्धाय सहसा राजन्पराक्रान्तौ परस्परम् ॥ १७
ततः संदर्शनेऽतिष्ठं रामस्यातितपस्विनः ।
प्रगृह्य शङ्खप्रवरं ततः प्राधममुत्तमम् ॥ १८
ततस्तत्र द्विजा राजंस्तापसाश्च वनौकसः ।
अपश्यन्त रणं दिव्यं देवाः सर्षिगणास्तदा ॥ १९
ततो दिव्यानि माल्यानि प्रादुरासन्मुहुर्मुहुः ।
वादित्राणि च दिव्यानि मेघवृन्दानि चैव ह ॥ २०
ततस्ते तापसाः सर्वे भार्गवस्यानुयायिनः ।
प्रेक्षकाः समपद्यन्त परिवार्य रणाजिरम् ॥ २१
ततो मामब्रवीद्देवी सर्वभूतहितैषिणी ।
माता स्वरूपिणी राजन् किमिदं ते चिकीर्षितम् ॥ २२
गत्वाहं जामदग्न्यं तं प्रयाचिष्ये कुरूद्वह ।
भीष्मेण सह मा योत्सीः शिष्येणेति पुनः पुनः ॥ २३
मा मैवं पुत्र निर्बन्धं कुरु विप्रेण पार्थिव ।
जामदग्न्येन समरे योद्धुमित्यवभर्त्सयत् ॥ २४
किं न वै क्षत्रियहरो हरतुल्यपराक्रमः ।
विदितः पुत्र रामस्ते यतस्त्वं योद्धुमिच्छसि ॥ २५
ततोऽहमब्रुवं देवीमभिवाद्य कृताञ्जलिः ।

रणे (for नृप).

12 D6 om. 12 (cf. v.l. 11). — a) K4 D8 युतं; B Dn Ds D1.2.10 यत्तं (for युक्तं). D3.4 सुखीभूतेन शिष्टेन; D7 यत्तं शूरेण सूतेन. — b) Ds G3 हृष्टकर्मणा; D7 दृढ°; D8 शिष्ट°. — D4 om. 12c–13d. — cd) S (mostly) दंसितः and पांडरेण. D10 कवचेन (for पाण्डु°), and पांडुरेण (for कव°).

13 D4 om. 13 (cf. v.l. 12). — a) Here and below S (mostly) पांडर- (for पाण्डुर-). — b) K3 प्रायां तं रथसत्तमं.

14 a) D3.4 transp. पाण्डुरैः and चामरैः. B (except B3) Dn Ds D6.8.10 चापि व्यजनैः; D2 व्यजनैर्वापि (for चामरैश्चापि). T2 G1.2.5 एव (for अपि).

16 K4 om. 16 (along with 15d and 17a). — a) K3 नोदि° (for चोदि°). K1.2 नोदितास्तेन सूतेन; G2 चोदितास्ते हयास्तेन. — b) K1.2 वीरेण (for सूतेन). — c) M मा (for मां). K1.2 मद्रथं (for मां भृशं). — d) K1.2 वाहा (for मनो-).

17 K4 om. 17a (cf. v.l. 16). — a) K3 D1.3.4.7 चाहं (for [अ]हं तत्). K1.2 D2 च; K5 M (except M5) तु (for तत्). — D1 om. (hapl.) 17d–19a. — d) G5 संगतौ युद्धदुर्मदौ.

18 D1 om. 18 (cf. v.l. 17). — a) K5 B3 Ds D3.4.8.10 T G1–3 M (except M2) तिष्ठन्; G5 तस्य (for ऽतिष्ठं). — d) D7 T G ततः प्राध्मममनुत्तमं.

19 D1 om. 19a (cf. v.l. 17). — c) Ds D8.10 प्रापश्यंत (for अप°). — d) B4 Dn Ds D6 सेंद्र° (for सर्षि°). K1.2.4 G3 M3 तथा (for तदा). D8 देवाः सेंद्रपुरोगमाः; D10 सेंद्रा देवगणास्तदा.

20 a) D3.4 ततो दिव्यविमानानि. — b) B Dn Ds D6.8.10 ततस्ततः; D3.4 समंततः (for मुहुर्मुहुः). — d) K3 D1 T1 G3 हि (for ह).

22 b) K3 सदा मम हि°. — c) K (except K4) D3 मातृ- (for माता).

23 a) K4 B Dn Ds D6.8.10 तु; G2 M3–5 वै (for तं). — b) D3.4 प्रसादिष्ये. T1 G3 कुरूत्तम. — d) S मुहुर्मुहुः (for पुनः पुनः).

24 a) K3 D1 G3 कुरु (for पुत्र). — b) D1 पुत्र (for कुरु). G2 पुत्रेण मम पार्थिव. — c) Ds रामेण (for समरे). — d) K1.2.5 अवभर्त्सती; K3 एव भर्त्संती; K4 B Dn एव भर्त्संयत्; D2–4 T2 G1.2 M3–5 अवभर्त्संयत्.

25 a) G1 न (for किं). K1 ते; Ds D8 M1 (*inf. lin.*) तु; T2 G1.2 तु; G5 च (for न). K1 न; K2.3.5 ते; M4 (*inf. lin.*) [ए]व (for वै). K4 B D (except D1.2) क्षत्रियहणो. — b) K4 Dn1 हरितुल्य°; T1 हरतुल्यः पराक्रमे. — c) K1.2.5 D7 वै (for ते). — d) K1.2.5

सर्वं तद्भरतश्रेष्ठ यथावृत्तं स्वयंवरे ॥ २६
यथा च रामो राजेन्द्र मया पूर्वं प्रसादितः ।
काशिराजसुतायाश्च यथा कामः पुरातनः ॥ २७
ततः सा राममभ्येत्य जननी मे महानदी ।
मदर्थं तमृषिं देवी क्षमयामास भार्गवम् ।
भीष्मेण सह मा योत्सीः शिष्येणेति वचोऽब्रवीत् ॥२८
स च तामाह याचन्तीं भीष्ममेव निवर्तय ।
न हि मे कुरुते काममित्यहं तमुपागमम् ॥ २९

संजय उवाच ।

ततो गङ्गा सुतस्नेहाद्भीष्मं पुनरुपागमत् ।
न चास्याः सोऽकरोद्वाक्यं क्रोधपर्याकुलेक्षणः ॥ ३०
अथादृश्यत धर्मात्मा भृगुश्रेष्ठो महातपाः ।
आह्वयामास च पुनर्युद्धाय द्विजसत्तमः ॥ ३१

इति श्रीमहाभारते उद्योगपर्वणि एकोनाशीत्यधिकशततमोऽध्यायः ॥ १७९ ॥

१८०

भीष्म उवाच ।

तमहं स्मयन्निव रणे प्रत्यभाषं व्यवस्थितम् ।
भूमिष्ठं नोत्सहे योद्धुं भवन्तं रथमास्थितः ॥ १
आरोह स्यन्दनं वीर कवचं च महाभुज ।
बधान समरे राम यदि योद्धुं मयेच्छसि ॥ २
ततो मामब्रवीद्रामः स्मयमानो रणाजिरे ।
रथो मे मेदिनी भीष्म वाहा वेदाः सदश्ववत् ॥ ३
सूतो मे मातरिश्वा वै कवचं वेदमातरः ।

C. 5. 7127
B. 5. 179. 4
K. 5. 179. 4

तेन; $D_{3.4}$ कथं; D_7 येन; S कुतस् (for यतस्). B Dn Ds $D_{6.10}$ T $G_{1.2.5}$ तं; $D_{3.4}$ वै (for त्वं). $K_{3.4}$ D_1 यत्त्वं (D_1 यं तं) योद्धुमिहेच्छसि.

26 [a]) K_1 M अब्रवं.

27 [a]) G_1 [आ]ह (for च). — [b]) K_1 G_3 यथा (for मया). B D (except $D_{1.2.7}$) प्रचोदितः; S प्रयाचितः. — [d]) K_4 B D (except $D_{1.2.7}$) य(D_3 D_{10} त)था कर्म पुरातनं.

28 [a]) $K_{3.4}$ $D_{1.2.7}$ आसाद्य (for अभ्येत्य). — [b]) T_1 G_3 सा (for मे). — [c]) K $D_{1.2.7.8}$ सदर्थे; G_3 तमर्थं. K_4 D_2 गत्वा; Dn_2 M_4 वीक्ष्य (for देवी). — [d]) K (except K_2) D_7 क्षामयामास; G_3 कथ°.

29 [a]) T_1 एव (for आह). — D_4 om. 29^c–31^d. — [c]) K_4 B_3 D (except $D_{1.2.7}$; D_4 om.) च (for हि). G_5 $M_{3.4}$ ते (for मे). G_2 पापम् (for कामम्). — [d]) D_3 D_1 उपागमत्; D_7 °गतः. S इत्युक्त्वा मामुपागमत्.

30 D_4 om. 30 (cf. v.l. 29). T_2 $G_{1.2.5}$ om. the ref.; the rest वैशं° उ° (resp. वैशं°). — [b]) T $G_{1.2}$ मां सा (for भीष्मं). $D_{1.2.7}$ अथागमत् (for उपा°). K_4 भीष्मं च पुनरागमत्. — [c]) D_4 नैवास्याः (for न चास्याः). K_4 B D (except $D_{1.2.7}$) चाकरोत् (for सो°). T_1 $G_{1.2.5}$ नास्या अकरवं वाक्यं; T_2 न तस्याकरवं वा°.

31 D_4 om. 31 (cf. v.l. 29). — [a]) K_5 ततो°; M_2 अतो° (for अथा°). — [c]) B Dn Ds $D_{6.8.10}$ तदा (for पुनर्). — [d]) $D_{6.8}$ शिष्येण (for युद्धाय). $K_{3.4}$ $D_{1.2}$ मां (K_4 तं) युद्धाय द्विजोत्तमः.

Colophon. $D_{5.9}$ G_4 missing. — *Sub-parvan:* K B Dn Ds $D_{1-4.6-8.10}$ $G_{1.5}$ M अंबोपाख्यान. — *Adhy. name:* $G_{1.5}$ रामभीष्मसंनाहः; M युद्धसंनाहः. — *Adhy. no.* (figures, words or both): D_6 (*sec. m.*) 70 (=170); T_1 G_1 M_4 181; T_2 $G_{2.5}$ $M_{3.5}$ 182; G_3 179 (as in text); $M_{1.2}$ 180. — *S'loka no.:* K_5 32; Dn 96.

180

1 D_4 om. 1. — 1^{ab} = 22^{cd}. — [a]) Hypermetric! T G_2 M_5 om. तम्. K_4 ततोहं स्मयमानो वै; K_5 स्मयन्निव रणेहं तं. — [b]) B प्रतिभाषं. K (except K_3) व्यवस्थितः. — [c]) $K_{3.5}$ D_7 G_3 M (except M_1) भूमिस्थं; D_1 भूयिष्ठं.

2 [a]) M_1 (*inf. lin.* as in text). 2 आरुह्य (for आरोह). — [b]) T_2 $G_{1.2.5}$ महाबल (for °भुज). — [d]) K_4 $D_{1.2}$ T_2 G_5 $M_{1.2}$ इह; B_3 D_7 त्वम् (for मया).

3 [b]) $D_{3.4}$ स्पर्ध° (for स्मय°). — [c]) G_3 वाहा (for भीष्म). — [d]) G_3 वेदाः सांगाः (for वाहा वेदाः).

4 [a]) B Dn Ds $D_{3.4.6.8.10}$ च; D_7 वै (for मे). $M_{1.2}$ च (for वै). — [b]) S (except G_5) देवमातरः; $Ca.d.s$ वेद° (as in text). — [c]) K_3 D_7 वीर (for

C. 5. 7127
B. 5. 179. 4
K. 5. 179. 4

सुसंवीतो रणे ताभिर्योत्स्येऽहं कुरुनन्दन ॥ ४
एवं ब्रुवाणो गान्धारे रामो मां सत्यविक्रमः ।
शरव्रातेन महता सर्वतः पर्यवारयत् ॥ ५
ततोऽपश्यं जामदग्न्यं रथे दिव्ये व्यवस्थितम् ।
सर्वायुधधरे श्रीमत्यद्भुतोपमदर्शने ॥ ६
मनसा विहिते पुण्ये विस्तीर्णे नगरोपमे ।
दिव्याश्वयुजि संनद्धे काञ्चनेन विभूषिते ॥ ७
ध्वजेन च महाबाहो सोमालंकृतलक्ष्मणा ।
धनुर्धरो बद्धतूणो बद्धगोधाङ्गुलित्रवान् ॥ ८
सारथ्यं कृतवांस्तत्र युयुत्सोरकृतव्रणः ।
सखा वेदविदत्यन्तं दयितो भार्गवस्य ह ॥ ९
आह्वयानः स मां युद्धे मनो हर्षयतीव मे ।
पुनः पुनरभिक्रोशन्नभियाहीति भार्गवः ॥ १०
तमादित्यमिवोद्यन्तमनाधृष्यं महाबलम् ।
क्षत्रियान्तकरं राममेकमेकः समासदम् ॥ ११
ततोऽहं बाणपातेषु त्रिषु वाहान्निगृह्य वै ।
अवतीर्य धनुर्न्यस्य पदातिर्ऋषिसत्तमम् ॥ १२
अभ्यगच्छं तदा राममर्चिष्यन्द्विजसत्तमम् ।
अभिवाद्य चैनं विधिवदब्रुवं वाक्यमुत्तमम् ॥ १३
योत्स्ये त्वया रणे राम विशिष्टेनाधिकेन च ।
गुरुणा धर्मशीलेन जयमाशास्स्व मे विभो ॥ १४

राम उवाच ।

एवमेतत्कुरुश्रेष्ठ कर्तव्यं भूतिमिच्छता ।
धर्मो ह्येष महाबाहो विशिष्टैः सह युध्यताम् ॥ १५
शपेयं त्वां न चेदेवमागच्छेथा विशां पते ।
युध्यस्व त्वं रणे यत्तो धैर्यमालम्ब्य कौरव ॥ १६
न तु ते जयमाशासे त्वां हि जेतुमहं स्थितः ।
शस्त्रधारणमत्युग्रं तच्च कार्यं कृतं त्वया ॥ १२
वत्स पर्याप्तमेतावद्भीष्मेण सह संयुगे ।
विमर्दस्ते महाबाहो व्यपयाहि रणादितः ॥ १३
पर्याप्तमेतद्भद्रं ते तव कार्मुकधारणम् ।
विसर्जयैतद्दुर्धर्ष तपस्तप्यस्व भार्गव ॥ १४
एष भीष्मः शांतनवो देवैः सर्वैर्निवारितः ।
निवर्तस्व रणादस्मादिति चैव प्रचोदितः ॥ १५
रामेण सह मा योत्सीर्गुरुणेति पुनः पुनः ।
न हि रामो रणे जेतुं त्वया न्याय्यः कुरूद्वह ।
मानं कुरुष्व गाङ्गेय ब्राह्मणस्य रणाजिरे ॥ १६

C. 5. 7308
B. 5. 185. 17
K. 5. 185. 17

---

7 K_1 om. 7 (cf. v.l. 1); G_3 om. 7–8. — ^{a}) K_4 ततोस्त्रं; K_5 ततोसौ; $D_{1.7}$ S (G_3 om.) ततोहं. K_5 प्रतिसंगृह्य; S (G_3 *om.*) परिसंहृत्य (M_{3-5} °गृह्य). — K_4 om. 7^{b}–8^{a}. — ^{b}) K_2 $B_{1.2.4.5}$ $D_{3.4}$ विभो; B_3 Dn Ds $D_{6.8.10}$ महत् (for मृधे). — ^{d}) G_5 M_1 (*inf. lin.* as in text). $_5$ युद्धे (for युधि).

8 K_1 G_3 om. 8 (cf. v.l. 1, 7); K_4 om. 8^{a} (cf. v.l. 7). — ^{a}) Dn [ऽ]थ रामो (for रामो)! K_3 भगवान्; B_1 (and many old printed ed.!) हृषितो (for रुषितो). B Dn Ds $D_{6.8.10}$ राजसिंह (for °पुत्र). — ^{b}) $K_{3.4}$ $D_{1.7}$ प्रतिसंहृतं (for विनि°). $K_{2.3.5}$ $D_{1-4.7}$ मे; M_2 च (for वै). — ^{c}) Ds D_6 हतोसि; $D_{3.4.7.8}$ जितोसि (for जितोऽस्मि). Ds $D_{3.4.7}$ भीष्मेसि (for °ण). — ^{d}) K_2 Dn_1 S (G_3 om.) एवं (for इत्येव). D_7 अभ्यवोचत्; T G (G_3 om.) चाप्यमुंचत्; M_1 स (*inf. lin.* च) व्यमुं°; M_2 [ए]वाभ्यमुं°; M_{3-5} प्रत्यमुं° (for व्यमु°).

9 K_1 om. 9^{ab} (cf. v.l. 1). — ^{b}) B_3 Dn Ds $D_{6.10}$ M_2 चास्य (for तस्य). K_4 D_8 वान्यं; B (except B_3) चापि; Dn नान्यं (Bom. ed. मान्यं!); D_2 T $G_{1.2.5}$ M चान्यान् (for चान्यम्). — ^{c}) K_4 $B_{3.5}$ Dn Ds $D_{3.4.6.8.10}$ ते तत्र चै(Dn_1 वै)नं; $B_{1.2.5}$ ततश्चैनं ते; D_1 तत एनं स; G_3 स एवैनं सं-; G_5 तथैवैनं सं- (for त एवैनं सं-).

10 Before 10, all MSS. ins. पितर ऊचुः. — ^{a}) K_4 B D (except $D_{1.2.7}$) तात (for वत्स). — ^{c}) $K_{1.2}$ संयुगे; T_2 संगरं.

11 ^{a}) $K_{1.2.5}$ च; K_3 $D_{1.2.7}$ हि (for तु). — ^{c}) $K_{1.2.5}$ $B_{2.5}$ ब्रह्मचर्यं; K_3 $B_{1.4}$ व्रतचर्यं; B_3 $D_{1.2.7}$ ब्रह्मचर्या. K_4 Dn_2 Ds_1 [अ]थ (for च). — ^{d}) K_5 Ds ब्राह्मणस्य. B_2 D_1 परं तपः (D_1 °प); B_5 परं बलं.

12 ^{a}) $K_{1.2.5}$ (hypermetric!) तदिदं (for इदं). T_2 G_2 निमित्तं; Ca as in text. G_3 तदिदं वीर ते कस्मै. — ^{b}) K_1 अभिमंत्रितं; K_2 उपमंत्रितः; B Dn Ds $D_{3.4.6.8.10}$ प्रागुदाहृतं; D_1 उपयंति तं; $C_{a.s}$ as in text. — ^{c}) Ds अस्त्र° (for शस्त्र°). $K_{1.5}$ $D_{3.4.8}$ M उग्रत्वं; D_2 T G उग्रं च (for अत्युग्रं). — ^{d}) B (except B_3) Dn $D_{3.4.6}$ [अ]कार्यं (for कार्यं).

13 ^{a}) M_{1-3} एवैतद् (for एतावद्). — ^{b}) K_3 त्वया भीष्मेण संयुगे. — ^{c}) K (except K_4) D_8 निवर्तस्व (for विमर्दस्ते).

14 D_2 om. (hapl.) 14^{a}–15^{c}. — ^{a}) $D_{3.4}$ एव (for एतद्). — ^{b}) G_5 तदिदं शस्त्रधारणं. — ^{c}) T_1 इदं; T_2 G_{1-3} एनं (for एतद्). B_3 D_7 $G_{1.2}$ दुर्धर्षं. — ^{d}) M_{3-5} तप्यस्व.

15 D_2 om. 15^{abc} (cf. v.l. 14). — ^{a}) T G (except G_3) एवं (for एष). — ^{b}) $K_{1.2.5}$ निवर्तितः; B_3 निराकृतः (for निवा°). — D_1 om. (hapl.) 15^{cd}. — ^{d}) K_5 प्रणोदितः; $B_{3.5}$ Dn Ds $D_{6.8.10}$ प्रसा° (for प्रचो°).

16 K_5 reads 16–17 after 24^{ab}. — ^{b}) K_5 निवर्तस्व (for गुरुणेति). D_1 विशेषतः (for पुनः पुनः). — ^{c}) T_1 $G_{1.3}$ रामं. — ^{d}) $K_{2.5}$ D_7 T_1 G_1 M_{3-5} न्याय्यं; K_3 नाथ; D_1 T_2 G_2 न्यायं; $D_{3.4}$ G_5 शक्यः; G_3 चाद्य

C. 5. 7306
B. 5. 185. 17
K. 5. 185. 17

वयं तु गुरवस्तुभ्यं ततस्त्वां वारयामहे ।
भीष्मो वसूनामन्यतमो दिष्ट्या जीवसि पुत्रक ॥ १७
गाङ्गेयः शंतनोः पुत्रो वसुरेष महायशाः ।
कथं त्वया रणे जेतुं राम शक्यो निवर्त वै ॥ १८
अर्जुनः पाण्डवश्रेष्ठः पुरंदरसुतो बली ।
नरः प्रजापतिर्वीरः पूर्वदेवः सनातनः ॥ १९
सव्यसाचीति विख्यातस्त्रिषु लोकेषु वीर्यवान् ।
भीष्ममृत्युर्यथाकालं विहितो वै स्वयंभुवा ॥ २०
एवमुक्तः स पितृभिः पितॄन्रामोऽब्रवीदिदम् ।
नाहं युधि निवर्तेयमिति मे व्रतमाहितम् ॥ २१
न निवर्तितपूर्वं च कदाचिद्रणमूर्धनि ।
निवर्त्यतामापगेयः कामं युद्धात्पितामहाः ।
न त्वहं विनिवर्तिष्ये युद्धादस्मात्कथंचन ॥ २२
ततस्ते मुनयो राजन्नृचीकप्रमुखास्तदा ।
नारदेनैव सहिताः समागम्येदमब्रुवन् ॥ २३
निवर्तस्व रणात्तात मानयस्व द्विजोत्तमान् ।
नेत्यवोचमहं तांश्च क्षत्रधर्मव्यपेक्षया ॥ २४
मम व्रतमिदं लोके नाहं युद्धात्कथंचन ।
विमुखो विनिवर्तेयं पृष्ठतोऽभ्याहतः शरैः ॥ २५
नाहं लोभान्न कार्पण्यान्न भयान्नार्थकारणात् ।
त्यजेयं शाश्वतं धर्ममिति मे निश्चिता मतिः ॥ २६
ततस्ते मुनयः सर्वे नारदप्रमुखा नृप ।
भागीरथी च मे माता रणमध्यं प्रपेदिरे ॥ २७
तथैवात्तशरो धन्वी तथैव दृढनिश्चयः ।
स्थितोऽहमाहवे योद्धुं ततस्ते राममब्रुवन् ।
समेत्य सहिता भूयः समरे भृगुनन्दनम् ॥ २८
नावनीतं हि हृदयं विप्राणां शाम्य भार्गव ।
राम राम निवर्तस्व युद्धादस्माद्द्विजोत्तम ।
अवध्यो हि त्वया भीष्मस्त्वं च भीष्मस्य भार्गव ॥ २९
एवं ब्रुवन्तस्ते सर्वे प्रतिरुध्य रणाजिरम् ।

(for न्यायय:). K3 कथंचन (for कुरू°). — e) K3.4 D2.7 S राजेंद्र (for गाङ्गेय).

17 For sequence in K5, cf. v.l. 16. — a) B4 D3.4.7 च (for तु). — b) K3 अतस्; K4 B D (except D1.2.7) तस्मात् (for ततस्). — c) Hypermetric!

18 a) K4 B D (except Dn1 D1.7.8) T2 G1.2 M6 शांतनोः. — b) K (except K5) B2 D1.2.7 महाबलः (for °यशाः). — c) B D (except D1.2.7) शक्यस्त्वया (for त्वया रणे). — d) K1 (before corr.) निवर्तितुं; K4 G3 °र्तय (for °र्त वै). B D (except D1.2.7) निवर्तस्वेह भारत.

19 M om. 19ab. — c) D1 परः (for नरः). D3.4.8 G3 M2 वीर. — d) K1.2.5 पूर्वदेहे; K4 T1 पूर्वं देवः.

20 b) K1.2.5 T G M1.2 सत्यवान्; D1 M3-5 विश्रुतः; D3.4 सत्यवाक् (for वीर्य°).

21 Before 21, N M6 ins. भीष्म उ° (M5 om. उ°).

22 D6 om. 22. — a) K1.2.5 D8 नाहं निवर्तितः पूर्वं; B (except B5) Dn D3 T1 G3 न निवर्तितपूर्वश्च. — c) K (except K4) D2-4.7 निवर्तताम्. — d) K1 G3 M2 पितामहः; K2 °मह. — e) K5 न निवर्तेयं; D10 वै निवर्तिष्ये (for विनि°). — f) B2.4 Ds1 D6 कदा° (for कथं°).

23 K4 om. (hapl.) 23a-25b. — b) K3 D7 M1.2 तथा (for तदा). — d) K1.5 D2-4.7 S (except G1) मामागम्ये° (G3 °त्ये°); D10 समागत्ये°.

24 K4 om. 24 (cf. v.l. 23). — b) B D (except D2.7.8) M1.2 द्विजोत्तमं. — After 24ab, K5 reads 16-17. — D1 om. 24cd. — c) K1.2.5 D2.7 प्रत्य°; B4.5 इत्य°; D10 न ह्य° (for नेत्य°).

25 K4 om. 25ab (cf. v.l. 23). — a) D3.4 तात (for लोके). — b) B (except B4) Dn Ds1 D6.10 T1 G1 कदा° (for कथं°). — d) K5 G2 [ऽ]व्याहतः; T2 व्याहतः (for ऽभ्या°).

26 =(var.)5. 49. 15; 89. 24; 178. 11. — b) K3 (m as in text) °कामया (for °कारणात्). — d) K3.4 D7 इति मे निश्चितं मनः (D7 मतं).

28 a) D3.4 सशरो (for [आ]त्त°). — c) K4 B4.6 D (except D1.2.7.8) स्थिरो (for स्थितो). D1.6 T1 G1 महाहवे (for ऽहमाहवे). — ef) K2 M1.2 सहसा; T1 सर्वतो (for सहिता). K3.4 D1.2.7 समागम्य ततः सर्वे (K4 °म्य च सर्वे च) निवर्त त्वं (D7 °तव्यं) हि पुत्रक.

29 M2 om. (hapl.) 29-30. — a) K5 D2.10 S (M2 om.) नवनीतं; Ca as in text. T G तु (for हि). — e) K3 D7.8 [ऽ]यं; K4 B Dn D3 D1.3.4.6.10 वै (for हि).

30 M2 om. 30 (cf. v.l. 29). — c) K3 S (M2

न्यासयांचक्रिरे शस्त्रं पितरो भृगुनन्दनम् ॥ ३०
ततोऽहं पुनरेवाथ तानष्टौ ब्रह्मवादिनः ।
अद्राक्षं दीप्यमानान्वै ग्रहानष्टाविवोदितान् ॥ ३१
ते मां सप्रणयं वाक्यमब्रुवन्समरे स्थितम् ।
प्रैहि रामं महाबाहो गुरुं लोकहितं कुरु ॥ ३२
दृष्ट्वा निवर्तितं रामं सुहृद्वाक्येन तेन वै ।
लोकानां च हितं कुर्वन्नहमप्याददे वचः ॥ ३३
ततोऽहं राममासाद्य ववन्दे भृशविक्षतः ।
रामश्चाभ्युत्स्मयन्प्रेम्णा मामुवाच महातपाः ॥ ३४
त्वत्समो नास्ति लोकेऽस्मिन्क्षत्रियः पृथिवीचरः ।
गम्यतां भीष्म युद्धेऽस्मिंस्तोषितोऽहं भृशं त्वया ॥ ३५
मम चैव समक्षं तां कन्यामाहूय भार्गवः ।
उवाच दीनया वाचा मध्ये तेषां तपस्विनाम् ॥ ३६

इति श्रीमहाभारते उद्योगपर्वणि षडशीत्यधिकशततमोऽध्यायः ॥ १८६ ॥

१८७

राम उवाच ।
प्रत्यक्षमेतल्लोकानां सर्वेषामेव भामिनि ।
यथा मया परं शक्त्या कृतं वै पौरुषं महत् ॥ १
न चैव युधि शक्नोमि भीष्मं शस्त्रभृतां वरम् ।
विशेषयितुमत्यर्थमुत्तमास्त्राणि दर्शयन् ॥ २
एषा मे परमा शक्तिरेतन्मे परमं बलम् ।
यथेष्टं गम्यतां भद्रे किमन्यद्वा करोमि ते ॥ ३
भीष्ममेव प्रपद्यस्व न तेऽन्या विद्यते गतिः ।

C. 5. 7331
B. 5. 186. 4
K. 5. 186. 4

---

om.) वारयांचक्रिरे; Ca न्यासयां° (as in text).

31 ^{a}) G_1 [ऽ]पि (for ऽहं). — ^{c}) K_3 D_7 अपश्यं; D_2 प्रपश्यं (for अद्राक्षं).

32 ^{c}) Dn_1 एहि; D_{10} गच्छ (for प्रैहि). B_2 भीष्म; T_2 G (except G_3) राजन् (for रामं). — ^{d}) T_1 G_1 लोकहिते. Dn_1 -करं; T_1 G_1 रतं (for कुरु).

33 ^{b}) B_4 वै तदा (for तेन वै). — ^{d}) $B_{1.2.4}$ $D_{3m.4}$ अहमप्याहवे त($D_{3.4}$ स्थि)तः.

34 Stanza lost in B_4. — ^{b}) $K_{1.2}$ D_3 T_2 $G_{2.3}$ भृशवीक्षितः; G_1 भृगुनंदनं. — D_2 om. 34^{c}–35^{d}. — ^{c}) $K_{1.2}$ [आ]शु स्मयन्; K_3 ऽप्युत्स्मयन्; K_5 [अ]पि स्मयन्; S (except T_1) [अ]प्युत्स्मयन् (for [अ]भ्यु°). $D_{3.4}$ रामश्चाप्युत्तमप्रेम्णा.

35 D_2 om. 35 (cf. v.l. 34). — ^{b}) $D_{3.4}$ °तले (for °चरः). — ^{c}) S शाम्य° (for गम्य°). T_2 G_2 [ऽ]स्मि (for ऽस्मिन्).

36 ^{b}) D_5 $D_{6.10}$ आदाय (for आहूय). — ^{c}) K_3 B D (except $D_{1.2.7}$) उक्तवान् (for उवाच). — ^{d}) B_3 Dn Ds $D_{6.8.10}$ महात्मनां; D_4 तरस्विनां; G_3 मन° (for तप°).

Colophon. $D_{5.9}$ G_4 missing. — *Sub-parvan:* $K_{1-3.5}$ B Dn Ds $D_{1-4.6-8.10}$ T_1 G_5 $M_{1.2}$ अंबोपाख्यान. — *Adhy. name:* K_3 D_7 भीष्मराम(D_7 °भार्गव)युद्धं (followed by समाप्तं); K_4 भीष्मभार्गवयोर्युद्धं; B_3 रामभीष्मयुद्धं; M_{3-5} भीष्मविजयः. — *Adhy. no.* (figures, words or both): T_1 M_4 188; T_2 $G_{1.2.5}$ $M_{3.5}$ 189; G_3 186 (*as in text*); $M_{1.2}$ 187. — *S'loka no.:* K_5 38; Dn_1 61; Dn_2 37.

187

1 ^{ab}) K_4 T G (except G_3) एव (for एतल्). G_2 transp. लोकानां and सर्वेषां. K_4 D_7 इति (for एव). K_4 B D (except $D_{1.2.7}$) $G_{1.3}$ भाविनि. — ^{c}) K_4 B Dn Ds $D_{6.8.10}$ यथाशक्त्या मया युद्धं. — ^{d}) D_1 transp. कृतं and पौरुषं. $K_{3.4}$ B D परं (for महत्).

2 ^{a}) K $D_{7.8}$ चैनं युधि; B Dn Ds $D_{6.10}$ चैवमपि; G_3 च वै युधि. T G शक्तोस्मि (for शक्नोमि). $D_{3.4}$ जेतुं चैव न शक्नोमि. — ^{b}) $K_{3.4}$ $D_{1.7}$ भीष्मं शत्रुनिबर्हणं. — ^{d}) B (except B_3) योजयन्; $D_{3.4}$ [अ]दर्शयं (for दर्शयन्). S उत्तमास्त्रं विदर्शयन्.

3 ^{a}) D_6 एषामेव परा; S (except T_2) एषा च मे परा (G_2 °रे) (for एषा मे परमा). — ^{d}) K_3 $D_{3.4.7}$ करवाणि (for वा करोमि).

4 ^{b}) M तु (for ते). — ^{c}) K_5 G_3 transp. हि and अस्मि. — ^{d}) $K_{1.2.5}$ विमुंचता; Ds_2 प्रयुंजता (for

C. 5. 7331
B. 5. 186. 4
K. 5. 186. 4

निर्जितो ह्यसि भीष्मेण महास्त्राणि प्रमुञ्चता ॥ ४

भीष्म उवाच ।

एवमुक्त्वा ततो रामो विनिःश्वस्य महामनाः ।
तूष्णीमासीत्तदा कन्या प्रोवाच भृगुनन्दनम् ॥ ५
भगवन्नेवमेवैतद्यथाह भगवांस्तथा ।
अजेयो युधि भीष्मोऽयमपि देवैरुदारधीः ॥ ६
यथाशक्ति यथोत्साहं मम कार्यं कृतं त्वया ।
अनिधाय रणे वीर्यमस्त्राणि विविधानि च ॥ ७
न चैष शक्यते युद्धे विशेषयितुमन्ततः ।
न चाहमेनं यास्यामि पुनर्भीष्मं कथंचन ॥ ८
गमिष्यामि तु तत्राहं यत्र भीष्मं तपोधन ।
समरे पातयिष्यामि स्वयमेव भृगूद्वह ॥ ९
एवमुक्त्वा ययौ कन्या रोषव्याकुललोचना ।
तपसे धृतसंकल्पा मम चिन्तयती वधम् ॥ १०
ततो महेन्द्रं सह तैर्मुनिभिर्भृगुसत्तमः ।
यथागतं ययौ रामो मामुपामन्त्र्य भारत ॥ ११
ततोऽहं रथमारुह्य स्तूयमानो द्विजातिभिः ।
प्रविश्य नगरं मात्रे सत्यवत्यै न्यवेदयम् ।
यथावृत्तं महाराज सा च मां प्रत्यनन्दत ॥ १२
पुरुषांश्चादिशं प्राज्ञान्कन्यावृत्तान्तकर्मणि ।
दिवसे दिवसे ह्यस्या गतजल्पितचेष्टितम् ।
प्रत्याहरंश्च मे युक्ताः स्थिताः प्रियहिते मम ॥ १३
यदैव हि वनं प्रायात्कन्या सा तपसे धृता ।
तदैव व्यथितो दीनो गतचेता इवाभवम् ॥ १४
न हि मां क्षत्रियः कश्चिद्वीर्येण विजयेद्युधि ।
ऋते ब्रह्मविदस्तात तपसा संशितव्रतात् ॥ १५

प्रमुञ्चता).

5 $K_{3.4}$ B D (except $D_{3.4.7.8}$) S om. the ref. — ^{a}) $K_{1.2.5}$ G_3 $M_{1.2}$ तदा (for ततो). — ^{b}) $K_{1.4}$ Dn Ds D_8 T_1 G_5 M विनिश्वस्य; D_1 निःश्वसंश्च; T_2 G_2 विनिश्चित्य. K_3 D_7 निःश्वस्य विमनास्तदा. — ^{c}) $K_{3.4}$ B D (except D_7) ततः (for तदा).

6 ^{b}) G_3 $M_{1.2}$ यदा (for यथा). Ds D_8 M_{3-5} [आ]त्थ (for [आ]ह). K (except K_3) D_2 यथात्थ न तदन्यथा; $D_{3.4}$ यथा चाह भवांस्तथा. — D_6 om. 6^{c}–7^{b}. — ^{d}) $K_{2.5}$ उदायुधैः (for °रधीः).

7 D_6 om. 7^{ab} (cf. v.l. 6); G_5 om. (hapl.) 7^{b}–9^{a}. — ^{c}) K_1 D_2 अभिधाय; $K_{2.3.5}$ अभिधार्यं; K_4 B Dn Ds $D_{1.3.4.6.8.10}$ अनिवार्यं; D_7 अपिधाय; T G सुनि° (for अनि°).

8 $D_{3.4}$ G_5 om. 8 (for G_5 cf. v.l. 7). — ^{a}) $K_{4.5}$ B (except B_2) Dn Ds D_2 एव (for एष). — ^{c}) B_4 पश्यामि; D_7 T_2 $G_{1.2}$ योत्स्या° (for यास्या°). — ^{d}) K_3 $B_{1.2.4}$ कदाचन; K_4 तपोधन (for कथं°).

9 G_5 om. 9^{a} (cf. v.l. 7). — K_4 om. (hapl.) 9^{ab}. — ^{a}) K_3 G_3 [इ]ति तत्राहं; B_{1-3} च तत्राहं; B_4 तत्र चाहं. — ^{d}) D_3 G_3 कुरूद्वहं (for भृगू°).

10 D_4 om. 10^{a}–11^{b}. — ^{b}) K_2 °व्याकुलचेतना. $M_{1.2}$ °पर्याकुलेक्षणा. — ^{c}) B Dn Ds $D_{3.10}$ तापस्ये; D_1 तापसे; D_2 तपते; G_3 समरे. — ^{d}) B_4 Dn $D_{6.8.10}$ सा मे (for मम). T_1 G_1 चिंतयंती वधं मम.

11 D_4 om. 11^{ab} (cf. v.l. 10). — ^{a}) B Dn_2 Ds_2 $D_{1.10}$ G_3 सहितैः; D_6 सहिते (for सह तैः). — ^{b}) K_4 ऋषिभिर्. K_{1-3} B_2 $D_{1-3.8}$ T_1 $M_{1.2}$ भृगुनंदनः (for °सत्तमः). — ^{c}) B Dn Ds $D_{6.10}$ तथा सोगान् (for ययौ रामो). — ^{d}) K_3 $D_{1.2}$ °पृच्छय (for °मन्त्र्य).

12 ^{a}) K_4 B D (except $D_{1.7}$) ततो रथं समारुह्य. — ^{cd}) = (var.) 5. 179. 10^{cd}. — ^{e}) B_5 °पृष्टं (for °वृत्तं). — ^{f}) K_3 M मा. T_2 नारदेन निवेदितं.

13 T_2 om. 13^{a}–16^{b}. — ^{a}) $K_{1.2}$ तज्ज्ञान्; $D_{3.4}$ सर्वान्; Ca. प्राज्ञान् (as in text). — ^{c}) K (except K_4) $D_{2.7.8}$ तस्या (for ह्यस्या). — ^{d}) $K_{1.2}$ B (except B_3) Dn_1 D_1 गतिजल्पित°; $K_{4.5}$ Dn_2 Ds गतं जल्पित°; $D_{3.4}$ गत्वा जानीत चेष्टितं; D_{10} कन्याया जल्पचेष्टितं. — G_3 om. 13^{e}–15^{d}. — ^{e}) $K_{1.2}$ प्रत्याहारं तु; K_3 D_2 °हरंस्तु; $B_{2.4}$ $D_{3.4}$ °हरंति; S (T_2 G_3 om.) °हरंत. Ds ते (for मे). — ^{f}) $K_{3.4}$ B_5 रताः; B_{1-4} Dn Ds $D_{6.8.10}$ सदा (for मम).

14 T_2 G_3 om. 14 (cf. v.l. 13). — ^{a}) S (T_2 G_3 om.) याता (for प्रायात्). — ^{b}) $K_{1.4}$ B (except B_5) Dn Ds $D_{6.10}$ T_1 transp. कन्या and सा. $K_{1.2}$ वृता; $B_{4.5}$ स्थिता (for धृता). $M_{1.2}$ तपसे धृतमानसा. — ^{d}) T G (T_2 G_3 om.) हत° (for गत°).

15 T_2 G_3 om. 15 (cf. v.l. 13). — ^{b}) K_3 B Dn_2 Ds_1 $D_{6.10}$ G_1 व्यजयद्; D_7 वै जयेद् (for विज°). K_4 भुवि (for युधि). — ^{d}) $K_{1.2.5}$ $D_{6.8.10}$ शंसितव्रतात् (K_5 D_{10} °न्); $B_{3.4}$ Ds_2 D_8 संशितव्रतान्. K_3 D_7 S (T_2 G_3 om.) तापसान्संशितव्रतान्.

अपि चैतन्मया राजन्नारदेऽपि निवेदितम् ।
व्यासे चैव भयात्कार्यं तौ चोभौ मामवोचताम् ॥ १६
न विषादस्त्वया कार्यो भीष्म काशिसुतां प्रति ।
दैवं पुरुषकारेण को निवर्तितुमुत्सहेत् ॥ १७
सा तु कन्या महाराज प्रविश्याश्रममण्डलम् ।
यमुनातीरमाश्रित्य तपस्तेपेऽतिमानुषम् ॥ १८
निराहारा कृशा रूक्षा जटिला मलपङ्किनी ।
षण्मासान्वायुभक्षा च स्थाणुभूता तपोधना ॥ १९
यमुनातीरमासाद्य संवत्सरमथापरम् ।
उदवासं निराहारा पारयामास भामिनी ॥ २०
शीर्णपर्णेन चैकेन पारयामास चापरम् ।
संवत्सरं तीव्रकोपा पादाङ्गुष्ठाग्रधिष्ठिता ॥ २१
एवं द्वादश वर्षाणि तापयामास रोदसी ।
निवर्त्यमानापि तु सा ज्ञातिभिर्नैव शक्यते ॥ २२
ततोऽगमद्वत्सभूमिं सिद्धचारणसेविताम् ।
आश्रमं पुण्यशीलानां तापसानां महात्मनाम् ॥ २३
तत्र पुण्येषु देशेषु साप्लुताङ्गी दिवानिशम् ।
व्यचरत्काशिकन्या सा यथाकामविचारिणी ॥ २४
नन्दाश्रमे महाराज ततोलूकाश्रमे शुभे ।
च्यवनस्याश्रमे चैव ब्रह्मणः स्थान एव च ॥ २५

C. 5. 7353
B. 5. 186. 26
K. 5. 186. 29

16 T_2 om. 16^{ab} (cf. v.l. 13). — ^{a}) $G_{2.5}$ अथ (for अपि). K_4 D_1 T_1 G M_2 महाराज (for मया राजन्). — ^{b}) D_1 G_2 $M_{1.3}$ नारदेन (for नारदेऽपि). K_3 D_2 T_1 $G_{1.3.5}$ M ($M_{1.3}$ *sup. lin.*) त्रि; $D_{3.4}$ च (for ऽपि). — ^{c}) K_4 D_{1-4} च यत्; B Dn Ds $D_{6.7.10}$ तथा; T_1 G_1 भवेत् (for भयात्). $K_{1.2}$ D_8 व्यासस्य चैवोभयतः. — ^{d}) $K_{1.2}$ कार्यतो; D_1 T_1 G_1 तावुभौ (for तौ चोभौ). D_8 सम° (for माम°).

17 17^{cd} = 1. 1. 186^{cd}. — ^{d}) K_1 (by corr.). $_2$ G_3 [अ]ति° (for नि°).

18 ^{a}) K_4 B (except B_2) D (except $D_{1.7}$) transp. तु and कन्या. — ^{c}) = Cf. 20^a. S आसाद्य (for आश्रित्य). — $D_{6.8}$ om. (? hapl.) 18^d–20^a. — ^{d}) M_4 °दारुणं (for °मानुषं).

19 $D_{6.8}$ om. 19 (cf. v.l. 18). — ^{a}) T_1 $G_{1.3.5}$ जलाहारा ($G_{1.3}$ °र-); T_2 G_2 विजहार (for निराहारा). K_3 B_3 $D_{2-4.7.10}$ T_2 $G_{1.2}$ रूक्षा; K_5 $B_{1.2.4.5}$ दीना (for रूक्षा) D_1 निराहारा क्षमारूपा. — ^{c}) $K_{3.5}$ $D_{1-4.7}$ [आ]सीत्; Dn_1 S (except G_3) सा (for च). — ^{d}) K_4 $D_{3.4}$ $M_{1.2}$ तपस्विनी; B_3 Ds तपोवने (for °धना).

20 $D_{6.8}$ om. 20^a (cf. v.l. 18); G_2 om. 20^{ab}. — ^{a}) Cf. 18^a. $K_{2.4}$ B Dn Ds $D_{1.3.4.10}$ यमुनाजलम्. $K_{3.4}$ B D ($D_{6.8}$ om.) G_1 आश्रित्य. — ^{c}) K (except K_3) Dn_2 T $G_{2.3.5}$ उपवासं; $D_{3.4}$ उपवासात्; G_1 उदावसन्; Ca उदवासं (as in text). $K_{1.2.5}$ D_7 नित्यमेव (for निराहारा). — ^{d}) $K_{1.4}$ $D_{3.4}$ धारयामास; K_3 D_7 पाल°; T $G_{1.3.5}$ M_{1-4} कार°; G_3 काम°; M_3 (*inf. lin.*). $_5$ हार°; Ca पार° (as in text). K_4 D_2 भारत; B Dn Ds $D_{3.6.8.10}$ Ca भाविनी (Cap भामिनी as in text); D_4 रोदसी (cf. 22^b). G_2 संवत्सरमथापरं.

☞ In Dn_2, the portion of the text from stanza 21 up to 5. 195. 3 is lost on a missing fol. The MS. is mostly ignored up to the end of the lacuna.

21 D_4 om. (hapl.) 21^a–22^b. — ^{a}) $K_{1.2}$ शीर्णेन पर्णेनैकेन. — ^{b}) K_3 D_7 वर्तयामास; K_4 D_8 पाल°; S धार° (G_3 वार°) (for पार°). K_4 भामिनी; B Dn_1 Ds $D_{3.6}$ सापरं (for चापरं). — ^{c}) K_4 दीर्घकोपा; D_{10} तीव्रकोपात्. — ^{d}) Dn_1 Ds D_8 (before corr.) G_5 M_{3-5} पादांगुष्ठाग्रवि(Dn_1 °नि)ष्ठिता; D_8 °ष्ठाग्रसंस्थिता; D_{10} अंगुष्ठाग्राग्रधिष्ठिता; T_1 $G_{1.3}$ $M_{1.2}$ पादांगुष्ठेन विष्ठिता; G_2 °ष्ठविनिष्ठिता.

22 D_4 om. 22^{ab} (cf. v.l. 21). — ^{c}) K_3 न च; K_4 B D (Dn_2 missing) [अ]पि च; K_5 (m as in text) T $G_{1.2.5}$ पित्रा (for [अ]पि तु). — ^{d}) $D_{3.4}$ यतिभिर् (for ज्ञातिभिर्). K_3 $G_{3.5}$ M न स; T_2 न स; G_2 न च (for नैव).

23 ^{a}) Ds $D_{3.4.6}$ ततो हि समभूत्तस्मिन्. — ^{b}) $B_{3.4}$ Ds $D_{3.4.6}$ °सेवितं.

24 ^{a}) K_4 B Dn_1 Ds $D_{6.8.10}$ तीर्थे° (for देशे°). — ^{b}) K (except K_4) $D_{1.7.8}$ $M_{1.2}$ सं(D_1 स्वा)प्लुतांगी; Ds $D_{6.10}$ सा प्लुतांगा; T_2 सरित्सु च. Ca cites आप्लुतांगी. — ^{c}) D_2 अचरत्; T_2 G_5 विचरत् (for व्यच°). — ^{d}) K_3 $D_{1.2.10}$ °विहारिणी; K_5 T_1 यथाकामं विचारिणी.

25 G_2 om. 25^{ab}; D_4 om. 25^b–26^c. — ^{b}) $K_{1.2.5}$ तथार्चीकाश्रमे; $K_{3.4}$ B Dn_1 $D_{1-4.6.8.10}$ G_1 M_4 तथोलूका°; D_7 तथा कण्वा°. $M_{3.5}$ विभो (for शुभे). — ^{c}) $K_{1.2.5}$ D_7 वशि($K_{2.5}$ °सि)ष्ठस्याश्रमे; B_3 व्यचरत्साश्रमे.

26 D_4 om. 26^{abc} (cf. v.l. 25). — ^{b}) K_5 $D_{1.3.8}$ चैव हि; T G (except G_3) वै विभो. — ^{c}) K_4 B D (except $D_{2.7}$; Dn_2 missing; D_4 om.) महाराज;

C. 5. 7354
B. 5. 186. 27
K. 5. 186. 27

प्रयागे देवयजने देवारण्येषु चैव ह ।
भोगवत्यां तथा राजन्कौशिकस्याश्रमे तथा ॥ २६
माण्डव्यस्याश्रमे राजन्दिलीपस्याश्रमे तथा ।
रामह्रदे च कौरव्य पैलगार्ग्यस्य चाश्रमे ॥ २७
एतेषु तीर्थेषु तदा काशिकन्या विशां पते ।
आप्लावयत गात्राणि तीव्रमास्थाय वै तपः ॥ २८
तामब्रवीत्कौरवेय मम माता जलोत्थिता ।
किमर्थं क्लिश्यसे भद्रे तथ्यमेतद्ब्रवीहि मे ॥ २९
सैनामथाब्रवीद्राजन्कृताञ्जलिरनिन्दिता ।
भीष्मो रामेण समरे न जितश्चारुलोचने ॥ ३०
कोऽन्यस्तमुत्सहेज्जेतुमुद्यतेषुं महीपतिम् ।
साहं भीष्मविनाशाय तपस्तप्स्ये सुदारुणम् ॥ ३१
चरामि पृथिवीं देवि यथा हन्यामहं नृपम् ।
एतद्व्रतफलं देहे परस्मिन्स्याद्यथा हि मे ॥ ३२
ततोऽब्रवीत्सागरगा जिह्मं चरसि भामिनि ।
नैष कामोऽनवद्याङ्गि शक्यः प्राप्तुं त्वयाबले ॥ ३३
यदि भीष्मविनाशाय काश्ये चरसि वै व्रतम् ।
व्रतस्था च शरीरं त्वं यदि नाम विमोक्ष्यसि ।
नदी भविष्यसि शुभे कुटिला वार्षिकोदका ॥ ३४
दुस्तीर्था चानभिज्ञेया वार्षिकी नाष्टमासिकी ।
भीमग्राहवती घोरा सर्वभूतभयंकरी ॥ ३५
एवमुक्त्वा ततो राजन्काशिकन्यां न्यवर्तत ।

T G (except G2) ततो राजन् (for तथा राजन्). — d) T1 G3 काशि(G3 °शी)कन्या (for कौशिकस्य). K1.2 [आ]श्रमेषु च; K5 M1.2 [आ]श्रमे शुभे; T1 G5 [आ]श्रमे तदा.

27 K3 D1.3.4 om. (hapl.) 27ab. — a) K5 D2 चैव (for राजन्). — b) T G (except G3) [ऽ]पि च (for तथा). K1.2 D7 M3-5 दिलीपस्यापि चाश्रमे. — c) D3.4 महाह्रदे; G1 रामाश्रमे; M2 धाराह्रदे; M3-5 तथा ह्रदे (for राम°). — d) K3 B1.4.5 पैलग(K3 °गा)र्गस्य; B2.3 Dn1 Ds2 D6.10 पै(B2.3 पै)लमार्गस्य; Ds1 D1.3 पै(D1 तै)लगार्ग्यस्य; T1 G5 ततो गार्ग्यस्य; T2 G2 ततो भार्गस्य; G1 M1.2.5 तथा (G1 °तो) गर्गस्य; G3 ततो मार्गस्य; M3.4 तथा गार्ग्य(M4 °र्ग)स्य.

28 a) K1.2 G3.5 M1.2 तथा (for तदा). D3.4 एतेष्वन्येषु तीर्थेषु. — d) K5 B Dn1 Ds D1.6.8.10 G5 व्रतम् (for तीव्रम्). K3.4 D1-4 वै व्रतं; B Dn1 Ds D6.8.10 दुष्करं (for वै तपः).

29 a) K3 D1.2 कौरवेंद्र; K4 B1.3.4 Dn1 Ds D6.10 च कौरव्य; T G (except G3) तु कौरव्य (for कौरवेय). — b) K3.4 B D (except D1.7; Dn2 missing) जले स्थिता (D3.4 °तां). — c) K3 D1 तप्यसे; Ds2 D3.10 G1.3 M2 क्लिश्यते. — d) D7 G1 सत्यम् (for तथ्यम्). B Dn1 एव (for एतद्). B Dn1 Ds D3.4.8.10 वदस्व; G1 ब्रवीतु (for ब्रवीहि). D1 तथा मे तद्ब्रवीमि ते; D6 तथा मे तद्वदस्व मे.

30 a) K3 D3 T2 G2 सा तामथ; D3.4 सा तां नत्वा; T1 G1 सा चैनाम् (for सैनामथ). — b) Dn1 Ds D10 T1 G1.3 M5 कृत्वांजलिम् (for कृताञ्जलिर्). K5 अवस्थिता; B3 Dn1 अनिंदिता. — c) K3 रामो भीष्मेण समरे; K4 B Dn1 Ds D6.8.10 भीष्मेण समरे रामः; D1 रामेण भीष्मः समरे; D2.7 G5 भीष्मेण रामः समरे. — d) K3 B D (except D1; Dn2 missing) T2 G निर्जितश् (for न जितश्).

31 b) K4.5 B Dn1 Ds D6-8.10 महीपतिः. — M2 om. (hapl.) 31d-34a. — d) Dn1 D3 तप्ये (for तप्स्ये). K3.4 D1.2 तप्यंती (D1 °पामि) तप उत्तमं; T1 तपस्तप्स्यामि दारुणं.

32 M2 om. 32 (cf. v.l. 31). — a) K1.2.5 D7 चरंती (for चरामि). K3 D2.7 G1.2 M3.5 देवीं; M1 सर्वां; M4 पुण्यां (for देवि). B Dn1 Ds D3.4.6.8.10 विचरामि महीं देवि. — B3 om. (hapl.) 32bc. — b) M1 महीपतिं (for अहं नृपम्). — c) D6.8 व्रतमिदं. K4 B1.2.5 D (except D1.2.7; Dn2 missing) देवि (for देहे). — d) B Dn1 Ds D6.8.10 परम(B3 °मे). स्मिन्; D2-4 परमं स्याद् (for परस्मिन्स्याद्).

33 M2 om. 33 (cf. v.l. 31). — b) K4 B D (except D1.3; Dn2 missing) भाविनि (for °मि°). — c) G2 M3-5 नैव (for नैष). — d) D3 त्वया रणे (for त्वयाबले).

34 M2 om. 34a (cf. v.l. 31). — c) T2 G2 M3 स्वं (for त्वं). — d) K (except K3) D2-4.7.8 विमोक्ष्यसे. D1 यदि भामिनि मोक्ष्यसे.

35 a) D1.3.4.8 दुस्तीर्णा; Ca दुस्तरा (for °स्तीर्था). K1.3 D2 वा (for च). K5 D3 चा(D3 वा)नविज्ञेया; B Dn1 Ds D6.10 न तु (Ds2 ननु) विज्ञेया; D3.4 च भुवि ज्ञेया; D7 चानभिख्येया; T G2.3.5 चानभिज्ञाता; G1 M

माता मम महाभागा स्मयमानेव भामिनी ॥ ३६
कदाचिदष्टमे मासि कदाचिद्दशमे तथा ।
न प्राश्नीतोदकमपि पुनः सा वरवर्णिनी ॥ ३७
सा वत्सभूमिं कौरव्य तीर्थलोभात्ततस्ततः ।
पतिता परिधावन्ती पुनः काशिपतेः सुता ॥ ३८
सा नदी वत्सभूम्यां तु प्रथिताम्बेति भारत ।
वार्षिकी ग्राहबहुला दुस्तीर्था कुटिला तथा ॥ ३९
सा कन्या तपसा तेन भागार्धेन व्यजायत ।
नदी च राजन्वत्सेषु कन्या चैवाभवत्तदा ॥ ४०

इति श्रीमहाभारते उद्योगपर्वणि सप्ताशीत्यधिकशततमोऽध्यायः ॥ १८७ ॥

१८८

भीष्म उवाच ।
ततस्ते तापसाः सर्वे तपसे धृतनिश्चयाम् ।
दृष्ट्वा न्यवर्तयंस्तात किं कार्यमिति चाब्रुवन् ॥ १
तानुवाच ततः कन्या तपोवृद्धानृषींस्तदा ।
निराकृतास्मि भीष्मेण भ्रंशिता पतिधर्मतः ॥ २
वधार्थं तस्य दीक्षा मे न लोकार्थं तपोधनाः ।
निहत्य भीष्मं गच्छेयं शान्तिमित्येव निश्चयः ॥ ३
यत्कृते दुःखवसतिमिमां प्राप्तास्मि शाश्वतीम् ।

C. 5. 7373
B. 5. 187. 4
K. 5. 187. 4

[अ]थानभिज्ञाता (for चान°). Ca cites अनभिज्ञेया (as in text). — ^{b}) D3.4.8 पंकाढ्या; G3 वार्धकी; Ca वार्षिकी (as in text). K1.3.5 D1.3.4.6–8 G1.5 चा°; K2.4 वा° (for ना°). T2 G2 वार्षिके नष्टमासिकी. — ^{c}) K4 D3.4 भीमा ग्राह°.

36 ^{a}) T1 G1–3 सैवम्; T2 G5 नैवम् (for एवम्). S (except G1) उक्ता (for उक्त्वा). B2.5 तु तां (for ततो). — ^{b}) Dn1 Ds2 D3 S काशि(G3 °शी)कन्या. B3 न्यवर्तयत्. — ^{c}) S (except G1) मात्रा (for माता). — ^{d}) K1.2 D7 जाह्नवी; K4 B Ds D2–4.8 G1 भाविनी (for भामिनी).

37 ^{a}) D3.4 चाष्टमे. K5 D2.7 S (except G3) Cs मासे; D3.4 काले (for मासि). — ^{b}) D3.4 [ऽ]हनि (for तथा). — ^{c}) G2 अप्राश्नीत. D3.4 चापि (for अपि). — ^{d}) K1.2 D7 तत: (for पुनः).

39 ^{b}) K3 पतिता (for प्रथिता). K3.5 D2.3.10 T G1.2 च (for [अ]म्बा). T2 G2 एव (for इति). — ^{d}) K5 D1.7 दुस्तीर्या; D10 दुस्तीर्णा. D2 T1 G1 कुटिलोदका.

40 ^{a}) K1.2.5 तपसस् (for तपसा). — ^{b}) K4 B D (except D2–4.7; Dn2 missing) देहार्धेन. K3 (before corr.) व्यगायत; T1 G1 ह्यजायत. — ^{c}) Ds D10 वत्सेति (for वत्सेषु). — ^{d}) T2 G2.5 कन्यका चा°; G3 सा कन्या चा° (for कन्या चैवा°).

Colophon om. in D3.4. Dn2 D5.9 G4 missing. — *Sub-parvan:* K B Dn1 Ds D1.2.6–8.10 G5 अंबोपाख्यान. — *Adhy. name:* G5 M अंबातपश्चरणं. — *Adhy. no.* (figures, words or both): D6 77 (=177); T1 M4 189; T2 G1.2.5 M3.6 190; G3 187 (as in text); M1.2 188. — *S'loka no.:* K6 41; Dn1 39.

188

☞ *This adhy. is missing in Dn2 (cf. v.l. 5. 187. 20); the MS. is mostly ignored here.*

1 K4 om. 1. — ^{b}) K3.5 Ds D3.4 M2.5 धृ(K3 D3.4 कृ)तनिश्चयाः; D3 धृतमानसाः; G2 °निश्चयात्; Cs °निश्चयां (as in text). — ^{c}) K3 Ds D3 निवर्तयन्; D7 [अ]भ्यवर्तयन् (for न्यव°). K (K4 om.) D3 तां तु; D7 तांस्तु (for तात). — ^{d}) S चासकृत् (for चाब्रुवन्).

2 ^{ab}) Ds transp. ततः कन्या and तपोवृद्धान्. K4 ततः कन्या तथा वृद्धान् (for ^{a}). K5 ततो वृद्धान् (for तपो°). K3 मुनीं° (for ऋषीं°). K4 D1.3 T M4 तथा (for तदा). — ^{c}) K1.2.5 D7 नि(K5 वि)कृतास्मि च (for निरा°). — ^{d}) K1.2 भ्रंसिता; K3 ध्वंसिता (for भ्रंशिता). K5 कामतत्वतः (for पति°).

3 After 3^{ab}, B2.4.5 read 6^{cd}, *repeating* it in its proper place. — ^{d}) K D1.3.4.8 G3 M3–5 एप (for एव).

4 D6 om. 4. — ^{a}) K (except K4) Ds2 D7 G3 दुःखवसतीम्. — ^{c}) D3.4 °लोक- (for °लोकाद्). — ^{d}) M1.2 पुनः पुमान् (for पुमानिह). D3.4.7.8.10 अहं (for इह).

C. 5. 7378
B. 5. 187. 4
K. 5. 187. 4

पतिलोकाद्विहीना च नैव स्त्री न पुमानिह ॥ ४
नाहत्वा युधि गाङ्गेयं निवर्तेयं तपोधनाः ।
एष मे हृदि संकल्पो यदर्थमिदमुद्यतम् ॥ ५
स्त्रीभावे परिनिर्विण्णा पुंस्त्वार्थे कृतनिश्चया ।
भीष्मे प्रतिचिकीर्षामि नास्मि वार्येति वै पुनः ॥ ६
तां देवो दर्शयामास शूलपाणिरुमापतिः ।
मध्ये तेषां महर्षीणां स्वेन रूपेण भामिनीम् ॥ ७
छन्द्यमाना वरेणाथ सा वव्रे मत्पराजयम् ।
वधिष्यसीति तां देवः प्रत्युवाच मनस्विनीम् ॥ ८
ततः सा पुनरेवाथ कन्या रुद्रमुवाच ह ।
उपपद्येत्कथं देव स्त्रियो मम जयो युधि ।
स्त्रीभावेन च मे गाढं मनः शान्तमुमापते ॥ ९
प्रतिश्रुतश्च भूतेश त्वया भीष्मपराजयः ।
यथा स सत्यो भवति तथा कुरु वृषध्वज ।
यथा हन्यां समागम्य भीष्मं शांतनवं युधि ॥ १०
तामुवाच महादेवः कन्यां किल वृषध्वजः ।
न मे वागनृतं भद्रे प्राह सत्यं भविष्यति ॥ ११
वधिष्यसि रणे भीष्मं पुरुषत्वं च लप्स्यसे ।
स्मरिष्यसि च तत्सर्वं देहमन्यं गता सती ॥ १२
द्रुपदस्य कुले जाता भविष्यसि महारथः ।
शीघ्रास्त्रश्चित्रयोधी च भविष्यसि सुसंमतः ॥ १३
यथोक्तमेव कल्याणि सर्वमेतद्भविष्यति ।
भविष्यसि पुमान्पश्चात्कस्माच्चित्कालपर्ययात् ॥ १४
एवमुक्त्वा महातेजाः कपर्दी वृषभध्वजः ।
पश्यतामेव विप्राणां तत्रैवान्तरधीयत ॥ १५
ततः सा पश्यतां तेषां महर्षीणामनिन्दिता ।
समाहृत्य वनात्तस्मात्काष्ठानि वरवर्णिनी ॥ १६
चितां कृत्वा सुमहतीं प्रदाय च हुताशनम् ।
प्रदीप्तेऽग्नौ महाराज रोषदीप्तेन चेतसा ॥ १७
उक्त्वा भीष्मवधायेति प्रविवेश हुताशनम् ।
ज्येष्ठा काशिसुता राजन्यमुनामभितो नदीम् ॥ १८

इति श्रीमहाभारते उद्योगपर्वणि अष्टाशीत्यधिकशततमोऽध्यायः ॥ १८८ ॥

---

5 ^{a}) G न (G_3 नि-) हत्वा. — ^{b}) K_4 $B_{2.3.5}$ Dn_1 D_8 $D_{6.8.10}$ निवर्तिष्ये (for °र्तेयं). — ^{d}) $K_{1.2.5}$ $D_{3.7}$ M_1 अहमुद्यता (for इदमुद्यतम्). $K_{3.4}$ B Dn_1 D_8 $D_{3.4.8.10}$ यदिदं कथितं मया.

6 ^{a}) $D_{3.4}$ प्रति° (for परि°). — $B_{2.4.5}$ read 6^{cd} for the first time after 3^{ab}, *repeating* it here. — ^{c}) $D_{1.8}$ G_8 भीष्मं. $B_{2.5}$ D_8 प्रतिविधास्यामि. — ^{d}) K (except K_4) $D_{7.8}$ पुनः (for [इ]ति वै). B_8 $D_{2.10}$ T $G_{1.2}$ M_5 वा (for वै).

7 ^{a}) $D_{3.4}$ तदेनां (for तां देवो). — ^{b}) D_2 वृषध्वजः (for उमापतिः). — ^{d}) K_2 transp. स्वेन and रूपेण. $B_{1.3-5}$ Dn_1 D_8 $D_{6.8.10}$ तापसीं; B_2 $D_{3.4}$ भाविनीं.

8 ^{a}) Ca लुभ्यमाना (apparently for छन्द्यमाना). — ^{c}) K_4 B D (except $D_{1.2.7}$; Dn_2 missing) हनि° (for वधि°). — ^{d}) K_3 $D_{1.2}$ यश° (for मन°).

9 ^{d}) $K_{1.2.4}$ B D (except $D_{1.7.8}$; Dn_2 missing) T_1 G_3 स्त्रिया (for स्त्रियो). K_4 B Dn_1 D_8 $D_{3.4.6.8.10}$ transp. मम and युधि. — ^{e}) $D_{6.7.10}$ transp. मे and गाढं. $M_{1.2}$ नाथ; M_5 मूढं (for गाढं). — ^{f}) K (except K_4) D_7 श्रांतम् (for शांतम्).

10 ^{a}) D_1 मे देव; D_2 देवेश (for भूतेश). — ^{c}) K_3 हि (for स). D_8 D_{10} सद्यो (for सत्यो). D_1 भविता (for भवति). — K_2 D_4 om. (hapl.) 10^{c}–11^{b}.

11 K_2 D_4 om. 11^{ab} (cf. v.l. 10). — ^{b}) D_3 कन्यां गोवृषभध्वजः. — Before 11^{cd}, K_2 (marg.) ins. रुद्र उ°; $M_{1.2}$ भगवान्. — ^{cd}) B (except B_3) Dn_1 D_8 $D_{6.8.10}$ (by transp.) प्राह सत्यं भद्रे.

12 G_5 om. (hapl.) 12^{a}–14^{b}. — ^{a}) K_4 B D (except $D_{2.7}$; Dn_2 missing) हनि° (for वधि°). — ^{b}) D_8 M लप्स्यसि. — ^{c}) B_4 स्मरसीति; D_2 भविष्यति (for स्मरि°). K_5 रणे भीष्मं (for च तत्सर्वं). D_7 संस्मरिष्यसि तत्सर्वं.

13 G_5 om. 13 (cf. v.l. 12). — ^{b}) $K_{1.2}$ $D_{3.4.7}$ भवितासि (for °ष्यसि). — ^{d}) $D_{3.4}$ भवितासि (for °ष्यसि).

14 G_5 om. 14^{ab} (cf. v.l. 12). — ^{a}) $K_{1.3}$ $D_{3.4.7}$ एतत् (for एव). — ^{b}) K_3 D_1 एव (for एतद्). — ^{d}) $K_{1.2.5}$ Ds_2 $D_{7.8}$ G_3 M (M_4 before corr.) कस्मिश्चित्. $K_{1.2.5}$ $D_{7.8}$ $M_{1.3}$ कालपर्यये.

15 ^{a}) $K_{3.4}$ B Dn_1 D_8 $D_{1.2.6.8.10}$ महादेवः; $D_{3.4}$

१८९

दुर्योधन उवाच ।
कथं शिखण्डी गाङ्गेय कन्या भूत्वा सती तदा ।
पुरुषोऽभवद्युधि श्रेष्ठ तन्मे ब्रूहि पितामह ॥ १
भीष्म उवाच ।
भार्या तु तस्य राजेन्द्र द्रुपदस्य महीपतेः ।
महिषी दयिता ह्यासीदपुत्रा च विशां पते ॥ २
एतस्मिन्नेव काले तु द्रुपदो वै महीपतिः ।
अपत्यार्थं महाराज तोषयामास शंकरम् ॥ ३
अस्मद्वधार्थं निश्चित्य तपो घोरं समास्थितः ।
लेभे कन्यां महादेवात्पुत्रो मे स्यादिति ब्रुवन् ॥ ४
भगवन्पुत्रमिच्छामि भीष्मं प्रतिचिकीर्षया ।
इत्युक्तो देवदेवेन स्त्रीपुमांस्ते भविष्यति ॥ ५
निवर्तस्व महीपाल नैतज्जात्वन्यथा भवेत् ।
स तु गत्वा च नगरं भार्यामिदमुवाच ह ॥ ६
कृतो यत्नो मया देवि पुत्रार्थे तपसा महान् ।
कन्या भूत्वा पुमान्भावी इति चोक्तोऽस्मि शंभुना ॥ ७
पुनः पुनर्याच्यमानो दिष्टमित्यब्रवीच्छिवः ।
न तदन्यद्धि भविता भवितव्यं हि तत्तथा ॥ ८
ततः सा नियता भूत्वा ऋतुकाले मनस्विनी ।
पत्नी द्रुपदराजस्य द्रुपदं संविवेश ह ॥ ९

C. 5. 7397
B. 5. 188. 9
K. 5. 188. 9

°बाहो (for °तेजाः). — b) T2 नीललोहितः (for वृषभ°).

17 a) Ds2 T2 G2.3 च; G1 M1.2 तु (for सु-). — b) B3 D3.4.10 M2 प्रदीप्य; Ca प्रदाय (as in text). D7 om. (hapl.) 17c–18b. — c) B3 T2 G2.3 प्रदीप्त° (for प्रदीप्ते°). G3 च सा कन्या (for महाराज). — d) D2 क्रोधदीप्तेन. K5 Ds D1 T2 G1.2 तेजसा.

18 D7 om. 18ab (cf. v.l. 17). — a) D3.4 °वधार्थाय (for °वधायेति). — c) K (except K4) D2 काशिपते (for °सुता). D3.4 ज्येष्ठा राजन्काशिसुता.

Colophon. Dn2 D5.9 G4 missing. — *Sub-parvan:* N (Dn2 D5.9 missing) G6 अंबोपाख्यान. — *Adhy. name:* M अंबाप्रसादलाभ(M5 om. लाभ)कथनं. — *Adhy. no.* (figures, words or both): D6 78 (=178); T1 M4 190; T2 G1.2.5 M3.5 191; G3 188 (as in text); M1.2 189. — *S'loka no.:* K5 Dn1 19.

189

☞ This adhy. is missing in Dn2 (cf. v.l. 5. 187. 21); the MS. is mostly ignored here.

1 b) K1–3.5 D7 स मानद; K4 B Dn1 Ds D1.2.3.10 पुरा तदा; D3.4 तदा पुरा; D6 पुरानघ (for सती तदा). — c) Hypermetric! K1.2.4 D (except D2; Dn2 missing) T1 G5 [ऽ]भूद् (for ऽभवद्). D7 T1 युधां; G1 यथा (for युधि). K1–3 D7 श्रेष्ठः.

2 a) G3 transp. तु and तस्य. — c) K3 च तदा (for दयिता). D3.4 च (for हि). — d) K2 Dn1 -पतेः (for पते).

3 b) K D1.2.7 G3 [अ]पि; T G1.2.5 [अ]थ; M हि (for वै). K1.2.5 D7 महामनाः (for मही°). — c) K4 B D (except D2.7; Dn2 missing) अपत्यार्थे.

4 a) K (except K4) D7 द्रुपदोथ सपत्नीकः. — b) K1.2 D2.7 उपस्थितः; K3.5 B2.5 उपास्थितः; Ds2 D10 T2 G2.3 समाश्रितः. — c) K2 वव्रे; K4 B Dn1 Ds D6–8.10 ऋते (for लेभे). K4 B Dn1 Ds D6–8.10 T1 महादेव (for °देवात्). — d) K1.2.5 [अ]यं (for मे). B1.2.4 पुत्रो मम भवेदिति; D3.4 पुत्रः स्यादिति चाब्रुवन्.

5 b) K2.5 D6.7 S (except G3) भीष्म-. D2 प्रतिजिहीर्षया. — c) B2 प्रत्युक्तो. G3 देवदेवोथ; M1.2 °देवोपि.

6 b) D10 नैव (for नैतज्). — c) D3.4 T G1–3 M च (for तु). D3 T G1–3 M स्व- (for च). K1.2.5 D7 एवमुक्तस्ततो राजा; G5 स गत्वा स्वस्य नगरं. — d) K1.2.5 D7 भार्यां वचनमब्रवीत्.

7 a) K3 B Dn1 Ds D6.8.10 G3 महान्देवि; K4 D2–4 G1 महादेवि (for मया देवि). — b) B Ds D3.4.10 पुत्रार्थं. K4 B Ds D1–4.10 G3 मया (for महान्). Dn1 D6.8 तपसाराधितो मया. — 7c = 5. 192. 4c.

8 G3 om. 8ab. — b) D2.3 वचः (for शिवः). — c) K4 B Dn1 Ds D1.6.8.10 च (for हि). — d) D10 च (for हि). K1 D7 नान्यथा (for तत्तथा).

9 b) K3 तप° (for मन°). — d) B3 गृहं सा (for द्रुपदं). K4 B4.5 सा जगाम; Dn1 Ds D6.8.10 प्रविवेश;

C. 5. 7398
B. 5. 188. 10
K. 5. 188. 10

लेभे गर्भं यथाकालं विधिदृष्टेन हेतुना ।
पार्षतात्सा महीपाल यथा मां नारदोऽब्रवीत् ॥ १०
ततो दधार तं गर्भं देवी राजीवलोचना ।
तां स राजा प्रियां भार्यां द्रुपदः कुरुनन्दन ।
पुत्रस्नेहान्महाबाहुः सुखं पर्यचरत्तदा ॥ ११
अपुत्रस्य ततो राज्ञो द्रुपदस्य महीपतेः ।
कन्यां प्रवररूपां तां प्राजायत नराधिप ॥ १२
अपुत्रस्य तु राज्ञः सा द्रुपदस्य यशस्विनी ।
ख्यापयामास राजेन्द्र पुत्रो जातो ममेति वै ॥ १३
ततः स राजा द्रुपदः प्रच्छन्नाया नराधिप ।
पुत्रवत्पुत्रकार्याणि सर्वाणि समकारयत् ॥ १४
रक्षणं चैव मन्त्रस्य महिषी द्रुपदस्य सा ।
चकार सर्वयत्नेन ब्रुवाणा पुत्र इत्युत ।
न हि तां वेद नगरे कश्चिदन्यत्र पार्षतात् ॥ १५
श्रद्दधानो हि तद्वाक्यं देवस्याद्भुततेजसः ।
छादयामास तां कन्यां पुमानिति च सोऽब्रवीत् ॥ १६
जातकर्माणि सर्वाणि कारयामास पार्थिवः ।
पुंवद्विधानयुक्तानि शिखण्डीति च तां विदुः ॥ १७
अहमेकस्तु चारेण वचनान्नारदस्य च ।
ज्ञातवान्देववाक्येन अम्बायास्तपसा तथा ॥ १८

इति श्रीमहाभारते उद्योगपर्वणि एकोननवत्यधिकशततमोऽध्यायः ॥ १८९ ॥

D3.4 चाजगाम; M3 सा विवेश (for संवि°). K4 वै (for ह).

10 b) B Dn1 Ds D6.8 M3.4 कर्मणा (for हेतुना). — c) K3 T2 G3 M2.5 पार्षता(G3 °र्वा)त्स; K4 B D (except D1.7; Dn2 missing) पार्षतस्य. D1 S (except G5) महीपालाद्. — d) K1.2.5 D7 सत्यधर्मपरायणात्.

11 ab) K4 B D (except D1.7; Dn2 missing) सा (for तं). K3.4 B D (except D1.7; Dn2 missing) transp. गर्भं and देवी. K1.2 D7 राज्ञी (for देवी). — After 11ab, M1 reads 14. — d) D1 G5 कुलनंदन. — M (except M1) om. 11e–12b. — e) K3 महाराज; T G M1 °बाहो (for °बाहुः). — f) K4 सथा; D1 मुदा (for तदा). — After 11, N (Dn2 missing) ins.:

584* सर्वानभिप्रायकृतान्कामाँल्लेभे च कौरव ।

[K4 B Dn1 Ds D3.4.6.10 भार्यालभतं (for कामाँल्लेभे च).]

12 M (except M1) om. 12ab (cf. v.l. 11). — a) K4 B Dn1 Ds D3.4.6.10 सतो; T G1.2.5 M1 तदा (for ततो). — b) K1 B3.5 Ds D6.7 महीपते; T G यशस्विनः; M1 यशस्विनी (for महीपतेः). — After 12ab, N (Dn2 missing) ins.:

585* यथाकालं तु सा देवी महिषी द्रुपदस्य ह ।

[K (except K4) Dn1 D6 हि; B3 च; D3.4 सा (for ह).]

— c) K3 D1.2 परमरूपां. B3.5 Dn1 D6.10 तु; D3.4 वै; D7 च (for तां). — d) K3.5 B3 Ds2 D1.7 G3.5 M3 प्रजायत.

13 G1 om. 13ab. — a) T G (G1 om.) M1.2 च (for तु). — b) K4 B1.3.4 Dn1 Ds D6.10 मन° (for यश°). — c) D3.4 ज्ञापयामास. K4 D3.4 वै राज्ञो (for राजेन्द्र). — d) K3.4 B Dn1 Ds D6.8.10 ह्येष (B5 ह्यस्य); D3.4 एष (for जातो). S च (for वै).

14 M1 reads 14 after 11ab. — b) K1.3 D1.3 प्रच्छन्नाय; K2.5 Ds °न्नायां; S °न्नानि. Ds2 S (except T G2) नराधिपः.

15 b) D1–4 च; G3 ह (for सा). — c) K2.5 सर्वं (for सर्व-). — e) K4 B3 Dn1 Ds D6.8.10 च (for हि). — f) K1.2.5 D7 अन्यस्तु (for अन्यत्र). K5 पार्थिवात् (for पार्षतात्).

16 b) K1.2.5 D7 अमिततेजसः; B2.5 Dn1 अच्युत°; Ds2 अद्भुतकर्मणः. — d) S इत्येव (for इति च). Ds2 D7 वचो° (for च सो°). D3.4 सा°; G3 चा° (for सो°).

17 a) K1.3 D7 T1 G (except G1) M जातकर्मादि. G2.3 M -कर्माणि (for सर्वाणि). T2 एतस्य जातकर्माणि. — b) Ds2 भूपतिः (for पार्थिवः). — c) D3.4 G3 M5 °द्विधानि यु°. — d) K3 D1.2 तं (for तां).

18 a) S (except T1) सोहम् (for अहम्). — b) K5 M वै; B2 Ds तु; B5 D2.6.8.10 G3 ह (for च). — d) T2 G3 तदा (for तथा).

Colophon. Dn2 D5.9 G4 missing. — *Sub-parvan*: K B Dn1 Ds D1.2.6–8.10 G5 M अंबोपाख्यान. — *Adhy. name*: M शिखंड्युत्पत्तिकथनं. — *Adhy. no.* (figures, words or both): D6 79 (=179); T1 M4 191; T2 G1.2.5 M3.5 192; G3 189 (as in text); M1.2 190. — *S'loka no.*: K5 Dn1 20.

१९०

भीष्म उवाच ।

चकार यत्नं द्रुपदः सर्वस्मिन्स्वजने महत् ।
ततो लेख्यादिषु तथा शिल्पेषु च परं गता ।
इष्वस्त्रे चैव राजेन्द्र द्रोणशिष्यो बभूव ह ॥ १
तस्य माता महाराज राजानं वरवर्णिनी ।
चोदयामास भार्यार्थं कन्यायाः पुत्रवत्तदा ॥ २
ततस्तां पार्षतो दृष्ट्वा कन्यां संप्राप्तयौवनाम् ।
स्त्रियं मत्वा तदा चिन्तां प्रपेदे सह भार्यया ॥ ३

द्रुपद उवाच ।

कन्या ममेयं संप्राप्ता यौवनं शोकवर्धिनी ।
मया प्रच्छादिता चेयं वचनाच्छूलपाणिनः ॥ ४
न तन्मिथ्या महाराज्ञि भविष्यति कथंचन ।
त्रैलोक्यकर्ता कस्माद्धि तन्मृषा कर्तुमर्हति ॥ ५

भार्योवाच ।

यदि ते रोचते राजन्वक्ष्यामि शृणु मे वचः ।
श्रुत्वेदानीं प्रपद्येथाः स्वकार्यं पृषतात्मज ॥ ६
क्रियतामस्य नृपते विधिवद्दारसंग्रहः ।
सत्यं भवति तद्वाक्यमिति मे निश्चिता मतिः ॥ ७

भीष्म उवाच ।

ततस्तौ निश्चयं कृत्वा तस्मिन्कार्येऽथ दंपती ।
वरयांचक्रतुः कन्यां दशार्णाधिपतेः सुताम् ॥ ८
　ततो राजा द्रुपदो राजसिंहः
　　सर्वान्राज्ञः कुलतः संनिशाम्य ।
　दाशार्णकस्य नृपतेस्तनूजां
　　शिखण्डिने वरयामास दारान् ॥ ९
हिरण्यवर्मेति नृपो योऽसौ दाशार्णकः स्मृतः ।
स च प्रादान्महीपालः कन्यां तस्मै शिखण्डिने ॥ १०　C. 5. 7419　B. 5. 189. 10　K. 5. 189. 10

190

☞ This adhy. is missing is Dn2 (cf. v.l. 5. 187. 21); the MS. is mostly ignored here.

1 a) D5 transp. यत्नं and द्रुपदः. T2 G2 यस्तु; G6 यस्तु (for यत्नं). — b) M (M1 *inf. lin.* as in text) नृपते (for स्वजने). K B5 Dn1 D5 D1.3.4.6–8.10 सुतायाः सर्वकर्मसु; D2 सर्वविद्यासु भारत. — c) D3 तथा (for ततो). B3 D5 D3.4.6.10 लेखादिषु. D2 T2 G2.3 तदा (for तथा). — d) K3 D1 परमं गतः (D1 °ता); K5 B Dn1 D5 D3.4.7.8.10 च परंतप (for च परं गता). — e) D4 इष्वस्त्रे चैष; T G1.2.6 °स्त्रेषु च.

2 a) K1.2.4 D1 G2 M1.2 तस्या (for तस्य). K3 D1 च सा राजन् (for महाराज). — c) K3.5 D7 नोदयामास. — d) D8 M2 कन्यायां (for °याः).

3 c) K5 B3 Dn1 D5 D6–8.10 ततश्च; T2 तथा (for तदा). D3.4 तावत् (for चिन्तां).

4 T G1.2 om. the ref. — b) K1–3 D10 T2 G2 M2.5 शोकवर्धनी; B5 वरवर्णिनी; D6 G3 शोकवर्धनं. — c) K1.2.5 D1 प्रच्छादितेयं तु (K5 D7 च); T2 G2.5 प्रच्छादिता चैषा.

5 Before 5, N ins. भार्योवाच (D1 महिष्युवाच; D3.4 पत्न्यु°). — a) K1.2.5 D7.8 नैतन्; D1 (by transp.) तन्न. N (Dn2 missing) महाराज (for °राज्ञि). — d) N (Dn2 missing) वृथा (K1–3 D2–4.7 मृषा) वक्तुमिहार्हति (D8 मृषा कर्तुमिहार्हसि).

6 N G2.4 om. the ref. G1 देवी (for भार्योवाच). — a) D5 तात (for राजन्). — d) K1.2 D8 तां मतिं; K3–5 B Dn1 D5 D1.2.6.7.10 स्वां मतिं; D3.4 स्वमतिं (for स्वकार्यं).

7 a) D3.4 अथ (for अस्य). K3.4 B Dn1 D5 D6.8.10 यत्नेन (for नृपते). — c) K1–3.5 D1 G3 भवतु; D2.7 भवित्री. K4 B Dn1 D5 D3.4.6.8.10 भविता तद्वचः सत्यं.

8 K3.4 D (except D7.8) T G om. the ref. — b) K4 D1.3.4 काले (for कार्ये). K1.2 D2–4.7 G1.3 च (for ऽथ). — c) D3.4 वरयांचक्रिरे. — d) T2 दाशार्णां°.

9 a) K3.5 D3.4 राजन् (for राजा). — b) T2 G3 कुशलः (for कुलतः). M कुलजातान्निशम्य (for कुलतः संनि°). D1.3.4 संनिशम्य; T G तान्निशम्य. — c) K Dn1 D3.4.7.8 S (except T1) दशार्णकस्य. — d) D5 D6.10 T2 G2.3 शिखंडिनो. D10 राजन्; S कन्यां (for दारान्).

10 a) K5 D3.4 हिरण्यवर्मेति; T2 (*inf. lin.* as in

C. 5. 7420
B. 5. 189. 11
K. 5. 189. 11

स च राजा दशार्णेषु महानासीन्महीपतिः ।
हिरण्यवर्मा दुर्धर्षो महासेनो महामनाः ॥ ११
कृते विवाहे तु तदा सा कन्या राजसत्तम ।
यौवनं समनुप्राप्ता सा च कन्या शिखण्डिनी ॥ १२
कृतदारः शिखण्डी तु काम्पिल्यं पुनरागमत् ।
न च सा वेद तां कन्यां कंचित्कालं स्त्रियं किल ॥ १३
हिरण्यवर्मणः कन्या ज्ञात्वा तां तु शिखण्डिनीम् ।
धात्रीणां च सखीनां च व्रीडमाना न्यवेदयत् ।
कन्यां पाञ्चालराजस्य सुतां तां वै शिखण्डिनीम् ॥ १४
ततस्ता राजशार्दूल धात्र्यो दाशार्णिकास्तदा ।
जग्मुरार्तिं परां दुःखात्प्रेषयामासुरेव च ॥ १५
ततो दशार्णाधिपतेः प्रेष्याः सर्वं न्यवेदयन् ।
विप्रलम्भं यथावृत्तं स च चुक्रोध पार्थिवः ॥ १६
शिखण्ड्यपि महाराज पुंवद्राजकुले तदा ।
विजहार मुदा युक्तः स्त्रीत्वं नैवातिरोचयन् ॥ १७
ततः कतिपयाहस्य तच्छ्रुत्वा भरतर्षभ ।
हिरण्यवर्मा राजेन्द्र रोषादार्तिं जगाम ह ॥ १८
ततो दाशार्णको राजा तीव्रकोपसमन्वितः ।
दूतं प्रस्थापयामास द्रुपदस्य निवेशने ॥ १९
ततो द्रुपदमासाद्य दूतः काञ्चनवर्मणः ।
एक एकान्तमुत्सार्य रहो वचनमब्रवीत् ॥ २०
दशार्णराजो राजंस्त्वामिदं वचनमब्रवीत् ।
अभिषङ्गात्प्रकुपितो विप्रलब्धस्त्वयानघ ॥ २१
अवमन्यसे मां नृपते नूनं दुर्मन्त्रितं तव ।
यन्मे कन्यां स्वकन्यार्थे मोहाद्याचितवानसि ॥ २२
तस्याद्य विप्रलम्भस्य फलं प्राप्नुहि दुर्मते ।
एष त्वां सजनामात्यमुद्धरामि स्थिरो भव ॥ २३

इति श्रीमहाभारते उद्योगपर्वणि नवत्यधिकशततमोऽध्यायः ॥ १९० ॥

---

text) G2 °शृंगेति. — b) Ds2 G2 दशार्णकः.

11 a) B5 D3.4 दशार्णेशो (for °षु). — b) B3 Dn1 D3 D6.8.10 सुदुर्जयः (for महीपतिः). — M om. 11cd. — d) K3.4 B2.5 D3.4 T2 महाबलः; Ds °यशाः (for °मनाः).

12 d) K (except K4) D1.2 राजन् (for कन्या).

13 D7 om. (hapl.) 13a–14b. — a) K3.5 T2 M3–5 कृतदारा (for °दारः). K4.5 B D (except D2; Dn2 missing; D7 om.) M1 च (for तु). — b) D1.3.4 पुनरागतः; D2 °राव्रजन्; S (except T2 G1.2) पुरमागमत्. — c) K4 B Dn1 Ds D6.10 ततः (for न च). M1 सं- (for सा). K1.2.5 transp. सा and तां. K1.2 T1 G5 कन्या (for कन्यां). — d) K (except K4) T2 किंचित् (for कंचित्). D3.4 स्वयं (for स्त्रियं).

14 D7 om. 14ab (cf. v.l. 13). — ab) K1.2 कन्यां (for °न्या). Ds नु (for तु). S यदा त्वेनामजानात्सा स्त्रियमेव नृपात्मजा. — d) K4 B व्रीडयाना; D3.4 व्रीडिता सा. — e) D1 G5 कन्या. K4 B Dn1 Ds D3.4.6 T2 G1.2 पंचाल°. — f) K5 श्रुत्वा (for सुतां). K3.5 तां च; D1 तात; D3.4 चैनां (for तां वै).

15 a) K3 T2 G2.3.5 तां (for ता). — b) K5 D2.7 T1 G M दाशार्णकास्. D8 G1–3 तथा (for तदा). T2 धात्र्यो दाशार्णिकस्य च. — c) B3–5 Dn1 Ds D10 प्रेष्याः; D3.4 प्रेष्या (for दुःखात्).

16 a) D1 दाशार्णा°. — b) B Ds D2.6.8.10 सर्वां; D1 M °र्वं (for °र्वं). — D6 om. (hapl.) 16c–17d. — c) K1.5 Dn1 यथावत्तं; K3 °वत्तत्; D7 °वच्च (for °वृत्तं). — d) M1.2 श्रुत्वा (for स च).

17 D6 om. 17 (cf. v.l. 16). — b) T1 राज्ञां कुले (for राज°). K3.5 सदा; T2 G2.3 तथा (for तदा). — d) K1 नैवातिरोचयत्; B3 नैवाभि°; Dn1 (om. न) एवातिरोहयन्; Ds D10 (om. न) एवाति°; D1.2 (om. न) एवाभि°; D3.4 (om. न) एवाभ्य°; D7 नैवात्यरोचयत्; S नैवाभ्यरोचयत्.

18 a) S °पयाहस्सु. — b) K3 कृत्वा (for श्रुत्वा). T1 G3 M3–5 पुरुष° (for भरत°). — K3 om. 18cd. — c) S सुवर्णवर्मा. K1.2 राजेंद्रः. — d) T2 G2 कोपाद्; G1 रुरोद; M3.5 क्रोधाद् (for रोषाद्).

19 a) D7 M (except M2) दशार्णको. — b) K1.2.5 D7 तीव्रशोक°. — c) D3.4 संप्रेष°. — d) K3.4 B Dn1 Ds1 D6.10 निवेशनं.

20 c) K1 D1.2.7.8 एकम्; K2 एतम् (for एक). T G (except G3) त्वेकांत; M1.2 एकांत (for एकान्तम्).

21 B3 om. (hapl.) 21ab. — a) K4 B (B3 om.)

१९१

भीष्म उवाच ।
एवमुक्तस्य दूतेन द्रुपदस्य तदा नृप ।
चोरस्येव गृहीतस्य न प्रावर्तत भारती ॥ १
स यत्नमकरोत्तीव्रं संबन्धैरनुसान्त्वनैः ।
दूतैर्मधुरसंभाषैर्नैतदस्तीति संदिशन् ॥ २
स राजा भूय एवाथ कृत्वा तत्त्वत आगमम् ।
कन्येति पाञ्चालसुतां त्वरमाणोऽभिनिर्ययौ ॥ ३
ततः संप्रेषयामास मित्राणाममितौजसाम् ।
दुहितुर्विप्रलम्भं तं धात्रीणां वचनात्तदा ॥ ४
ततः समुदयं कृत्वा बलानां राजसत्तमः ।
अभियाने मतिं चक्रे द्रुपदं प्रति भारत ॥ ५
ततः संमन्त्रयामास मित्रैः सह महीपतिः ।
हिरण्यवर्मा राजेन्द्र पाञ्चाल्यं पार्थिवं प्रति ॥ ६
तत्र वै निश्चितं तेषामभूद्राज्ञां महात्मनाम् ।
तथ्यं चेद्भवति ह्येतत्कन्या राजञ्शिखण्डिनी ।
बद्ध्वा पाञ्चालराजानमानयिष्यामहे गृहान् ॥ ७
अन्यं राजानमाधाय पाञ्चालेषु नरेश्वरम् ।
घातयिष्याम नृपतिं द्रुपदं सशिखण्डिनम् ॥ ८

C. 5. 7442
B. 5. 193. 9
K. 5. 193. 9

Dn1 D2–4. 8 T2 G3. 5 दाशार्ण°. K1. 2 D7 दशार्णाधिपती राजन्. — ^d) K1. 3. 5 D7 नृप (for [अ]नघ).

22 D8 om. 22^a–23^b. — ^a) Hypermetric! G3 अमन्यसे; M3 अप° (for अव°). — ^c) K1. 2. 5 D7 यस्मात्; D1 कस्मात्; T G यन्मां (for यन्मे). D3. 4 च (for स्व-).

23 D8 om. 23^ab (cf. v.l. 22). — ^a) G1 एतस्य (for तस्याद्य). — ^c) D3. 4 ते; T1 G3 M त्वा (for त्वां). D3. 4 G1 स्व° (for स°). — ^d) D9 उद्धरामः. — After 23, D3. 4. 8 S ins.:

586* अवमस्य च वीर्यं मे कुलं चारित्रमेव च ।
विप्रलम्भस्त्वयापूर्वो मनुष्येषु प्रवर्तितः ।
कुरु सर्वाणि कार्याणि भुङ्क्ष्व भोगाननुत्तमान् ।
अभियास्यामि शीघ्रं त्वां समुद्धर्तुं सबान्धवम् ।

[(L. 1) D3. 4. 8 अवमन्य. — (L. 2) D3. 4 °पूर्वं; G3 °पूर्व- (for °पूर्वो). — (L. 3) D3. 4. 8 T1 M कुरु कार्याणि नृपते (for the prior half). D3. 4. 8 °क्रमात् (for °त्तमान्). — (L. 4) D3. 4. 8 °निर्यामि (for °यास्यामि).]

Colophon. Dn2 D5. 9 G4 missing. — *Sub-parvan:* N (Dn2 D5. 9 missing) T1 G5 M अंबोपाख्यान. — *Adhy. name:* M1. 2 शिखंडीपरिणयनं. — *Adhy. no.* (figures, words or both): D6 180; T1 M4 192; T2 G1. 2. 5 M3. 5 193; G8 190 (as in text); M1. 2 191. — *S'loka no.:* K5 25; Dn1 42.

191

☞ This adhy. is missing in Dn2 (cf. v.l. 5. 187. 21); the MS. is mostly ignored here.

1 ^b) K1. 2 D1. 7 G5 तथा (for तदा). B2 D1 S [अ]नघ (for नृप). — ^c) K2. 3. 5 Dn1 D8 D3. 4. 6. 8. 10 चौरस्य. — ^d) T2 प्रवर्तेत.

2 ^b) K1. 2. 4. 5 D (Dn2 missing) संबंधिन्य(K5 °र)नुमानने (D8 संमतैरनुमानने); B संमतैरनु(B3 ते वास्म)-मानवैः; G3 संबंधैरनुधावनैः. — ^c) D1. 7 G3 दूतं (for दूतैर्). — ^d) B D1 T1 न तद् (for नैतद्).

3 ^b) D1. 2. 7 ज्ञात्वा (for कृत्वा). M1. 2. 4. 5 तु तत (for तत्त्वत). D1. 7 M5 आगमत्. K4 B Dn1 D6. 8. 10 M8 ज्ञात्वा (K4 D8 M8 कृत्वा) तत्त्वमथागमत्. — ^c) A few MSS. पंचाल°. T1 ज्ञात्वा कन्येति पांचालीं. — ^d) K4 B D (except D7; Dn2 missing) वि- (for ऽभि-).

4 ^a) D8 D6. 10 स (for सं-). — ^c) K3 D1 निप्रलंभे. K2. 3 D1. 2 तु; D3. 4 वै (for तं). — ^d) K1. 2 नृप; D1 G2 तथा (for तदा).

5 ^b) K1. 4. 5 Dn1 D1. 7. 3 G5 °सत्तम; Ds2 °सत्तमं.

6 ^a) K2. 4. 5 B Dn1 D2–4. 7. 8 G3 M2. 5 स (for सं-). — ^b) K4 B D (except D1. 2. 7; Dn2 missing) मंत्रिभिः स मही°. — ^c) D3. 4. 8 राजेंद्रः. — ^d) S पांचालं. K2 नृपतिं प्रति; K8 प्रति पार्थिवः.

7 ^a) K5 T1 तत्रैव (for तत्र वै). B5 T1 निश्चयं (for °श्चितं). — ^c) K3 D2 चेन्नविता; K4 B Dn1 D8 D3. 4. 6. 8. 10 (by transp.) भवति चेत्. K8 चैतत्. G3 [इ]त्येतत् (for ह्येतत्). — ^e) A few MSS. पंचाल°. — ^f) K4 D3. 4 आनयिष्याम तं (K4 ते); B (except B3) °ष्यामि ते (for °ष्यामहे). K1. 3 D1. 2 वयं; K2. 4 B3 Dn1 D8 D3. 4. 6. 8. 10 गृहं; K5 D7 T1 G5 M1 गृहात्; B1. 2. 4. 5 वशं (for गृहान्).

8 ^b) K2. 4 B D8 D2–4. 10 G1 पंचालेषु; D1 पांचालानां. K (except K3) B1. 2. 4. 5 Ds2 D3. 4. 6. 7 जनेश्वरं (K2

C. 5. 7442
B. 5. 190. 10
K. 5. 190. 10

स तदा दूतमाज्ञाय पुनः क्षत्तारमीश्वरः ।
प्रास्थापयत्पार्षताय हन्मीति त्वां स्थिरो भव ॥ ९
स प्रकृत्या च वै भीरुः किल्बिषी च नराधिपः ।
भयं तीव्रमनुप्राप्तो द्रुपदः पृथिवीपतिः ॥ १०
विसृज्य दूतं दाशार्णं द्रुपदः शोककर्शितः ।
समेत्य भार्यां रहिते वाक्यमाह नराधिपः ॥ ११
भयेन महताविष्टो हृदि शोकेन चाहतः ।
पाञ्चालराजो दयितां मातरं वै शिखण्डिनः ॥ १२
अभियास्यति मां कोपात्संबंधी सुमहाबलः ।
हिरण्यवर्मा नृपतिः कर्षमाणो वरूथिनीम् ॥ १३
किमिदानीं करिष्यामि मूढः कन्यामिमां प्रति ।
शिखण्डी किल पुत्रस्ते कन्येति परिशङ्कितः ॥ १४
इति निश्चित्य तत्त्वेन समित्रः सबलानुगः ।
वञ्चितोऽस्मीति मन्वानो मां किलोद्धर्तुमिच्छति ॥ १५
किमत्र तथ्यं सुश्रोणि किं मिथ्या ब्रूहि शोभने ।
श्रुत्वा त्वत्तः शुभे वाक्यं संविधास्याम्यहं तथा ॥ १६
अहं हि संशयं प्राप्तो बाला चेयं शिखण्डिनी ।
त्वं च राज्ञि महत्कृच्छ्रं संप्राप्ता वरवर्णिनि ॥ १७

Ds2 D6 °र); B3 नराधिप; D1.2 T G1.2.5 M प्रजेश्वरं (M5 °र). — c) K1 D7 घातयिष्यामो; K3 (*sup. lin.* as in text) पातयिष्यामि; Dn1 Ds2 D6.8 घातयिष्यामि; D3.4 विनयिष्याम. K1.4.5 D7 द्रुपदं (for नृपतिं); see below. S अद्य वै (G1-3 अद्यैव) घा(G5 पा)तयिष्यामः (G2 °मि). — d) K1.4.5 D7 नृपतिं (see above); B3.5 Dn1 Ds D6.8 पांचालं (for द्रुपदं).

9 a) M2 हतम् (for दूतम्). K1-3.5 D1.7 तत्तथा- (K3 °दा)भूतमाज्ञाय; K4 B Ds D6.10 तत्तदानृतं°; Dn1 D8 तत्तदा नून°; *D2-4* तं तथ्य(*D2* °था)भूत°. C*a* cites तमनृतं. — b) K4 B D (except D1.2; Dn2 missing) पुनर्दूतान्नराधिपः (D7 °रेश्वरः). Cs cites तं क्षत्तारं दूतमाज्ञाय. — D6 om. (hapl.) 9c-10b. — c) K2.3.5 G3.5 M प्रस्थापयत्. K3 पार्थिवाय (for पार्ष°). — d) K1.3 [ए]ष्यामीति त्वं; B Dn1 Ds D10 निहन्मीति; D1 हन्मि त्वां सु-; D3.4 हन्मि त्वां तत्; G5 हरामि त्वां (for हन्मीति त्वां).

10 D6 om. 10ab (cf. v.l. 9). — Before 10, B1.2.4 Dn1 ins. भीष्म उ°. — a) K1.2.5 च संभीरुः; D1 च वै भीतः; D7 वशं भीतः; T1 चैव भीतः (for च वै भीरुः). B1.2.4 Dn1 Ds D10 स हि (B1.2.4 तु) प्रकृत्या वै भीतः; D3.4 प्रकृत्या च स वै भीतः. — b) K1.2 D1 G3 नराधिप; K3 नरेश्वर.

11 a) B4 D1 विसर्ज्यं; D2 °शिष्टं (for °सृज्य). B Dn1 Ds1 D3.4.10 दूतान्; Ds2 D6 दूताः (for दूतं). B Dn1 Ds D6.10 दाशार्णे; D3.4 M4 °र्णान्. — b) K (except K3) B D (except D1-4; Dn2 missing) शोकमूर्छितः. — c) K3 (by corr.) रहसि; G5 सहित (for रहिते). — d) K3.4 D1.2 वाक्यमेतदुवाच ह; T2 G2.5 उवाच स नराधिपः.

12 G2 om. 12. — a) D3.4 च समाविष्टो (for महता°). — b) S (G2 om.) कर्शितः (for चाहतः). — c) A few MSS. पंचाल°.

13 b) G1.2 स (for सु-). — K3.4 D1.2 read 13cd after 587*. — d) G3 [ऽ]पराधिनं; M1.2 महाचमूं (for वरू°).

14 a) K1-3 D7.8 मया कार्यं; B (except B2) Dn1 Ds D3.4.6.10 करिष्यावो (for °मि). — b) K3-5 B2 गू(B2 मू)ढकन्याम्; B1.3-5 Dn1 Ds D3.4.6.10 मूढौ कन्याम्. K1.2 D7 संयुक्तं (D7 °क्रुद्धं) नृपतिं प्रति. — After 14ab, K3.4 B2 D1.2 ins.:

587* उपयास्यति हि क्षिप्रं सहामात्यैर्नराधिपः ।

[B2 D1.2 समित्रः (B2 °मंत्रिं) सहबांधवः (for the posterior half).]

— Thereafter K3.4 D1.2 read 13cd. — G3 om. 14cd. — c) T G (G3 om.) खलु (for किल).

15 a) K4 B D (except D1.7; Dn2 missing) इति संचिं(*D2* निश्चि)त्य यत्नेन. — b) K4 *D3.4* सपदा° (for सबला°). K1.2.5 D7 समित्रबलवाहनः; K3 D1.2 स क्षिप्रमुपयास्यति. — c) G3 नृपतिर् (for मन्वानो). — d) G1 मामुद्धर्तुमिहेच्छति.

16 a) D1 तथ्यमर्थं (for अत्र तथ्यं). T1 G3.5 पथ्यं; T2 G1.2 कृत्यं; M4 चित्रं; Cs तथ्यं (as in text). — b) K3.4 B Dn1 Ds D1.2.6.8.10 (by transp.) मिथ्या किं; D3.4 मिथ्या वा. T1 कृतस्यास्य शुचिस्मिते. — c) T G (except G3) ततः (for त्वत्तः). B1.4.5 D1 T G1.2 शुभं (for शुभे).

17 a) K (except K5) D1-4 च (for हि). — b) D1.2 कन्या (for बाला). K1 (before corr.) चैव (for चेयं). D3.4 स्नुषा मम (for शिख°). — c) K1.2 महद्दुःखं; K5 D7 महादुःखं (for महत्कृच्छ्रं). — d) K1 D3 D6.7.10 G3.5 M (except M1) °वर्णिनी.

सा त्वं सर्वविमोक्षाय तत्त्वमाख्याहि पृच्छतः ।
तथा विदध्यां सुश्रोणि कृत्यस्यास्य शुचिस्मिते ।
शिखण्डिनि च मा भैस्त्वं विधास्ये तत्र तत्त्वतः ॥ १८
क्रिययाहं वरारोहे वञ्चितः पुत्रधर्मतः ।
मया दाशार्णको राजा वञ्चितश्च महीपतिः ।
तदाचक्ष्व महाभागे विधास्ये तत्र यद्धितम् ॥ १९
जानतापि नरेन्द्रेण ख्यापनार्थं परस्य वै ।
प्रकाशं चोदिता देवी प्रत्युवाच महीपतिम् ॥ २०

इति श्रीमहाभारते उद्योगपर्वणि एकनवत्यधिकशततमोऽध्यायः ॥ १९१ ॥

१९२

भीष्म उवाच ।
ततः शिखण्डिनो माता यथातत्त्वं नराधिप ।
आचचक्षे महाबाहो भर्त्रे कन्यां शिखण्डिनीम् ॥ १
अपुत्रया मया राजन्सपत्नीनां भयादिदम् ।
कन्या शिखण्डिनी जाता पुरुषो वै निवेदितः ॥ २
त्वया चैव नरश्रेष्ठ तन्मे प्रीत्यानुमोदितम् ।
पुत्रकर्म कृतं चैव कन्यायाः पार्थिवर्षभ ।
भार्या चोढा त्वया राजन्दशार्णाधिपतेः सुता ॥ ३ C. 5. 7459 B. 5. 191. 4 K. 5. 191. 4

---

18 a) M3–5 लब्ध° (for सर्व°). — b) K2 तत्वमाचक्ष्व; T2 G2 तत्समाख्याहि. K4 D1 पृच्छते. — Ds2 om. (hapl.) 18^{cdef}. — c) D3.4 ततो; M3–5 तथो (sic) (for तथा). — d) K3 T1 G कृतस्यास्य (K3m कार्यस्यास्य); K4 यथा शास्त्रे; B Dn1 Ds1 D1.3.4.6.7.10 कृत्यमाशु (for कृत्यस्यास्य). — e) Ds1 S शिखंडिने; D6.8 °नी. — f) Cf 19^f. K (except K4) D2.7.8 त(K3 य)दनंतरं; B3 तत्र तद्वचः; D1 तत्र यद्धितं (for तत्र तत्त्वतः).

19 D1 om. (hapl.) 19. — a) B D (except D7; Dn2 missing; D1 om.) Cs कृपया; T G (except G3) प्रियया (for क्रियया). D3.4 वै (for [अ]हं). — b) Dn1 D6 तत्वतः. K3 पुत्रजन्मतः; Cs °धर्मतः (as in text). — c) K3 D2 T2 G3 M1.2 दशार्णको. — d) K4 B Dn1 Ds D6.8.10 स (for च). — e) K1.2 D7 महाराज्ञि; D2.7 °प्राज्ञे (for °भागे). — f) K3 D6.8 G1 तद्धितं; Ds2 याचितं (for यद्धितम्).

20 Before 20, K3 ins. भीष्म उ°; T2 वैशंपायनः. — G2 om. 20^{ab}. — a) B D (except D1.7; Dn2 missing) T1 हि; Cs अपि (as in text). — b) D1.2 ख्यापनार्थे; Cs as in text. K D1.2.7 पुरस्य; Cs परस्य (as in text). — c) K2 D7 नोदिता (for चो°).

Colophon. Dn2 Ds.9 G4 missing. — *Subparvan:* N (Dn2 Ds.9 missing) T1 G5 M अंबोपाख्यान. — *Adhy. name:* M विप्रलंभपरिज्ञापनं. — *Adhy. no.* (figures, words or both): D6 81 (=181); T1 M4 193; T2 G1.2.5 M3.5 194; G3 191 (as in text); M1.2 192. — *S'loka no.:* K5 22; Dn1 64.

192

